दशमस्कंधप्रारंभः

श्रीभा. भाग. द. पू. १

श्रीगणेशाय नमः विश्वसर्गविसर्गादिनवलक्षणलक्षितं श्रीकृष्णाख्यं परं धाम जगद्धाम नमामि तत् दशमे दशमं लक्ष्यमाश्रिता
श्रयविग्रहं क्रीडद्यदुकुलांभोधौ परानंदमुदीर्यते दशमे कृष्णसत्कीर्तिवितानायोपवर्ण्यते धर्मग्लानिनिमित्तस्तु निरोधो दुष्टभूभुजां
प्राकृतादिश्चतुर्थो यो निरोधः स तु वर्णितः तत्प्रसंगतः सृष्टिसंहारादिनिरूपणैः कृता नवतिरध्यायाद्दशमे कृष्णकीर्तये आद्यैश्चतुर्भि
रध्यायैर्ब्रह्मप्रार्थनया वने भारंहर्तुंहरेर्जन्मप्रसंगनिरूप्यते गोकुले मथुरायां च द्वारवत्यां तथा क्रमात् कृष्णलीला त्रिधा प्रोक्ता

श्रीराजोवाच कथितो वंशविस्तारो भवता सोमसूर्ययोः राज्ञां चोभयवंश्यानां चरितं परमाद्भुतं १
यदोश्च धर्मशीलस्य नितरां मुनिसत्तम तत्रांशेनावतीर्णस्य विष्णोर्वीर्याणि शंस नः २

तत्रद्वैदेस्त्वनेकधा स पंचत्रिंशताध्यायैर्वृहद्वृंदावनादिषु गोकुले वसतो लीला वर्ण्यते सुरदुष्करा एकेन यमुनावारिण्यक्रूरे
णाद्भुता स्तुतिः एकादशभिराख्याता लीला मधुपुरे कृता शेषैर्द्वारवतीलीला तन्निर्माणादि वर्ण्यते एवं नवतिरध्यायाः दशमे वि
भेदाः कथ्याः तत्र तु प्रथमे कंसः स्वमृत्युं देवकीसुतात् श्रुत्वा[...]लोऽवधीत्तस्याः षड्गर्भानिति वर्ण्यते कृष्णावतारचरितश्रव
णाभूतनिर्वृतः उक्तानुवादेनौत्सुक्यात् कोशापृच्छति तत्पुनः कथित इति उभयवंश्यानां सोमसूर्यभवानां १ यदोश्चरितं वर्णितमि
त्यन्वयः अंशेनेति तृतीयभीआयेरोक्तं अनुक्तानि जातोगतः पितृगृहाद्व्रजमेधितार्थ इत्यादिना सतं पुनर्विस्तारेणावदेत्याह नाम
अवतीर्य २

भा० द० द्रौण्यस्त्रयाम्नः ब्रह्मास्त्रेण दग्धमिदं मच्छरीरं कुरूणां पांडवानां च संतानस्य निधानं मम मातुः कुक्षौ प्रविष्टो धृतचक्रः यो जुगोपेति ६ अ
पृ २ खिलदेहभाजां सर्वप्राणिनामंतश्च बहिश्च पुरुषरूपेण कालरूपेण चेति अंशाभिप्रायेण बहुवचनं मृत्युं संसारं इतामृतमपि प्रय
च्छतो भगवतः तस्य वीर्याणि कथयस्व ब्रूहि अयं भावः अंतर्यामिरूपेण अंतरंगस्थानां मुक्तिं बहिर्दृष्टीनां कालरूपेण मृत्युं ददातीय
तः अतो नर्दृष्ट्या तद्वीर्याण्येव श्रोतव्यानीति ७ ननु तुल्यगदं सारणं चदुर्मदं विपुलं ध्रुवं वसुदेवस्तु रोहिण्यां कृतादीनुदपादय

द्रौण्यस्त्रविप्लुष्टमिदं मदंगं संतानबीजं कुरुपांडवानां जुगोप कुक्षिं गत आत्तचक्रो मातुश्च मे यः शरणंग
तायाः ६ वीर्याणि तस्याखिलदेहभाजामंतर्बहिः पुरुषकालरूपैः प्रयच्छतो मृत्युमुतामृतं च
मायामनुष्यस्य वदस्व विद्वन् ७ रोहिण्यास्तनयः प्रोक्तो रामः संकर्षणस्त्वया देवक्या गर्भसंबंधः कुतो दे
हांतरं विना ८ कस्मान्मुकुंदो भगवान् पितुर्गेहाद्व्रजं गतः क्व वासं ज्ञातिभिः सार्द्धं कृतवान्सात्वतां पतिः ९
व्रजे वसन्किमकरोन्मधुपुर्यां च केशवः भ्रातरं चावधीत्कंसं मातुरद्धातदर्हणं १०

दिति रोहिण्याः तनयो रामः प्रोक्तः वसुदेवस्तु देवक्यामष्टपुत्रानजीजनत् कीर्तिमंतं सुषेणं च भद्रसेनमुदारधीः मृदुं संमर्दनं
चैव संकर्षणमहीश्वरं अष्टमस्तु तयोरासीत्स्वयमेव हरिः किलेति पुनः देवक्या गर्भसंबंधः तस्यैवोक्तः स कुतो वदते इत्यपेक्षा ८
कस्मादिति भगवतः कंसभयशंकासंभवादित्यर्थः पितुर्गेहाद्वसुदेवगृहात् व्रजं गतो कुत्र कस्मात् इति प्रस्तावः ९ मातुर्भ्रा रामः
तरं कंसं तस्माद्वधार्हेनेदं अद्धा साक्षादवधीत् १० २

५ भूतानि भावयति देहोपचयादीति भूतभावनः अत्र लोके त्रिधा जना मुक्ता मुमुक्षवो विषयिणश्च तेषां मध्येऽन्यतरस्याप्यलं अलमय
इत्याह ३ निवृत्ततर्षैर्गीतत्वान्मुक्तैरपीत्यर्थः मुमुक्षूणामप्ययमेवोपाय इत्याह भवौषधादिति विषयिणामपि परमो विषयो
यमित्याह ३ श्रोत्रमनोभिरामादिति अपगता शुक् यस्मात्तमात्मानं हंतीत्यपशुरघ्नः तस्मात्पशुघ्नात्तिन इति न शौरा किंचातु

अवतीर्य यदोर्वंशे भगवान्भूतभावनः कृतवान्यानि विश्वात्मा तानि नो वद विस्तरात् ३ निवृत्ततर्षै
रुपगीयमानाद्भवौषधाच्छ्रोत्रमनोभिरामात् क उत्तमश्लोकगुणानुवादात्पुमान्विरज्येत विना पशुघ्ना
त् ४ पितामहा मे समरेऽमरंजैर्देवव्रताद्यातिरथैस्तिमिंगिलैः दुरत्ययं कौरवसैन्यसागरं कृत्वातरन्वत
यै सपदं स्म यत्प्लवाः ५

अस्मत्कुलदैवतं कृष्णः अतः तत्कथैव नित्यं श्रोतव्येत्याशयेनाह ४ अमरान्जयति येतैः देवव्रतो भीष्मः तदाद्यैरतिरथैः तिमिंगि
लैस्तुल्यैः दुरत्ययं कौरवसैन्यसागरं वत्सपदमिव अप्रयत्नं कृत्वा मे पितामहा युधिष्ठिरादयः अतरन्स्म अत्र हेतुः यत्प्लवाः श्रीकृष्णः
प्लवो येषां तस्य वीर्याणि वदस्वेति सप्तीयश्लोकेनान्वयः न केवलं पांडवानेवापदस्तीर्णं महतोऽपि मां गर्भस्थं रक्षितवानित्याह ५

वृषेण धर्मेण आसमंतात् कं सुखं पिबतीति वृषाकपिं २० पौरुषीं पुरुषस्य भगवतो गां वाचं मे मत्तः मा चिरं अविलंबितं यथा भवति तथैव
विधीयतां चेति विज्ञापनात् २१ पुरैव पुंसा ईश्वरेण ज्वरः संतापोवधृतो निश्चितः पूर्वमेव ननु भमतानां भावतारो महद्दुःखाये साह

ब्रह्मा तदुपधार्याथ सह देवैः तया सह जगाम सत्रिनयनः तीरं क्षीरपयोनिधेः १९ तत्र गत्वा जगन्नाथं
देवदेवं वृषाकपिं पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः २० गिरं समाधौ गगने समीरितां निशम्य वे
धास्त्रिदशानुवाच ह गां पौरुषीं मे शृणुतामराः पुनर्विधीयतामाशु तथैव मा चिरं २१ पुरैव पुंसावधृ
तो धराभरो भवद्भिरंशैर्यदुषूपजन्यतां स यावदुर्व्या भरमीश्वरः स्वयं स्वकालशक्त्या क्षपयंश्चरेद्भुवि २२
वसुदेवगृहे साक्षाद्भगवान्पुरुषः परः जनिष्यते तत्प्रियार्थं संभवंतु सुरस्त्रियः २३ वासुदेवकला
नंतः सहस्रवदनः स्वराट् अग्रतो भविता देवो हरेः प्रियचिकीर्षया २४ विष्णोर्माया भगवती यया सं
मोहितं जगत् आदिष्टा प्रभुणांशेन कार्यार्थे संभविष्यति २५

ईश्वराणां लोकपालादीनामपीश्वरः स्वस्वरूपकालबलात् यावद्भूमिभारं क्षपयन् भगवांश्चरेत् २२ स्पष्टं २३ स्वेनात्मस्वरू
पेण राजत इति स्वराट् २४ देवकीगर्भसंकर्षण यशोदामोहनादिकार्यार्थं यशोदायां संभविष्यति २५ श्रीरामजी सहाय

स्पष्टं ११ ननु क्षुत्तृड्भ्यां पीडितस्य कुत एव श्रवणावकाश इत्याह नैषेति त्यक्तोदस्यापि मम जीवनं हरिकथामृतपानेन निमित्तेन तदुपर
मे जीवितमेव सद्यो न स्यादित्यर्थः १२ भृगुनंदन शौनक एवं साधुवादं समीचीनं प्रश्नं वैयासकिः श्रीशुकः विष्णुरातं परीक्षितं भाग

देहं मानुष्यमाश्रित्य कतिवर्षाणि वृष्णिभिः मधुपुर्यां सहावासीत्पत्न्यः कत्यभवन्विभोः एतदन्यच्च
सर्वं मे मुने कृष्णविचेष्टितं वक्तुमर्हसि सर्वज्ञ श्रद्दधानाय विस्तृतं ११ नैषातिदुःसहा क्षुन्मां त्यक्तोद
मपि बाधते पिबंतं त्वन्मुखांभोजच्युतं हरिकथामृतं १२ सूत उवाच एवं निशम्य भृगुनंदन साधुवादं
वैयासकिः स भगवानथ विष्णुरातं प्रत्यर्च्य कृष्णचरितं कलिकल्मषघ्नं व्याहर्तुमारभत भागवतप्रधानः
श्रीशुक उवाच सम्यग्व्यवसिता बुद्धिस्तव राजर्षिसत्तम वासुदेवकथायां ते यज्जाता नैष्ठिकी मतिः १४
वासुदेवकथाप्रश्नः पुरुषांस्त्रीन्पुनाति हि वक्तारं पृच्छकं श्रोतॄंस्तत्पादसलिलं यथा १६ भूमिर्दृप्तनृ
पव्याजदैत्यानीकशतायुतैः आक्रांता भूरिभारेण ब्रह्माणं शरणं ययौ १७ गौर्भूत्वाश्रुमुखी खिन्ना रु
दंती करुणं विभोः उपस्थितांतिके तस्मै व्यसनं स्वमवोचत १८

वते शुश्रेष्ठः १३ व्यवसिता कृतनिश्चया यतो बुद्धेः १५ तत्पादसलिलं गंगोदकं तत्र तावत्प्रथमं भगवदवतारकारणमाह १६
दृप्तनृपव्याजा ये दैत्याः तेषामनीकशतानामयुतैर्भूरिभारः सेनाक्रांता १७ विभोरंतिके उपस्थिता स्वं व्यसनमवोचत १८

सं
भा· द·
४ पू·

निशंकुरं महाभाग इत्ययंभावः स्वजन्मनिहर्षेणदेवैरानकदुंदुभितोषणस्वस्मात् भाविभगवदवतारेण प्राक्प्रतीकारता संभवतीति सां
त्वयन् स्तुत्याद्युपायविषयत्वेनोपपत्तिभिश्चसाममार्गेण संबोधयन् ३६ मरणभयेन हन्मीतिचेत् तत्रापि मरणस्यापरिहार्यत्वाद्देहां
तरस्याप्यवश्यंभावित्वात्तत्रापिच भोगक्षेमास्पदत्वादीनामविशेषात्तरभयेन पापाचरणमयुक्तमित्यभ्युपेत्याह ३७ देहेनसहेति विधात्रा

५

तंजुगुप्सितकर्माणंनृशंसंनिरपत्रपं वसुदेवोमहाभाग उवा
चपरिसांत्वयन् ३६ वसुदेवउवाच श्लाघनीयःगुणैःसूरैर्भवा
२ न्भोजयशस्करः सकथंभगिनींहन्यात्स्त्रियमुद्वाहपर्वणि ३७
मृत्युर्जन्मवतांवीरदेहेनसहजायते अद्यवाब्दशतांतेवामृत्यु
र्वैप्राणिनांध्रुवः ३८ देहेपंचत्वमापन्नेदेहीकर्मानुगोवशः
देहांतरमनुप्राप्यप्राक्तनंत्यजतेवपुः ३९ गोपालायनमः॥

ललाटे लिखितत्वात् इति तथापि कालविलंबार्थं हन्मीतिचेत् तत्राह अद्यचेति अवश्यंभाविनि मरणे विलंबमात्राय पापाचरणमयुक्त
मितिभावः किंच अस्मिन्देहे गते यदिदेहांतरं नस्यात् तदायुज्येत पापेनापि तत्पालनं नतु तदस्तीत्याह ३८ देहे पंचत्वमापन्ने आपन्न
प्रायेकर्मवशगदयन्नत एव प्रपन्नदेहांतरं प्राप्य पश्चात्पूर्ववपुः त्यजति अतो देहांतः ब्रजन्नेति ३९ ॐनमोभगवतेवासुदेवाय॥ राम

स्पष्टं भोजेंद्रं बंधनागारे वतारायप्रस्तावमाह शूरसेन इत्यादि यावदध्यायसमाप्तिः २६ मथुरायामावसन् विषयान्देशान् २७ सूर्ययानवो
ढया प्रयाणे प्रयाणार्थं २९ रश्मीनग्रहीत् ३० पारिबर्हमुपस्कारं सार्द्धमयुतं पंचदशसहस्त्राणि अश्वानां त्रिषट् शतमष्टादशश

श्रीशुकउवाच इत्यादिश्यामरगणान्प्रजापतिपतिर्विभुः आश्वास्य च महीं गीर्भिः स्वधाम परमं ययौ २६
शूरसेनो यदुपतिर्मथुरामावसन्पुरीं माथुरान् शूरसेनांश्च विषयान्बुभुजे पुरा २७ राजधानी ततः साभू
त्सर्वयादवभूभुजां मथुरा भगवान्यत्र नित्यं सन्निहितो हरिः २८ तस्यां तु कर्हिचित् शौरिर्वसुदेवः कृतो
द्वह देवक्या सूर्यया सार्द्धं प्रयाणे रथमारुहत् २९ उग्रसेनसुतः कंसः स्वसुः प्रियचिकीर्षया रश्मीन्ह
यानां जग्राह रौक्मै रथशतैर्वृतः ३० चतुःशतं पारिबर्हं गजानां हेममालिनां अश्वानामयुतं सार्द्धं रथानां
च त्रिषट्शतं ३१ दासीनां सुकुमारीणां द्वे शते समलंकृते दुहित्रे देवकः प्रादाद्याने दुहितृवत्सलः ३२ शं
खतूर्यमृदंगाश्च नेदुर्दुंदुभयः समं प्रयाणप्रक्रमे तात वरवध्वोः सुमंगलं ३३ पथि प्रग्रहिणं कंसमाभाष्या
हाशरीरवाक् अस्यास्त्वामष्टमो गर्भो हंता यां वहसे बुध ३४ इत्युक्तः स खलः पापो भोजानां कुलपांशनः
भगिनीं हंतुमारब्धः खड्गपाणिः कचे ग्रहीत् ३५

तानी रथानां हेममालिनामिति सर्वत्र योज्यं ३१ प्रग्रहिणं रश्मियुक्तं आभाष्य रे रे कंसेति संबोध्य हंता हनिष्यति ३३ कुलपांस
नः कुलदूषणः आरब्धः उद्युक्तः कचे केशबंधे ३५

भा॰ द॰ देहस्य पंचत्वसमये पंचसु गुणेषु मायारचितेषु मायया नानादेहरूपेण रचितेषु दैवेन कर्माभिमुखेन चोदितं प्रेरितं नानाविकारात्मकं
५ पू॰ मनो यं देहं तिर्यगादिरूपं प्रतिधावति धावत्सत् यमाप अभिनिवेशेन प्राप्नोति तत्र तत्रासौ देही जायते ननु मनसः कर्तृत्वात्तदेव
यतां नन्वकर्तात्मेत्याह प्रपद्यमान इति तदेवाह मिति प्रपद्यमानः तेन सह जायते इति ननु सत्यं भविष्यत्येव किमपि देहमात्रं तथा
प्यस्याति प्रियस्य राजदेहस्य स्वकर्मणा या स्वत्यमपि क्रियते इति चेत्तत्राह ५२ अदः चंद्रादिज्योतिः उदक युक्तेषु पार्थिवेषु घटादिषु

5 यतो यतो धावति दैवचोदितं मनो विकारात्मकमाप पंचसु
गुणेषु मायारचितेषु देह्यसौ प्रपद्यमानः सह तेन जायते
४२ ज्योतिर्यथैवोदकपार्थिवेष्वदः समीरवेगानुगतं विभा
व्यते एवं स्वमायारचितेष्वसौ गुणेषु रागानुगतो विमु
ह्यति ४२

यथा उदकेषु पार्थिवेषु तैलघृतादिषु च प्रतिबिंबेषु न स्थितं समीरस्य वायोर्वेगस्य अनुगतं कंपादियुक्तं यथा एवं स्वादियार
चितेषु गुणेषु देहेषु सोऽरागेण अनुगतः प्रविष्टो मुह्यति अभिनिवेशं प्राप्नोति अयं भावः आत्मनस्तावद्देहाद्यध्यासात् जन्मो
क्तं सह तेन जायते इति तत अन्योन्य धर्माध्यासाद्यथा देह धर्माः काश्यादय आत्मनि प्रतीयते एवमात्म धर्मप्रेमास्पदत्वा रामः
दयोऽपि देहादिष्विति राजसूकरदेहयोर्विशेषाभावात् व्यर्थो मृत्यु प्रतीकार इति ४२ ॐ नमो भगवते वासुदेवाय ॐ ५

एकेनाग्रतो निहितेन पदा तिष्ठन् ध्रुवमवष्टभ्य पश्चादन्येन पूर्वप्रदेशादुत्थाप्य पुरो निहितेन गच्छन्ति तद्वत् अत्र च स्वीकारपरित्या
नात्यंतभिन्नविषयाविति स्पष्टं दृष्टांतरमाह यथा तृणजलौकेति साहित्यरूपं तरमेवष्टभ्य पूर्वं तृणं त्यजति एवं कर्मणोपेक्ष्य
मानो जीवोऽपि जन्ममृत्युभयादीनि यन्नामस्मृतिमात्रतः विनश्यंति तस्मै नमस्तस्मै स्मायपरमात्मने ४० देहविषयावेव स्वीका
रपरित्यागौ दर्शयितुं दृष्टांतांतरमाह ४० दृष्टं राजादिदर्शनं स्फूर्तिमिंद्रादिश्रवणं ताभ्यामाहित संस्कारेण मनसा तदेवानुचिंत

व्रजंस्तिष्ठन्पदैकेन यथैवैकेन गच्छति यथा तृणजलौ
कैवं देही कर्मगतिं गतः ४० स्वप्ने यथा पश्यति देहमीदृ
शं मनोरथेनाभिनिविष्टचेतनः दृष्टश्रुताभ्यां मन
सानुचिंतयन्प्रपद्यते तत्किमपि ह्यपस्मृतिः ४१

यत् ईदृशं जाग्रद्दृष्टश्रुतसदृशं देहं राजादिरूपं किमपि अनिरुक्तं पश्यति स्वप्नांतरे च तदेवाहमिति प्रपद्यते अभिमन्यते ततश्च
जाग्रद्देहादयगतस्मृतिर्भवति पुरुषो यथेति जाग्रत्येवं दृष्टांतांतरं दर्शयितुमाह मनोरथेनेति अत्रापि दृष्टश्रुताभ्यामित्यादि संबंधो
ज्ञेयः तथाच वक्ष्यति जंतोर्वै कस्यचिद्धेतोर्मृत्युरत्यंतविस्मृतिः जन्मत्वात्मतया पुंसः सर्वभावेन भूरिद विषयस्वीकृतिं प्राहुर्यथा स्वप्नम
नोरथः स्वप्नं मनोरथं चेच्छन्प्राक्तनं न स्मरत्यसावित्यादि तद्वदत्रापि कर्मवशाद्देहांतरं आप्य प्राक्तनं त्यजतीति ननु विचित्रदेहे त

नां कर्मणां कृतत्वात् देहविशेषप्राप्तौ किं कारणमत आह ४१

मा॰द॰ यदिमसुताभविष्यति नचायंम्रियेत मत्सुआदेवास्या मरणमितिविपर्ययोवाकिंनस्यात् ननुभोः कस्मकंसस्य तववालकालकाथंमृत्सुः
द्द पू॰ स्याद्विलत आगतिरितिधातुः अस्याष्टामष्टमोगर्भोहंते मत्सुज्जातेतावत उक्तावतः अतइदानीमपलापरोअतिसेवमञ्च: तथा
सति उपस्थितोमृत्युरयं निवर्त्तेत तावत्तु निवृत्तः पुनःकालांतरेणापतेच्चेत् नापराधोममेत्यर्थः अथवामत्सुताउपस्थितोमृत्सुः
अस्यावधानिवर्त्तेत पुनरनेनमंत्रेणभवेदिति यद्वागतिर्धातुदुरत्ययेत्येतस्यप्रपंच उपस्थित इति ४९ आलिनांअदिष्टंदुर्वितर्क्य

6 विपर्ययोवीकिंनस्याद्गतिर्धातुदुरत्यया उपस्थितोनिवर्त्तेतनिवृत्तःपुनरापतेत् ५० अग्नेर्यथादारुवि
योगयोगयोरदृष्टतोन्यत्रनिमित्तमस्ति एवंहिजंतोरपिदुर्विभाव्यःशरीरसंयोगवियोगहेतुः ५१
एवंविमृश्यतंपापंयावदात्मनिदर्शनं पूजयामासवैशौरिर्बहुमानपुरस्सरं ५२ विकसद्वदनांभो
जोनृशंसंनिरपत्रपं मनसादूयमानेनप्रहसन्निदमब्रवीत् ५३ नचास्यास्तेभयंसौम्यपदैवा
हाशरीरवाक् पुत्रान्समर्पयिष्येस्यायतस्तेभयमागतं ५४

मितिसदृष्टांतमाह अग्नेरिति ५० वनेवृक्षान्दहन्वह्निः सन्निहितानपिवृक्षान्परित्यज्यकदाचिद्दूरस्थानपिदहति ग्रामेगृहान्वाइत्यस्यग्रा
माणपदृष्टव्यतिरेकेणकिंचिन्नियामकमस्तियथा एवंजंतोर्जन्ममरणयोरपिहेतुर्दुर्विभाव्योचिंत्यः यावदात्मनिदर्शनं स्वप्रज्ञावि
धिविचार्य ५२ नस्यविश्वासायविकसितवदनांभोजःप्रहसान्निदमब्रवीत् ५३ यद्यथाअशरीरिणीवागाहतथापिनिश्चितं अस्याःसकाशा
त्तेभयंनास्तियतोयेभ्यः पुत्रेभ्यःतेभयंयुत्पन्नं अष्टमोहंतेसुतो अन्योन्यापेक्षया सर्वेप्यष्टमाभवेयुरितितत उत्पन्नात्पुत्रान्समं

पीठिकेताख्या: ६४
राम:
६

एवमुक्तं सामोपायमुपसंहरन्भेदमाह सतथाविधोदेहे कस्यचिद्द्रोहं नाचरेत् अतनादिति अभिद्रुह्यमानात् तत्संबंधिनश्च यमादपि इ
हामुत्र च भयमिति भेदो दर्शितः ४४ पुनः सामैवाह पुत्रिकोपमा दारुमयीवाचेतनाया ४५ बोध्यमान उपदिश्यमानः स्वयं दारु
णः पुनः पुरुषादान्दैत्याननुव्रतः अनुसृत इति ४६ आनकदुंदुभिरिति पदं महाभाग इत्यस्योक्ताभिप्रायं प्रतिवोढुं प्रतिक

तस्मान्न कस्यचिद्द्रोहमाचरेत्स तथाविधः आत्मनः क्षेममन्विच्छन्द्रोग्धुर्वै परतो भयं ४४ एषा तवानुजा
बाला कृपणा पुत्रिकोपमा हंतुं नार्हसि कल्याणीमिमां त्वं दीनवत्सलः ४५ श्रीशुक उवाच एवं सामा
दिभिर्भेदैः बोध्यमानोपि दारुणः न न्यवर्तत कौरव्य पुरुषादाननुव्रतः ४६ निर्बंधं तस्य तं ज्ञात्वा वि
चिंत्यानकदुंदुभिः प्राप्तं कालं प्रति वोढुमिदं तत्रान्वपद्यत ४७ मृत्युर्बुद्धिमतापोह्यो यावद्बुद्धिब
लोदयं यद्यसौ न निवर्तेत नापराधोस्ति देहिनः प्रदाय मृत्यवे पुत्रान्मोचये कृपणामिमां सुता मे
यदि जायेरन्मृत्युर्वा न म्रियेत चेत् ४८

र्तुमित्यर्थः इदं वक्ष्यमाणमपमृत्युमरणमन्वपद्यत ज्ञातवान् ४७ न खलु नो यमे तच्च मन्यते इत्याशंक्याह मृत्युरिति तस्माद्दोषप
रिहारार्थं एवं करिष्यामीत्याह मृत्यवे इत्याह मन्यवे कंसाय ननु इदमपि नैव न्याय मित्याशंक्याह सुता इति अस्यां यदि मे सुता
जायेरन् तदा यद्यात्मजीवितं जीवितं तावद्दद्यादेव तदं तनायद्यमेव म्रियेत तदा न किंचिदन्याय्यं ४८ श्रीरामो जयति ऽऽ

सं॰ २

भा॰ द॰ उभयोर्वसुदेवनंदकुलयोः ६३ वधोद्यमं दैवरूपमिति शेषः ६५ निगडैः शृंखलैः अजनो विष्णुः तस्य शंकया ६९ इति श्रीभावार्थदीपिकायां द

७ पू॰ शमस्कंधे प्रथमोध्यायः १ द्वितीये कंसघाताय देवक्या गर्भगो हरिः ब्रह्मादिभिः स्तुतो साच त्विति निरूप्यते यदुभिः सव्यरुध्य

सर्वे वै देवताप्राया उभयोरपि भारत ज्ञातयो बंधुसुहृदो ये च कंसमनुव्रताः ६३ गतेष्वथ वसुदेवे तु देव
कार्यार्थमुद्यतः एतत्कंसाय भगवान्शशंसाभ्येत्य नारदः भूमेर्भारायमाणानां दैत्यानां च वधोद्यमं
६४ ऋषेर्विनिर्गमे कंसो यदून्मत्वा सुरानिति देवक्या गर्भसंभूतं विष्णुं च स्ववधं प्रति ६५ दे
वकीं वसुदेवं च निगृह्य निगडैर्गृहे जातं जातमहन्पुत्रं तयोरजनशंकया ६६ मातरं पितरं भ्रातॄन् सर्वां
श्च सुहृदस्तथा घ्नंति ह्यसुतृपो लुब्धा राजानः प्रायशो भुवि ६७ आत्मानमिह संजातं जानन्प्राग्वि
ष्णुना हतं महासुरं कालनेमिं यदुभिः स व्यरुध्यत ६८ उग्रसेनं च पितरं यदुभोजांधकाधिपं स्व
यं निगृह्य बुभुजे शूरसेनान्महाबलः ६९ इति श्रीभागवते दशमस्कंधे प्रथमोध्यायः १ शुक
उवाच प्रलंबबकचाणूरतृणावर्तमहाशनैः मुष्टिकारिष्टद्विविदपूतनाकेशिधेनुकैः १ अन्यै
श्चासुरभूपालैर्बाणभौमादिभिर्युतः यदूनां कदनं चक्रे बली मागधसंश्रयः २

तेसुक्तं तमेव विरोधं प्रपंचयति त्वरया देवकीगर्भस्यान्यत्र संचारेण भगवतः प्रवेशवक्तुं प्रलंबो सादि साद्धत्रयेण महाशनो अघासुरः

द्वि॰ भोजराजसंधं ३

रामः
७

निवृत्तेनिरत्तः तद्वाक्येसारउपपत्तिः तद्वित् ५५ प्रसूतिकालेप्राप्तेसर्वात्मा भगवानेवदेवतायस्याः सातया सर्वदेवतामयीतिवा भगवद्धा
आयत्वात् ५६ कृच्छ्रेणपुत्रंकथमर्पितवानित्यपेक्षायामाह ५७ साधूनांसत्यसंधानां पुत्रत्यागेनसुखापेक्षाकथंस्यात्केति अतआह
विदुषामिति भगवानेवतत्वंनान्यदितिजाननामित्यर्थः ननुस्वयंनीतंकंसोवालंनहन्यादितिमत्वा नीतवानित्ति किंनस्यात् इतिनेत्या

श्रीशुकउवाच सुहृद्वधान्निवर्त्तेकंसः तद्वाक्यसारवित् वसुदेवोपितंप्रीतः प्रशस्यप्राविशद्गृहं ५५
अथकालेउपावृत्तेदेवकीसर्वदेवता पुत्रान्प्रसुषुवेचाष्टौकन्यांचैवानुवत्सरं ५६ कीर्तिमंतंप्रथम
जंकंसायानकदुंदुभिः अर्पयामासकृच्छ्रेणसोनृतादतिविह्वलः ५७ किंदुस्सहंहिसाधूनांविदुषां
किमपेक्षितं किमकार्यंकदर्याणांदुस्सहंकिंधृतात्मनां ५८ दृष्ट्वासमत्वंतच्छौरेः सत्येचैवव्यवस्थि
तं कंसस्तुष्टमनाराजन्प्रहसन्निदमब्रवीत् ५९ कंसउवाच प्रतियातुकुमारोयंनह्यस्मादस्ति
मेभयं अष्टमाद्युवयोर्गर्भान्मृत्युर्मेविहितःकिल ६० तथेतिसुतमादाय ययावानकदुंदुभिः नाभ्य
नंदततद्वाक्यमसतोविजितात्मनः ६१ नंदाद्यायेव्रजेगोपा याश्चामीषांचयोषितः वृष्णयोवसुदे
वाद्यादेवक्याद्यायदुस्त्रियः ६२

ह किमकार्यमिति ननुदेवकीपुत्रंकथंतत्याजेत्यतआह दुस्त्यजमिति चित्तेधृतआत्माहरिर्यैः तेषां ५८ कंसस्यशंकांक्षिदेवकार्येषु
राग्नभवत्वीति नारदस्यप्रयत्नस्यानंतरहनंदाद्याइतित्रयेण ६२

सर्वान्पुत्रादीन्कामयंते येते षांवशाणां श्रेष्ठानां नियंत्री अर्चकानां सर्वान्कामान्वरान्प्रददासि यातां ११ त्वद्विक्रमेणाच तस्य व्य
पदेशो भविष्यंतीत्याह १२ गर्भसंकर्षणादित्यादिना त्वयाशंकत्वेन रामेति संबोधनं करिष्यंति लोकास्परमरमणं वलोच्छ्रया

८

अर्चिष्यंति मनुष्यास्त्वां सर्वकामवरेश्वरीं धूपोपहारबलिभिः सर्वकामवरप्रदां ११ नामधेयानिकु
र्वंति स्थानानि च नराभुवि दुर्गेति भद्रकालीति विजया वैष्णवीति च १२ कुमुदाचंडिका कृष्णा माधवी
कन्यकेति च १३ गर्भसंकर्षणात्तं वै प्राहुः शंकर्षणं भुवि रामेति लोकरमणाद्बलभद्रं बलोच्छ्रयात्
१४ संदिष्टैवं भगवता तथेत्योमिति तद्वचः प्रतिगृह्य परिक्रम्य गां गता तत्तथाकरोत् १५ गर्भे प्रणी
ते देवक्या रोहिणीं देवमायया अहो विस्रंसितो गर्भ इति पौरा विचुक्रुशुः १६ भगवानपि विश्वात्मा भक्ताना लो२
मभयंकरः आविवेशांशभागेन मन आनकदुंदुभेः १७ स बिभ्रत्पौरुषं धाम भ्राजमानो यथा रविः दुरा
सदोतिदुर्धर्षो भूतानां संबभूव ह १८

त् इत्युपास्भात् १४ तथेति पुनरोमिति गेभिस्यादरेण प्रतिगृह्य गां पृथ्वीं गता सती तथैवाकरोत् १५ विस्रंसितो विस्रस्त इत्यर्थ इति
विचुक्रुशुः नतु तद्विदुरित्यर्थः १६ मन आविवेश मनस्याविर्बभूव १७ धाम मूर्त्तिः १८ ॐ नमो भगवते वासुदेवाय ऽऽ छ

अनुरुंधाना अनुवर्त्तमानाः ४ धामकलात देवसप्तमो गर्भो बभूव किंतु धामेत्यत आह यमनंतमिति हर्षशोकविवर्द्धनः आनंदरू
पस्यावतीर्णत्वाद्धर्षः पूर्वगर्भसाधारण्याच्च शोक इति ५ समादिशदाज्ञां दत्तवान् ६ नंदगोकुले किं सास्ते ऽत आह ७ न
केवलं सैव अन्या अपि इति विवरेषु अलक्ष्यस्थानेषु ८ देवक्याजठरे संतं ननु आकृष्यमाणः कथं जीवेदित्यत आह मा
मकं धामेति ततः किमर्थमेव कार्यमित्यत आह अथानंतरमेवेत्यर्थः अंशभागेनेति अंशैः शक्तिभिर्भजते धिंयेतिस ति

तेपीडितानिविविशुः कुरुपांचालकैकयान् शाल्वान्विदर्भान्निषधान्विदेहान्कोशलानपि ३ ए
केतमनुरुंधानाज्ञातयःपर्युपासते हतेषुषट्सुबालेषुदेवक्याऔग्रसेनिना ४ सप्तमोवैष्णवंधा
मयमनंतंप्रचक्षते गर्भोबभूवदेवक्याहर्षशोकविवर्द्धनः ५ भगवानपिविश्वात्माविदित्वाकंसजं
भयं यदूनांनिजनाथानांयोगमायांसमादिशत् ६ गच्छदेविव्रजंभद्रेगोपगोभिरलंकृतं रोहिणी
वसुदेवस्यभार्यास्तेनंदगोकुले ७ अन्याश्चकंससंविग्नाविवरेषुवसंतिहि ८ देवंजठरेगर्भंशेषा क्या॰२
ख्यंधाममामकं तत्सन्निकृष्यरोहिण्याउदरेसन्निवेशय ९ अथाहमंशभागेनदेवक्याःपुत्रतांशुभे
प्राप्स्यामित्वंयशोदायांनंदपत्न्यांभविष्यसि १०

सर्वान् ब्रह्मादिस्तंभपर्यंतानिति अंशभागः तेन परिपूर्णरूपेणेत्यर्थः यद्वा अंशेन ज्ञानैश्वर्यबलादिभिर्भोजयति स्वीयानिति तथा ४
लेनेति यद्वा अंशेन पुरुषरूपेण मायया भागो भजनं ईक्षणं यस्य तेन यद्वा अंशेन मायया गुणावतारादिरूपा भागा भेदा यस्य
तेन यद्वा अंशा एव मत्स्यादिरूपा भजनीयाः नत्वसाक्षात्स्वरूपं यस्य तेन अंशैर्ज्ञानिबलादिभिर्भजनमनुवर्त्तनं भक्तेषु यस्य
तेन सर्वथा परिपूर्णरूपेणेति विवक्षितं कृष्णस्तु भगवान् स्वयमिति ९ तत्त्वदिति तां प्रोत्साहयति यशोदायामिति सार्धचतु

किंचसजीवन्नपिमृतःस्यात्नृसंसितेनक्रौर्येणयोवर्त्तते तंजीवंतमेवमनुजाः वश्यंनिंदुर्वचैर्धिककुर्वंतिनकेवलमेवतावत् सचदेहे
मृतेननुमानिनः पापिनोनरकंगछंति अथवाशापप्रकारमेवाह तन्नुमानिनोस्यदेहेमृतेध्रुवमंधंतमोगमिष्यति २३ संविशन्
शयानः २५ अतिक्रांतंसत्यंव्रतमितिहृष्टाःसत्यत्वेनैवतंप्रपन्नंस्तुवंति सत्यव्रतमिति सत्यंव्रतंसंकल्पोयस्यतंतथासत्यपरंसत्यं
श्रेष्ठंप्राप्तिसाधनंयस्मिंस्तंत्रिसत्यंत्रिषुलोकेषुसृष्टेः पूर्वंप्रलयांतरेचास्थितिसमयेचसत्यं अव्यभिचारेणवर्त्तमानं तदेवाह सत्यस्य
योनिमितिसत्पदेनपृथिव्यप्तेजांसिसत्यशब्देनवाय्वाकाशौएवंसत्चत्यच्च सत्यंभूतपंचकंतत्सत्यमित्याचक्षते इतिश्रुतेस्तस्ययो
निंकारणं अनेनपूर्वंवर्त्तमानतोक्तातथासत्येतस्मिन्नेवनिहितं अंतर्यामितयास्थितं अनेनस्थितिसमयेपिसत्यमुक्तंतथा

सएषजीवन्खलुसंपरेतोवर्त्ततयोलंनृसंसितेन देहेमृतेतंमनुजाःशपंतिगंतातमोंधंतनुमानिनो
ध्रुवं २३ इतिघोरतमाद्भावात्सुनिवृत्तःस्वयंप्रभुः आस्तेप्रतीक्षंस्तुजन्महरेर्वैरानुबंधकृत् २४ आ
सीनःसंविशंस्तिष्ठन्भुंजानःपर्यटन्पिबन् चिंतयानोहृषीकेशंअपश्यंतन्मयंजगत् २५ ब्रह्माभवश्चतत्
त्रैत्यमुनिभिर्नारदादिभिः देवैःसानुचरैःसाकंगीर्भिर्वृषणमैडयन् २६ देवाऊचुः सत्यव्रतंसत्यपरंत्रि
सत्यंसत्यस्ययोनिंनिहितंचसत्ये सत्यस्यसत्यमृतसत्यनेत्रंसत्यात्मकंत्वांशरणंप्रपन्नाः २७

सत्यस्यसत्यंतस्यैवसत्यस्यसत्यंपरमार्थिकंनाशेप्यवशिष्यमानरूपं प्रलयेप्यविघटितेन सत्यंदर्शितं एवंत्रिसत्यत्वमुपपाद्यतंत
था ऋतसत्यनेत्रं ऋतंचसून्तावाणीसत्यंचसमदर्शनंतथाभगवतोव्याख्यास्यमानत्वात्सत्यंचसमदर्शनं ऋतंचसत्यवा
णीकविभिःपरिकीर्त्तितेतितयोःनेत्रंनयनसाधनंनेतारंप्रवर्त्तकमितियावत् एवंसर्वप्रकारेणसत्यात्मकंत्वांभगवन्वयंश
रणंप्रपन्नाःस्मः २७

जगतो मूर्तिं मंगलं अच्युतांशं च्युतिरहितं अंशा शरीरं यदीयो यस्यतं यद्वा अच्युतस्यैवांशो भूक्तनामगुरुहत्यपरिक्रान्तं व पुरिसयथीः समा
हितं सम्यग्भूतमिवाहितं देवकीत यथेषि देवी द्योतमानाशुद्धसत्वे सर्थः सर्वात्मके सर्वात्मानं अत एवात्मभूतं स्वस्मिन्नाशावेव संतं
मनस्तो मनसैव दधार धारयाणगदत्तवती अत्रानुरूपं दृष्टांतमाह यथा काष्ठा प्राचीदिक् आनंदकरं चंद्रं १९ सर्वजगन्निवासस्यापि निवा
वासभूता सत्यपि सुतरां नितरां जनाल्हादका या न रेजे किंतु स्वयमेवानंदमन्वभवत् यतः कंसस्य गेहे रुद्धा अन्यैर्न दृश्यते यथा दिश्च

ततो जगन्मंगलमच्युतांशं समाहितं सूरसुतेन देवकी दधार सर्वात्मकमात्मभूतं काष्ठा यथानंदकरं मनस्तः
१९ सा देवकी सर्वजगन्निवास निवासभूता नितरां न रेजे भोजेंद्रगेहे ग्निशिखेव रुद्धा सरस्वती ज्ञानखल
लेयथा सती २० तां वीक्ष्य कंसः प्रभया जितांतरां विरोचयंती भवनं शुचिस्मितां आहैष मे प्राणहरो हरि
र्गुहां ध्रुवं श्रितो यत्र पुरेयमीदृशी २१ किमद्य तस्मिन्करणीयमाशु मे यदर्थतंत्रो न विहंति पौरुषं स्त्रियाः
स्वसुर्गुरुमत्या वधोयं यशः श्रियं हंत्यनुकालमायुः २२

रुद्धा अग्निशिखादीपईवत् यथासती शोभना सरस्वती ज्ञानखले ज्ञानवंचके रुद्धा यथान्येषामनुपकारिणी न राजते तद्वत् २०
प्रभया भवनं विरोचयंती अजितो कुक्षिमध्ये यस्याः तां एषमविरोचमानो ध्रुवं हरिरेव यतः यस्मात् ईदृशी पूर्वं नासीत् २१
ननु संति सामादय उपाया नेति स्वयमेवाह अयमर्थतंत्रो देवकार्थं प्रधानो विक्रमं न विहंति इति मद्वधे पराक्रमं करिष्ये
त्येवेत्यर्थः यद्यात र्हि इदानीमेव हन्यतामिति विचिंत्याह अर्थतंत्रोपि पुमान्विक्रमं न विहंति न नाशयति स्त्रीवधे तत्रा पि स्या

दिति भावः तदेवाह क्लिश्य इति गुरुमस्यामर्गिथ्याः ३२

भा॰ द॰
१० पू॰

ननुदेवकीपुत्रंमांकथंवर्णयथेतितत्राहुः अवबोधैकस्वरूपआत्मात्वंरूपाणिमूर्त्तीर्विभर्षिधत्सेनत्वंकस्यापिपुत्रइत्यर्थः क्षेमाययया
त्वंनायसतांधर्मवर्त्तिनांसुखकारिणिखलानामभद्राणिनाशकानिनकेवलमेतावत् भक्तानांमोक्षार्थमपीत्याहुः ३० त्वयीसमा
धिना आवेशितचेतसानिमिश्रेनत्वत्पादपोतेमाश्रितेन एकमुख्याविवेकिनः महद्भिःकृतेनसेव्यतयासंपादितेन यद्वाइदमपिमाया
मयमितिसंसारंदपरित्यज्य इदमेवमहत्सर्वोत्कृष्टमितिमनसिकृतेनवहुमतेनेत्यर्थः भवाब्धिंतुच्छंकुर्वंति अनायासेनैवभजनानुसा

10

विभर्षिरूपाण्यववोधआत्माक्षेमायलोकस्यचराचरस्य सत्त्वोपपन्नानिसुखावहानिसतामभ
द्राणिचनाशकानि ३० त्वय्यंवुजाक्षाखिलसत्वधाम्निसमाधिनावेशितचेतसैके त्वत्पादपो
तेनमहत्कृतेनकुर्वंतिगोवत्सपदंभवाब्धिं ३१ स्वयंसमुत्तीर्यसुदुस्तरंद्युमन्भवार्णवंभीरुमद
भ्रसौहृदाः भवत्पदांभोरुहनावमत्रतेनिधाययाताःसदनुग्रहोभवान् ३२

रिणीतेषांमुक्तिरित्यर्थः ३१ ननुपोतेनचेत्पूर्वेपारंगताः तर्हिइदानींतन्नामांकागतिः तत्राहुः अयमर्थः हेद्युमन्स्वप्रकाशत्वत्या
दपोतस्सामीप्यमात्रेणभवांवुधौवत्सपदमात्रेजातेततः तान्निरपेक्षंस्वयमेवान्येषांभीरुंदुस्तरमपिभवार्णवंसमुत्तीर्य भ
वत्पदांभोरुहरूपांनावमत्रैवनिधायभक्तिमार्गसंप्रदायंप्रवर्त्त्येत्यर्थः पारंयाताः ततः किंयतः अदभ्रसौहृदाः सर्वभूतेष्वति
प्रीतियुक्ताः अतःतेषांचरणपनिधायेतिकथंमत्सदाश्रयमात्रेणतीर्णाः अतःउक्तंभवान्सदनुग्रहःसतोभक्तान्अनुग्र

रामः
१०

ननुभवंतोपितल्लोकेष्वस्मत्तुल्याएवलोकादिरूपंचद्वैतंसर्वंत्वद्व्यतिरेकेणनिरूपयंति असौप्रपंचआदिवृक्षः दृश्यतेइतिवृक्षःसमष्टिव्य
देहरूपःकथंभूतःएकायनःएकाप्रकृतिरयनमाश्रयोयस्यसः द्वेसुखदुःखेफलेयस्यसः त्रयोगुणाःमूलानियस्यसः धर्मार्थकाममोक्षाः
चत्वारोरसायस्यसः पंचइंद्रियाणिविधाज्ञानप्रकारोयस्यसः षड्ऊर्मयःकोशावाआत्मानःस्वभावोयस्यसः सप्तधातवःत्वचोयस्यसः
पंचभूतानिमनोबुद्ध्यहंकारश्चेत्यष्टौविटपाः शाखाविस्तारायस्यसः नवद्वाराणिअक्षिछिद्राणियस्यसः दशप्राणादयःछदाःप

एकायनोसौद्विफलस्त्रिमूलःचतूरसःपंचविधःषडात्मा सप्तत्वगष्टविटपोनवाक्षोदश
छदीद्विखगोह्यादिवृक्षः २७ त्वमेकएवास्यसतःप्रसूतिःत्वंसन्निधानंत्वमनुग्रहश्च त्वन्मा
ययासंवृतचेतसस्त्वांपश्यंतिनानानविपश्चितोये २८

त्राणिविद्यंतेयस्यसः दशच्छदी द्वौजीवेश्वरौयस्मिन्सद्विखगः २७ एवंरूपस्यसंसारवृक्षस्यसतःकार्यस्यत्वमेकएवप्रसूतिः
जन्मयस्मात्सकारणंकार्यमित्यर्थः त्वमेवसन्निधानंत्वय्येवसम्यक्निधीयतेस्मिन्संनिधानंलयस्थानंत्वमेवानुग्रहश्चअनुगृह्णा
तीतिपालकइत्यर्थः ननुब्रह्मविष्णुरुद्राःएवंभूताःप्रसिद्धाःकथमहमितिचेत्तत्राह त्वन्माययेति तवमाययासंवृतंपिहितंचेतः
ज्ञानंयेषांतेत्वामेवनानापश्यंति येविपश्चितोविद्वांसःतेतथानपश्यंति २८ ॐनमोनारायणाय ॥ श्रीरामायनमः ५५
… सूक्ष्मशरीरः १८ प्राणापानव्यानसमानउदाननागकूर्मकृकलदेवदत्तधनंजयाः॥१०॥ …

लयँतु ज्ञाद्ले त्यादिनाऽस्नोक्तवाक्ये ण भगवज्ज्ञानामेव मोक्षो नान्येषामित्युक्तं तत्र कर्मफलं भक्तिं विना माभूत् मोक्षस्तु ज्ञानैकसाध्यत्वात्वीं
भक्त्येति साऽनुशयान् प्रत्याहुः सत्त्वं न चेदिति हे धातरिदं सत्त्वं निजं तव वपुर्न भवेत् तर्हि विज्ञानं विशिष्टं अपरोक्षं ज्ञानं न भवेदित्यनुषंगः
कथंभूतं अज्ञानभिदापमार्जनं अज्ञानं च तत्कृतभिदा च तयोरपमार्जनं निवर्तकं यद्वा अज्ञानं भिनत्तीति अज्ञानभित् विज्ञानमा
र्जनं निरसनं आपमाध्य मेवेति ननु जडानां बुद्ध्यादीनां यतः प्रकाशः तद्भूतेति ज्ञानं भवेदेव गुणप्रकाशैः गुणवृत्तिभिः तैः प्रकाशैः
भवान् सर्वसाक्षी पूर्णः केवलमनुमीयते कल्प्यते च तु साक्षात् क्रियत इत्यर्थः अनुमानप्रकारमाह प्रकाशते यस्य च येन वा

सत्त्वं न चेद्धातरिदं निजं भवेद्विज्ञानमज्ञानभिदापमार्जनं गुणप्रकाशैरनुमीयते भवान् प्रकाशते य
स्य येन वा गुणः ३६ न नामरूपे गुणकर्मजन्मभिर्निरूपितव्ये तव तस्य साक्षिणः मनोवचो
भ्यामनुमेयवर्त्मनो देव क्रियायां प्रतियंत्यथापि हि ३७

गुण इति यस्य संबंधी अयं बुद्ध्यादी गुणः प्रकाश्यते यो गुणसाक्षीत्येवं येन वा बुद्ध्यारूढेन प्रमात्रा वा यो गुणः प्रकाशते मनुमी
यते इत्यर्थः सुद्धसत्त्ववपुसि त्वयि सेव्यमाने तदाकारे अंतःकरणे सति त्वत्प्रसादेन त्वत्साक्षात्कारो भवेदिति भावः ३६ एवं
तावज्ज्ञानामभ्युदयाय गार्पस्त्र्याणि विभवी त्युक्तं तान्यपि भजनीयानि केवलं न तु ज्ञातुं शक्यन्ते अनंतत्वात् तर्क्यत्वात् च
मनोवचसोरगोचरत्वादित्याहुः न नामरूपे इति गुणजन्मानि कर्माणि च ते निरूपतव्यो निरूपणार्हे न भवतः कुतः मनुमेये
वर्त्म मार्गो यस्य तवेति तत्रापि हेतुः तस्य साक्षिण इति न हि साक्षिणस्तत्त्वे सतो वचोगोचर इत्यर्थः हे देव व दुधा घोतमाने

यथाविक्रियापामुपाशनादिकायां त्वां प्रविशं सुपासकः सा
क्षात्स्पृशति प्रसिद्धं ३७

येन्येइति विमुक्तमानिनः

विवेकिनां मज्जनेन किंसुखा एव हितेतत्राहुः ये विमुक्ता वयमिति मन्यमानाः त्वयि अस्तो निरस्तो ऽएवासत्यो भावस्तस्मात् भक्तेरभावा दिसर्थः नविशुद्धा बुद्धिर्येषां तेतथा यद्वा त्वय्यस्तभाव इति छेदः अस्तमतु यः वादेषु विशुद्धबुध्यश्च कृच्छ्रेण वकुजन्मत्तपसा परंप दं मोक्षं सन्निहितं सत्कुलतपः श्रुतादि प्राप्य अधः पतंति विघ्नेरभिभूयंते अनादृतो युष्मदंघ्रीयेस्तेत्वदीयास्तुनकदाचित् पतंतीत्याहुः ॥

विनायका विघ्नं

येन्येरविंदाक्ष विमुक्तिमानिनः त्वय्यस्तभावाद विशुद्धबुद्धयः आरुह्य कृच्छ्रेण परं पदं ततः पतंत्यधो नादृतयुष्मदंघ्रयः ३३ तथा न ते माधव तावकाः क्वचिद्भ्रश्यंति मार्गात्त्वयि बद्धसौहृदाः त्वयाभिगुप्ता विचरंति निर्भया विनायकानीकपमूर्द्धसु प्रभो ३४ सत्वं विशुद्धं श्रयते भवान् स्थितौ शरीरिणां श्रेय उपायनं वपुः वेदक्रियायोगतपःसमाधिभिः तवार्हणं येनजनः समीहते ३५

गर

३ हेतवः तेषामनेकानि सैन्यानि तानि यांति एतेषां मूर्द्धसु विचरंति अरिष्टाः जयंतीत्यर्थः सत्वं सुखवहानि निरूपाणि धारय सीत्युक्ते विभर्षि रूपाणीति कैनप्रकारेण सुखावहत्वमित्यपेक्षायामाहुः ३४ सत्वंवपुःश्रयते सत्वं यः श्रेयउपायनं कर्मफ लदातृ कर्पयेन वपुषा जनः तवार्हणं पूजामीहते करोतिकैः वेदश्च क्रियायोगश्च तपश्च समाधिश्च तैः चतुराश्रमधर्मैरित्यर्थः वपुषो नाश्रयेणोर्हणसंभवान कर्मफलसंभवसिद्धिस्यादिति ३५

सत्वंविशुद्धमिति

देवकीं प्रसादयंति दिष्ट्येति नोऽस्माकं भवायोद्भवाय साक्षात्परः पुमांस्ते कुक्षिगतः अतो भयं माभूदिति अन्येषामपि ४१ यस्य रूपमनिदं सर्वप्रसंग
भूतं यथा यथावत् अस्मान्वंचयित्वा एताद्विहस्यास्यत इति मन्यमाना ब्रह्मेशानौ पुरो धाय पुरतः कृत्वा ययुरिति ४३ इति श्रीभावार्थ
दीपिकायां दशमे द्वितीयः २ तृतीये निजरूपेण संभृतस्तु हरिः स्वयं पितृभ्यां संस्तुतो नीतः पित्राभीतेन गोकुलं अथेति ग्रंथतात्पर्य

12

दिष्ट्यांब ते कुक्षिगतः परः पुमानंशेन साक्षाद्भगवान्भवाय नः माभूद्भयं भोजपतेर्मुमूर्षोर्गोप्ता यदूनां भविता
तवात्मजः ४२ श्रीशुक उवाच इत्यभिष्टूय पुरुषं यद्रूपमनिदं यथा ब्रह्मेशानौ पुरोधाय देवाः प्रतिययुर्दिवं
४३ इति श्रीभागवते महापुराणे दशमस्कंधे ब्रह्मस्तुतिर्नाम द्वितीयोऽध्यायः २ श्रीशुक उवाच अथ सर्
वगुणोपेतः कालः परमशोभनः यर्ह्येवाजनजन्मर्क्षं शांतर्क्षग्रहतारकं १ दिशः प्रसेदुर्गगनं निर्मलोडु
गणोदयं महीमंगलभूयिष्ठपुरग्रामव्रजाकरा २

हि यदा सर्वगुणोपेतः कालोऽभूत्तदा देवकी विष्णुराविरासीत् इत्यष्टमश्लोकगतेनान्वयः परमशोभनत्वमेवाह यर्हीत्यादिना अ
जनान्नारायणाज्जन्म यस्य प्रजापतेः तस्यर्क्षं रोहिणीनक्षत्रं कथंभूतं शांतानि ऋक्षाणि अश्विन्यादीनि ग्रहाश्च तारकाश्च य
स्मिन्तत् यर्हीति सर्वत्रानुसज्यते १ निर्मलानामुडुगणानामुदयो यस्मिंस्तत् तथा मंगलभूयिष्ठा पुरादयो यस्यां सा २

तस्मात् भक्त्यैव मोक्ष इत्युपसंहरति शृण्वन्निति अन्यानपि संस्मरयन् क्रियासु देवार्चनादिकर्मसु ३८ विशेषतः श्रीकृष्णावतारम
भिनंदंति दिष्ट्येति दिष्ट्या भवतः तव पदः पदाभूतायाः ईश्वरस्य तव तस्य मात्रेणापनीत एव त्वत्पदकैः कोमलैः पदैः सुशोभनैः वज्रां
कुशादिशुभलक्षणैः गां पृथ्वीं द्यां दिवं च तव त्वयानुकंपितां अनुगृहीतां ३९ तव जन्मना भारोपनीत इत्युक्तं प्रामयापि किं जीवन्संसार

शृण्वन्गृणन्संस्मरयंश्च चिंतयन्नामानि रूपाणि च मंगलानि ते क्रियासु यस्त्वच्चरणारविंदयोराविष्टचेतो
न भवाय कल्पते ३८ दिष्ट्या हरेस्या भवतः पदो भुवो भारोपनीतः तव जन्मनेशितुः दिष्ट्यांकितां त्वत्पद
कैः सुशोभनैः द्रक्ष्याम गां द्यां च तवानुकंपितां ३९ न तेभवस्येश भवस्य कारणं विनाविनोदं बत तर्कया
महे भवो निरोधः स्थितिरप्यविद्यया कृता यतस्त्वय्यभयाश्रयात्मनि ४० मत्स्याश्वकछपवराहनृ सिं
हहंसराजन्यविप्रविबुधेषु कृतावतारः। त्वं पासि नः त्रिभुवनं च यथापरेश भारं भुवो हर यदूत्तम वंदनं ते

५

उक्तः नद्धिनहीत्याहुः न इति च न हे ईश संसारिणस्ते जन्मनः कारणं विनोदं क्रीडां विना न तर्कयामः किंच हे अभयाश्रय न भयमा
श्रयते इति तया तत्संबोधनं हेति त्वयुक्तं स्पर्थः तव जन्मकारणं नास्तीति किंच कार्यं यतो जीवात्मन्यपि भवादयः त्वयि विषये याअ
विद्यातयाकृताः न परमार्थतः संति ४० अस्तु ते प्रार्थयंते मत्स्याश्वेति नोऽस्मान् त्रिभुवनं च अन्यदयथा पाशितया अधुनापाहि
ति वंदनं ते इति वदंतः सर्वे शिरोभिः प्रणमंति ४१

भा॰द॰ परिष्वक्तसहस्रकुंतलं।किरीटकुंडलादीनां।त्विषा स्फुरद्भिः परभिन्नकेशैरित्यर्थः १० विस्मयेन उत्फुल्ले विकसिते लोचने यस्य सः गवामयुतं अ
१३ पृ॰ स्पृशात् मनसा दत्तवान् कंसनिगृहीतस्य दानासंभवात् स्पर्शे हेतुः कृष्णावतारे ऽतिमुदा आप्लुतो व्याप्तः स्नात इति वा ११ कृतधीः

13

महार्हवैडूर्यकिरीटकुंडलत्विषा परिष्वक्तसहस्रकुंतलं उद्दामकांच्यंगदकंकणादिभिर्विरोचमानं वसु
देव ऐक्षत १० स विस्मयोत्फुल्लविलोचनो हरिं सुतं विलोक्यानकदुंदुभिस्तदा कृष्णावतारोत्सवसंभ्र
मो ऽस्पृशन्मुदा द्विजेभ्यो ऽयुतमाप्लुतो गवां ११ अथैनमस्तौदवधार्य पूरुषं परं नतांगः कृतधीः कृतांज
लिः स्वरोचिषा भारत सूतिकागृहं विरोचयंतं गतभीः प्रभाववित् १२ वसुदेव उ॰ विदितो ऽसि भवान्
साक्षात्पुरुषः प्रकृतेः परः केवलानुभवानंदस्वरूपः सर्वबुद्धिदृक् १३

मुबुद्धिः १२ अथ परं पुत्रं बुद्ध्या ऽपश्यत् तां परिसृज्याह अहो विदितो ऽसीति कथं विदितो ऽसि भवान् प्रकृतेः परः पुरुष इति ननु कि
मत्राश्चर्यं पुरुषस्य प्रकृतेरन्यत्वादेवेत्यत आह साक्षात्प्रत्यक्षत इत्यर्थः ननु अस्त साक्षित्वेन प्रकाशेत उपलभ्यते किंचिन्मिलतःश्रा रामः
ए केवलेति केवलश्चासावनुभवश्च आनंदश्च तदेव स्वरूपं यस्य सः किंच सर्वबुद्धिरदृक् न ह्येवंस्तत्तो दृश्यो भवतीत्यर्थः १३ १३

जलरुहैः श्रीः शोभा येषां ते द्विजालिकुलानां सन्नादा येषु ते स्तवकाया सुताः ३ समिंधत अद्रागमोद्ध्वंयः समैंधते तिसम्यक् दीप्ता
वभूवुरित्यर्थः ४ असुरद्रुहां कंसादिव्यतिरिक्तानां सर्वप्राणिनां देवतानां चेति अजने जायमाने अप्रसन्नः प्रसन्नोयस्मिन् तस्मिन् सम

नद्यः प्रसन्नसलिला ह्रदा जलरुहश्रियः द्विजालिकुलसन्नादस्तवका वनराजयः २ ववौ वायुः सुखस्पर्शः
पुण्यगंधवहः शुचिः अग्नयश्च द्विजातीनां शांताः तत्र समिंधत ४ मनांस्यासन्प्रसन्नानि साधूनामसुर
द्रुहां जायमाने जने तस्मिन्नेदुर्दुंदुभयो दिवि ५ जगुः किन्नरगंधर्वास्तुष्टुवुः सिद्धचारणाः विद्याधराश्च
ननृतुरप्सरोभिः समंतदा ६ मुमुचुर्मुनयो देवाः सुमनांसि मुदान्विताः मंदं मंदं जलधरा जगर्जुरनुसागरं
७ निशीथे तमसोद्भूते जायमाने जनार्दने देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयः ८ आविरासीद्यथा
प्राच्यां दिशींदुरिव पुष्कलः ८ तमद्भुतं बालकमंबुजेक्षणं चतुर्भुजं शंखगदाद्युदायुधं श्रीवत्सलक्ष्मंगल
शोभिकौस्तुभं पीतांबरं सांद्रपयोदसौभगं ९

ये ५ तमसा उद्भूते घनतमसि निशीथे अर्धरात्रे ७ यथा यथावत् ऐश्वरेणैव रूपेणैव रूपेण विष्णुराविरासीत् प्रकटीबभूव प्राच्यां दिशि
पूर्णचंद्रवत् ८ तमद्भुतं बालकमंबुजेक्षणं वसुदेव ऐक्षतेति द्वितीयश्लोकेनान्वयः अद्भुतत्वे हेतुगर्भाणि विशेषणानि अंबुजेक्षण
मित्यादीनि श्रीवत्सो लक्ष्म यस्य गले शोभते गलशोभी कौस्तुभो यस्मिन् ९ ॐनमः परमात्मने ऽऽ ऽऽ ऽऽ ऽऽ

भा॰द दार्ष्टांतिके दर्शयति एवंभवानिति ननु यद्यहमप्रच्युतस्वरूप एव कारणत्वया कार्यविष्टो इति तर्हि इंद्रियैः गृह्यमाणोस्मि मम ग्रहणं किं नास्ति तत्राह बु
पू॰१४ द्ध्यानुमीयते लक्षणं यस्य इति बुद्ध्या रूपादिज्ञानेनानुमेयं लक्षणं स्वरूपं यस्य सः तैरिंद्रियैर्ग्राह्यैर्गुणैः सह सन्नपि वर्तमानोपि तद्गुणाग्रहः अग्रहः तैः
गुणैः सह न गृह्यसे अयंभावः नहि ग्राह्यैः सहभावमात्रं ग्रहणे कारणं किंत्विंद्रियाणां शक्तिः सा च कार्ये समधिगम्या यथा कार्यमेव कल्प्यते
अतो यथा चक्षुषा रूपग्रहणेन रसादिग्रहणं वास्ति तथैव विषयग्रहणेन हि सुसूक्ष्मामेव सर्वबुद्धिदृशिं सज्ञेव तावत् प्रागेव विद्यमा
नत्वान्प्रवेशो नास्तीत्युक्तं किंच परिच्छिन्नस्य नीडे पक्ष्यादेरिव प्रवेशो भवेत् न च त्वं नावृतत्वादयं परिच्छिन्नत्वेन बहिरंतरं तरभेदो ना

15

एवंभवान्बुद्ध्यनुमेयलक्षणो ग्राह्यैर्गुणैः सन्नपि तद्गुणाग्रहः अनावृतत्वाद्बहिरंतरं न ते सर्वस्य सर्वात्मन आ
त्मवस्तुनः ७

स्ति कुतः प्रवेश इत्याह अनावृतत्वादिति अनावृतत्वे हेतुमाह सर्वस्येति नहि सर्वस्वरूपस्यान्यदावरकमस्ति सर्वात्मनो न ह्येको
नावृतोन्यस्यात्मा भवेत् आत्मवस्तुन इति आत्मनो वस्तुनोस्येति हेतुद्वयं अत सातत्यगमने इस्मात् अतति व्याप्नोत्यात्मा
न हि व्यापकस्यावरणं घटते तथा च वस्तुनः परमार्थस्य वस्तुनः आवरणं न घटते सर्वथाः तस्मान्न च अंतर्यामितया प्रवेशो न तु रामः
स्वयोस्ति कुलस्त्रीणां गर्भे प्रवेशः अतः केवलानुभवानंदस्वरूप एव त्वं विदितोसीत्याश्चर्ये मम भाग्यमित्यर्थः ७ श्रीरामोजयः १४

मिन्नात्वा४

ननु देवकीजठरे प्रविष्टस्य किमियमतिस्तुतिः क्रियते अत आह स एवेति स एवोक्तस्वरूप एव त्वं न देवकीजठरे प्रविष्ट इत्यर्थः ननु विश्वं सृष्ट्वा तदनु प्रविष्टस्य किमेतदत आह स्वप्रकृत्येति स्वमायया सृष्ट्वा तदनु त्वमप्रविष्ट एवेति ननु कथं तर्हि श्रुत्योच्यते तत्सृष्ट्वा तदेवानुप्राविशदिति अत आह प्रविष्ट इव भाव्यसे निरूप्यसे प्रत्यक्तत्तो वा सद्रूपेण प्रविष्ट इव लक्ष्यसे तत्र दृष्टान्तमाह १५ इमे विकृता भावा महदादयो यथा तथेति स दृष्टान्तं विवृणोति ते विकृतैरिति तैर्विकृतैः षोडशविकारैः सह सन्निपत्य विराजं सन्निपातने हेतु मे ब्रह्माण्डं जनयंति १

स एव स्वप्रकृत्येदं सृष्ट्वाग्रे त्रिगुणात्मकं तदनु त्वं ह्यप्रविष्टः प्रविष्ट इव भाव्यसे १४ यथेमेऽविकृता भावा स्तथा ते विकृतैः सह नानावीर्याः पृथग्भूता विराजं जनयंति हि १५ सन्निपत्य समुत्पाद्य दृश्यंतेऽनुगता इव प्रागेव विद्यमानत्वान्न तेषामिह संभवः १६

तः पृथग्भूताः संतो नानावीर्या विशिष्टकार्यासमर्था न भवंति अतः १५ सन्निपत्येति एवं सन्निपत्य समुत्पाद्य अनुगताः प्रविष्टा इव दृश्यंते न पुनः प्रविष्टः कुतः उत्पत्तेः प्रागेव कारणतया विद्यमानत्वात् न तेषामिह सृष्टौ कार्ये पश्चात्संभवः प्रवेश इति वा ननु तेषां कार्ये प्रवेशाः कथं कल्प्यते कार्ये चेदेवाभिनवास्ते तत्र जायन्त इति किं न स्यादिति चेत्तत्राह प्रागेवेति कार्योत्पत्तेः प्रागेव तेषां भूतानामिह कार्ये संभवः १६

भा·द· एवंभूतस्यैव तव यथा विश्वस्थितिसर्गलयार्थं त्रिवर्णा गुणावतारः एवं भूभारापनयनार्थमिदं तिशानमित्याह त्वमिति श्लोकद्वयेन २०
१५पू· रक्षितुमिच्छु अवतीर्णोसि कृष्णेन वर्णेन अतः साधूनां रक्षणार्थं राजन्यसंज्ञा ये असुरकोटियूथपाः तैर्निर्व्यूह्यमानाः इतस्ततः चा

15

म२

सत्वं त्रिलोकस्थितये स्वमायया बिभर्षि शुक्लं खलु वर्णमात्मनः सर्गाय रक्तं रजसोपबृंहितं कृष्णं च वर्णं तम
साजनात्यये २० त्वमस्य लोकस्य विभो रिरक्षिषुर्गृहेवतीर्णोसि ममाखिलेश्वर राजन्यसंज्ञासुरकोटियूथपैर्निर्व्यू
ह्यमाना निहनिष्यसे चमूः २१ अयं त्वसभ्यस्तव जन्म नौ गृहे श्रुत्वाग्रजांस्ते न्यवधीत्सुरेश्वर सतेवतारं पुरुषैः समर्पि
तं श्रुत्वाधुनैवाभिसरत्युदायुधः २२ शुक उवाच अथैनमात्मजं वीक्ष्य महापुरुषलक्षणं देवकी तमुपाधा
वत्कंसाद्भीता शुचिस्मिता २३

त्यमानाः चमूः सेनाः निहनिष्यसे संहरिष्यसि २१ किंतु तथाप्यप्रमत्तेन त्वया भाव्यमित्याह अयं त्विति असभ्यः खलः समर्पितं कथि राम:
तं अभिसरिता गमिष्यति २२ उपाधावत् अस्तौत् २३ १५

नत्वेतद्धेतुचतुष्टयं पंचस्यावस्तुत्वे घटेत तत्तु न संभवति सत्यत्वेन प्रतीतेरित्याशंक्याह आत्मनो दृश्येषु गुणेषु देहादिषु व्यतिरेकतः अ
आत्मव्यतिरेकेण पृथक् सन्नयं देहादिरिति व्यवस्यते निश्चिनोति यः पुमान् स अबुधः अविद्वान् व्यतिरेकादर्शनात् किंच मनीषि
तं विचारितं तत्संदेहादि सर्वं यतः विनानुवादं वाचारंभणमात्रं विनासम्यक् न भवति अतो वस्तुतो नास्य बाधितमेव वस्तु पुनरुपाददत्

य आत्मनो दृश्यगुणेषु सन्निति व्यवस्यते स्वव्यतिरेकतोऽबुधः विनानुवादं न च तन्मनीषितं सम्यग्यतस्त्यक्तमु
पाददत्पुमान् १८ त्वत्तोऽस्य जन्मस्थितिसंयमान्विभो वदंत्यनीहादगुणादविक्रियात् त्वयीश्वरे ब्रह्मणि नो विरुध्यते
त्वदाश्रयत्वादुपचर्यते गुणैः १९

स्वीकुर्वन् अबुध इत्यर्थः १८ एवं परमेश्वरदृश्ययोर्व्यतिरेकेण सत्त्वमुक्तं परमेश्वरोपादानत्वादपि तद्व्यतिरेकेण सत्त्वमित्याह —
न चैवं सत्यपि विकारित्वमित्याह अनीहादिति अगुणत्वादनीहत्वं ततोऽविकारित्वमित्यर्थः नन्वनीहत्वे कार्यं कथं चेत् कर्तृत्वे
वा कुतोऽविकारित्वमिह ब्रह्मत्वादविकारित्वमीश्वरत्वात्कर्तृत्वं चेति ननु एतदपि विरुद्धमेव नेत्याह त्वदाश्रयत्वादिति गुणैः कुर्व
द्भिः त्वयि सृष्ट्यादिकर्तृत्वमुपचर्यते गुणाश्रयत्वात् यथा भृत्यकृतं राजनीति १९

भा॰ द॰ किंच महाप्रलयेप्यवशिष्यमाणस्य कुतो लय इत्याह नष्ट इति लोके चराचरेषु महाभूतेषु लीनेषु तेष्वपि आदिभूतं भूतस्य सूक्ष्मं तस्मिन्न
१६ पू॰ पि व्यक्तोऽव्यक्तं प्रधानं प्राप्ते अशेषात्मके प्रधाने संज्ञा यस्य एवमपि लीनमिदमस्ती दुर्वेदनीयमिति सन्न शेषस्ततः शेषसंज्ञमिति वा किंच
एवं प्रलयहेतुर्योयं कालः हे अव्यक्त बंधो प्रकृति प्रवर्तक तस्य प्रलयावधिभूतस्य ते तव चेष्टां लीलां चेष्टतो विपरिवर्तते पुनः पुनर्दिव्या

16

नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यते शेषसंज्ञः २५
योऽयं कालः तस्य तेऽव्यक्तबंधो चेष्टामाहुश्चेष्टते येन विश्वं निमेषादिर्वत्सरान्तो महीयांस्तं त्वेशानं क्षेमधाम प्रपद्ये
२६ मर्त्यो मृत्युव्यालभीतः पलायन्सर्वाँल्लोकान्निर्भयं नाध्यगच्छत् त्वत्पादाब्जं प्राप्य यदृच्छयाद्य स्वस्थः शेते मृत्यु
रस्मादपैति २७ स त्वं घोरादुग्रसेनात्मजान्नस्त्राहि त्रस्तान्भृत्यवित्रासहासि रूपं चेदं पौरुषं ध्यानधिष्ण्यं मा प्रत्य
क्षं मांसदृशां कृषीष्ठाः २८

वत्सरान्तो महीयान् द्विपरार्धरूपाः यस्य तस्य चेष्टामाहुः तं त्वां क्षेमधाम अभयस्थानं प्रपद्ये शरणं व्रजे २६ क्षेमधामत्वमेवाह मर्त्य इति लोकान्
पर्यटन् निर्भयं परं प्राप्य यदृच्छया केनापि भाग्योदयेन हे आद्य प्रस्तुतं विज्ञापयितुं विज्ञापयामि स त्वमिति २७ भृत्यानां वित्रासं हंतीति भृ राम:
त्यवित्रासहा इति वा छेदः पौरुषं ऐश्वरं ध्यानधिष्ण्यं ध्यानास्पदं मांसचक्षुषां प्रत्यक्षं मा कृथाः २८ ॐ नमो भगवते वासुदेवाय छ: ऽऽ ग १६

त्वयि भवशंकैव नास्तीति श्लोकचतुष्टयेनाह देवकी किंचिद्विज्ञापयितुं रूपमिति यत्तत्किमपि रूपं वस्तु प्राहुर्वेदाः किं तद्वस्तु तदाह
अव्यक्तं अत्र हेतुः आद्यं कारणं किं परमाणवः न ब्रह्म बृहत् किं प्रधानं ज्योतिः चेतनं किं वैशेषिकाणामिव ज्ञानगुणं निर्गुणं किं मीमां
सकानामिव ज्ञानपरिणामि न निर्विकारं किं पुस्कलादीनामिव शक्तिविक्षेपेण परिणामि न सत्तामात्रं तर्हि किं सामान्यं न निर्विशेषं तर्हि
किं कारणत्वात्सक्रियं न निरीहं सन्निधानमात्रेण कारणं एवंभूतं किमपि कार्यकाल्पं पदवस्तु स एव त्वं साक्षाद्विष्णुरिति अपरोक्षेण

रूपं यत्तत्प्राहुरव्यक्तमाद्यं ब्रह्म ज्योतिर्निर्गुणं निर्विकारं सत्तामात्रं निर्विशेषं निरीहं स त्वं साक्षाद्विष्णुरध्या
त्मदीपः २४

ह अध्यात्मदीप इति बुध्यादिकरणसंघातेर्मनादीत्यर्थः तथा ब्रह्म ज्योतिर्निर्गुणं निर्विकारमिति चतुर्भिः पदैर्देशेन प्रकाशे
न च गुणेन च विकारेण च व्यक्तिं निराकरोति तथा सत्तामात्रमिति विशेषेण निर्विशेषमिति सामान्येन निरीहमिति क्रियया च
व्यक्तिं निराकरोति अध्यात्मसमानं एवंभूतस्य तव न भयशंकेति भावः २४ अथवा अव्यक्तं न केनापि प्रकारेण व्यज्यते इत्यव्यक्तं क
थमुक्तं तावत् व्यज्यते इत्याह आद्यं सर्वस्य कार्यस्य आद्य १ त्रुटिटीका

भा० द० तप्यतोः तपआचरतोः ईयुर्गतानि मदात्मनोः मच्चित्तयोः ३६ अमुना वपुषा प्रादुर्भूतोस्मि ३७ वरदराट् वरदेषु श्रेष्ठः इत्यर्थः तेनस
१७ पू० स्व वरेश्य वारंवारमाविर्भावे कारणमुक्तं कामस्य दित्सया दातुमिच्छया मादृशो मत्सदृशः ३८ नेमनोपि युवां अपवर्गं न चव्राथेन

17

एवं वां तप्यतोः तीव्रं तपः परमदुष्करं दिव्यवर्षसहस्राणि द्वादशेयुर्मदात्मनोः ३६ तदा वां परितुष्टोहममु
ना वपुषानघे तपसा श्रद्धया नित्यं भक्त्या च हृदि भावितः ३७ प्रादुरासं वरदराट् युवयोः कामदित्सया
व्रियतां वर इत्युक्ते मादृशो वां वृतः सुतः ३८ अजुष्टग्राम्यविषयावनपत्यौ च दंपती न वव्राथेपवर्गं मे
मोहितौ मम मायया ३९ गते मयि वरं दत्वा युवां मत्सदृशं सुतं ग्राम्यान् भोगानभुंजाथां युवां प्राप्तमनो
रथौ ४० अदृष्ट्वान्यतमं लोके शीलौदार्यगुणैः समं अहं सुतो वामभवं पृश्निगर्भ इति श्रुतः ४१ तयो
र्वां पुनरेवाहमदित्यामास कश्यपात् उपेंद्र इति विख्यातो वामनत्वाच्च वामनः ४२ तृतीयेस्मिन्भवेहं वै तेनै
व वपुषा युवां जातो भूयस्तयोरेव सत्यं मे व्याहृतं सति ४३

वृतवंतौ ३९ वरं दत्वा मयि गते सति ग्राम्यान् विषयान् भुक्तवंतौ ४० अदित्यां कश्यपाद्वामन आसेति यत्तदपि तद्रूपयोरहमेव पु राम:
पुनरासमित्यर्थः ४१ हे सति पतिव्रते ४२ १७

भवतोहेतोर्निमित्तभूतात् कंसादुद्विजे बिभेमि यतः अधीरचित्ता २९ ननुकिमितिमुक्तौपसंहर्त्तव्यंरूपमीदृशं एवंभूतस्याद्भुतरूपेण मयातव
पुत्रेणमहती श्लाघास्यादिति तत्राह विश्वमिति निशांते प्रलयावसाने यथावकासं असंकोचनः असंभावितत्वादुपहास्यतैवस्यादित्यर्थः

जन्मतेमय्यसौपापोमाविद्यान्मधुसूदन समुद्विजेभवद्धेतोःकंसादहमधीरधीः २९ उपसंहरविश्वात्मन्नदोरू
पमलौकिकं शंखचक्रगदापद्मश्रियाजुष्टंचतुर्भुजं ३० विश्वंयदेतत्स्वतनौनिशांते यथावकासंपुरुषःपरोभ
वान् बिभर्त्तिसोयंममगर्भगोभूदहोनृलोकस्यविडंबनंहितत् ३१ श्रीभगवानुवाच त्वमेवपूर्वसर्गेभूः पृश्निः
स्वायंभुवेसति तदायंसुतपानामप्रजापतिरकल्मषः ३२ युवांवैब्रह्मणादिष्टौप्रजासर्गेयदाततः सन्नियम्यें
द्रियग्रामंतेपाथेपरमंतपः ३३ वर्षवातातपहिमकालधर्मगुणाननु सहमानौश्वासरोधविनिर्धूतमनोमलौ
३४ शीर्णपर्णानिलाहारावुपशांतेनचेतसा मत्तःकामानभीप्संतौमदाराधनमीहतुः ३५

३१ चतुर्भुजरूपेणाविर्भावेकारणंतावदाहत्वमेवेत्यादिचतुर्दशभिः त्वंपूर्वसर्गेप्रथमजन्मनिअभूरासीः पृश्निर्नामस्वायंभुवेमन्वं
तरेअयंवसुदेवः सुतपानामब्रह्मणःपुत्रआसीत् ३२ तेपातेतपःकृतवंतौ ३३ ३४ ३५

भा॰ द॰ दुरत्ययाद्वारः स्वयमेव व्यशीर्यंतेति वक्तव्ये शुनश्छंदशः रवेः निमित्तात् ४८ गांभीरोयस्तोयौघस्तस्य जवेन वेगेन ये ऊर्मयः तैः फेनिलः फेनवा
१८ पू॰ न्‌ः भयानकैः आवर्तशतैर्व्याप्ताः श्रियः पतेः सीतापतेः सिंधुः समुद्र इव ४९ निद्रयाऽजया निमित्तभूतया ५० प्रतिमुच्य बद्ध्वा पदौ, पाद

ताः कृष्णवाहे वसुदेव आगते स्वयं व्यशीर्यंत यथा तमो रवेः ववर्ष पर्जन्य उपांशुगर्जितः शेषोऽन्वगाद्वारि निवार
18 यन् फणैः ४८ मघोनि वर्षत्यसकृद्यमानुजा गंभीरतोयौघजवोर्मिफेनिला भयानकावर्तशताकुला नदी मा
र्गं ददौ सिंधुरिव श्रियः पतेः ४९ नंदव्रजं शौरिरुपेत्य तत्र तान् गोपान्प्रसुप्तानुपलभ्य निद्रया सुतं यशोदा
शयने निधाय सुतामुपादाय पुनर्गृहानगात् ५० देवक्याः शयने न्यस्य वसुदेवोऽथ दारिकां प्रतिमुच्य पदोर्लो
हमास्ते पूर्ववदावृतः ५१ यशोदा नंदपत्नी च जातं परमबुध्यत न तद्भेदं परिश्रांता निद्रयापगतस्मृतिः ५२
इति श्रीभागवते महापुराणे दशमस्कंधे तृतीयोऽध्यायः ३ श्रीशुक उ॰ बहिरंतःपुरद्वारः सर्वाः पूर्ववदावृताः ततो
बालध्वनिं श्रुत्वा गृहपालाः समुत्थिताः १

योः लोहं निगडमास्ते स्म ५१ जातं किंचिदिति केवलमबुध्यत तत्तु पुत्रः कन्या वेति योगनिद्रया मोहितेति ५२ इति भावार्थदीपिका रामः
यां दशमस्कंधे तृतीयोऽध्यायः ३ चतुर्थे चंडिकावाक्यमाकर्ण्येति भयाकुलः दुर्मंत्रिभिर्हितं मेने कंसो बालादिहिंसनं १ १८

प्राक् प्रथमं तावदेव तद्रूपं मे जन्मेति स्मरणाय ज्ञानाय दर्शितं अन्यथा मर्त्यलिंगेन मनुष्यशरीरेण मद्भावं मद्विषयं ज्ञानं जन्यते अनंतरं त्विच्छया बालोपि भविष्यामीति भावः ४४ ननु त्वयि प्रसन्नेपि कथं भावयोः पुनर्जन्मेति अतःपरं न भविष्यतीत्याह युवामिति ४५ यदि कंसाद्बिभेषि तर्हि मां गोकुलं नय यशोदापार्श्वे कन्यां महामायामानयेति स्वप्नमेव भगवता प्रणोदितः प्रचोदितो बहिर्गंतुमैछत् तर्हि प्रजैव यायोगमाया सानंदजायया निमित्तमात्रभूतया अजनिजाता प्रबोधित इति वा पाठः ४६ हताः प्रत्ययाः सर्ववृत्तयो येषां

एतन्मे दर्शितं रूपं प्राग्जन्मस्मरणाय मे नान्यथा मद्भवं ज्ञानं मर्त्यलिंगेन जन्यते ४४ युवां मां पुत्रभावेन ब्रह्मभावेन चासकृत् चिंतयंतौ कृतस्नेहौ यास्येथे मद्गतिं परां ४५ शुक उवाच इत्युक्त्वासीद्धरिस्तूष्णीं भगवानात्ममायया पित्रोः संपश्यतोः सद्यो बभूव प्राकृतः शिशुः ४६ ततश्च शौरिर्भगवत्प्रचोदितः सुतं समादाय स सूतिकागृहात् यदा बहिर्गंतुमियेष तर्ह्यजा या योगमायाजनि नंदजायया ४७ तया हृतप्रत्ययसर्ववृत्तिषु द्वास्थेषु पौरेष्वपि शायितेष्वथ द्वारश्च सर्वाः पिहिता दुरत्यया बृहत्कपाटायसकीलशृंखलैः ४८

येषां अपवाहहृतः प्रत्यया अन्याश्च सर्ववृत्तयो येषां जाग्रतामपि तथाभूतेषु द्वारपालेषु लोहकीलयुक्तैः शृंखलैर्बृहद्भिः कपाटादिभिर्दुरत्यया इति वा ४८

भा० द० वहुमाननिकेतने बुवाराणस्यादिस्थानेषु वहुनामादुर्गाकामाक्षीत्यादि १३ परमविस्मितः कथंदेवीवागन्यथाजातेति १४ हेभाम भगि
९९ पृ० नीभर्तः पुरुषादोराक्षसोयथास्वापत्यमेवहिनस्तितद्वत् १५ जीवन्नपिमृतोहं १६ हेमहाभागौस्वकृतंभुजः स्वारब्धकर्मभोक्तृत्वकिं
चजंतवः प्राणिनःसदैकत्रनासतेकिंतुअल्पकालमेवतत्राप्येकत्रनासतेकिंतुवियुज्यंतेयतोदैवाधीनाः १८ सहानासत इत्यनेनयदुक्तं

19 शुकउवाच इतिप्रभाष्यतंदेवीमायाभगवतीभुवि बहुनामनिकेतेषुबहुनामाबभूवह १३ तयाभिहितमाकर्ण्य
कंसःपरमविस्मितः देवकींवसुदेवंचविमुच्यप्रश्रितोब्रवीत् १४ कंसउवाच अहोभगिन्यहोभाममयावांब
तपाप्मना पुरुषादइवापत्यंबहवोहिंसिताःसुताः १५ सत्वहंत्यक्तकारुण्यःत्यक्तज्ञातिःसुहृत्खलः कांल्लो
कान्वैगमिष्यामिब्रह्महेवमृतःश्वसन् १६ दैवमप्यनृतंवक्तिनमर्त्याएवकेवलं यद्विस्रंभादहंपापःस्वसुर्निहत
वान्शिशून् १७ माशोचतंमहाभागौआत्मजान्स्वकृतंभुजः जंतवोनसदैकत्रदैवाधीनाःसदासते १८ भु
विभौमानिभूतानियथायांत्यपयांतिच नायमात्मातथैतेषुविपर्येतियथैवभूः १९

जन्ममरणंतदपिदेहानामेवनात्मनइत्याह भूतानिदेहाएवयांति अपयांतिचभवंतिचेत्यर्थः यथाभुविभौमानिघटादीनितद्वदेतेषु
भूतेषुजन्मादिभिर्विक्रियमाणेष्वपिअयमपरोक्षतया प्रसज्ञायमानोनात्माविपर्येति विपर्ययंविक्रियांनप्राप्नोति एकरूपएववर्त्त राम:
तइत्यर्थः भौमेषुविक्रियमाणेषुयथाभूः तथेति एवंविचार्यमाणेसति नशोकः अज्ञानतस्तुननिवर्त्ततइत्याह १९ ऽऽ ऽऽ १९

ततोऽष्टमस्यजन्म २ कालोमृत्युः ३ अंगहेभ्रातः ६ दीनदीनवत्दीनादपिदीनकात् तथापुत्रस्यान्यत्रनीतत्वात्साचयोगमायेतिज्ञानत्वात् या

तेतुतूर्णमुपव्रज्यदेवक्यागर्भजन्मतत् आचख्युर्भोजराजाययदुद्विग्नःप्रतीक्षते २ सतल्पात्तूर्णमुत्थायका
लोयमितिविह्वलः सूतगृहमगाच्छीघ्रंप्रस्खलन्मुक्तमूर्द्धजः ३ तमाहभ्रातरंदेवीकृपणाकरुणंसति स्नुषेयंतव
कल्याणस्त्रियंमाहंतुमर्हसि ४ वहवोहिंसिताभ्रातःशिशवःपावकोपमाः त्वयादेवनिसृष्टेनपुत्रिकैकाप्रदीयतां ५
नन्वहंतेह्यवरजादीनाहतसुताप्रभो दातुमर्हसिमंदायाअंगेमांचरमांप्रजां ६ शुकउवाच उपगुह्यात्मजामेवंरुदं
त्यादीनदीनवत् याचितस्तांविनिर्भर्त्स्यहस्तादाचिच्छिदेखलः ७ तांगृहीत्वाचरणयोर्जातमात्रांस्वसुःसुतां अपोथ
यच्छिलापृष्ठेस्वार्थोन्मूलितसौहृदः ८ सातद्धस्तात्समुत्पत्यसद्योदेव्यंवरंगता अदृश्यतानुजाविष्णोःसायुधाष्टमहा
भुजा ९ दिव्यस्रगंवरालेपरत्नाभरणभूषिता धनुःशूलेषुचर्मासिशंखचक्रगदाधराः १० सिद्धचारणगंधर्वै
रप्सरःकिन्नरोरगैः उपाहृतोरुवलिभिःस्तूयमानेदमब्रवीत् ११ किंमयाहतयामंदजातःखलुतवांतकृत् यत्र
क्वचित्पूर्वशत्रुर्माहिंसीःकृपणान्वृथा १२

याचितोप्याचिच्छिदेआकृष्यजग्राह ७ अपोथयत्वल्नेनचिक्षेप ८ सद्यएवदेवीभूत्वा ९ कृपणानिरपराधान्शिशून्हनिष्यतीतिज्ञा
त्वावारयतिपाठांतरेतुमामांकृपणांहिंसीः हिंसितवानसिइति ११ १२

स्वपरेति भेददर्शनं किं भवति तदाह २६ भावैरेव निमित्तभूतैर्मिथो भावा द्वंद्वं भावमेश्वरं पृथग्दृशस्तेन पश्यंति किं त्विहमेवाहं नाहं त्वमे
ति मन्यते इत्यर्थः २७ कुदंधप्पा भवति तथा २८ तानि कोविदा देहमात्रमतयः ३० ननि गतानि दर्शादिनानि येषां तान् अ

20

भ्रातुः समनुतप्तस्य क्षांतरोषा च देवकी व्यसृजद्वसुदेवश्च प्रहस्य तमुवाच ह २५ एवमेतन्महाभाग यथा वदसि
देहिनां अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः २६ शोकहर्षभयद्वेषलोभमोहमदान्विताः मिथो घ्नंतं न पश्यंति
भावैर्भावं पृथग्दृशः २७ कंस एवं प्रसन्नाभ्यां विशुद्धं प्रतिभाषितः देवकीवसुदेवाभ्यामनुज्ञातोविशद्गृहं २८
स्युक३० तस्यां रात्र्यां व्यतीतायां कंस आहूय मंत्रिणः तेभ्य आचष्ट तत्सर्वं यदुक्तं योगनिद्रया २९ आकर्ण्य भ
र्तुर्गदितं तमूचुर्देवशत्रवः देवान्प्रति कृतामर्षा दैतेया नातिकोविदाः ३० एवं चेत्तर्हि भोजेंद्र पुरग्रामव्रजा
दिषु अनिर्दशान्निर्दशांश्च हनिष्यामोद्य वै शिशून् ३१ किमुद्यमैः करिष्यंति देवाः समरभीरवः नित्यमु
द्विग्नमनसो ज्याघोषैर्धनुषस्तव ३२ केचित्प्रांजलयो भीता न्यस्तशस्त्रा दिवौकसः मुक्तकच्छशिखाः केचि
द्भीताः स्म इति वादिनः ३३ अस्यतस्ते शरव्रातैर्हन्यमानाः समंततः जिजीविषव उत्सृज्य पलायनपरा ययुः

न्यांश्च दशाहीदूर्ध्वं २९ अस्यतो विध्यतः बाणान् द्विपतः उत्सरणे सक्ता ३२ मुक्तकच्छशिखाः मुक्तकच्छपयः ३४ श्रीरामजी

अनेविदः एवमजानतः आत्मविपर्ययः देहात्मबुद्धिर्भवति यतो विपर्ययात् भेदो भवति देहाहंकारेण हि आत्मनि परिछिन्ने सति इदम
हंकारास्पदं भिन्नं भवति यतो भेसा देहात्पुत्रादिदेहैर्योगवियोगश्च ततश्च संसृतिसुखदुःखे इति यावत् अज्ञाननिवृत्तेः इत्यर्थः एव
मुनाप्रकारेणनतेत्वया: अहं तु तावत्त्वां घातितवान् तथाप्यज्ञानदृष्ट्या तनया त्वया व्यापादितानपि मानुशोचतेति शांत्वयति

यथानेवंविदो भेदो यत आत्मविपर्ययः देहयोगवियोगश्च संसृतिर्न निवर्तते २० तस्माद्भद्रे स्वतनयान्मया व्या
पादितानपि मानुशोच यतः सर्वः स्वकृतं विंदतेवशः २१ यावद्धतोस्मि हंतास्मीत्यात्मानं मन्यतेस्वदृक् ताव
त्तदभिमान्यज्ञो वाध्यबाधकतामियात् २२ क्षमध्वं मम दौरात्म्यं साधवो दीनवत्सलाः इत्युक्त्वाश्रुमुखः पादौ श्या ७
लः स्वस्रोरथाग्रहीत् २३ मोचयामास निगडाद्विस्रब्धः कन्यकागिरा देवकीं वसुदेवं च दर्शयन्नात्मसौहृदं

तस्मादिति २० अज्ञानाश्रयकर्मवादमाह यत इति कथं तर्हि ब्राह्मणादिर्हंतुः तद्वधस्य च प्रायश्चित्तश्रवणम् अज्ञानमूलत्वमेवेत्याह २१
अस्वदृक् देहाभिमानी तस्य देहस्य हननमात्मन्यभिमन्यमान इत्यर्थः श्यालः कंसः स्वस्रोरिति शब्देन तद्वचनैर्नु पपत्त्या मिथुनशु
एग दारामिथुनत्वं तत्त्वापस्वसुः तत्पत्युरभिधानं लिंगसमवायेन प्राणभृत्त उपादधानीति वद्देवकीवसुदेवस्य च प्रत्येकं पादमगृह्णा
दित्यर्थः श्यालशब्देन कथंचिद्वसुदेवाभिधानम् २२ आत्मसौहृदं प्रियवादी दर्शयन् २३ २४

आरास्समीपमागतो मृत्युर्येषां तेन केवलं सतां विद्वेषो मृत्युमात्रहेतुः किंतु बहुनर्थकार्यपीत्याह ४७ इति श्रीभावार्थदीपिकायां दशमे चतुर्थः
४ पंचमे जातकं नंदस्सूनोः कृत्वा महोत्सवं गत्वाथ मथुरां प्राप्य वसुदेवागमोत्सवं महामना उदारचित्तः १ नियतैर्देवलचेशाशतितिलपर्वतांश्च
प्रादात् वांपिभ्रतान् रत्नौघान् रत्नसमूहान् शातकौंभांबरैः सुवर्णसंस्राकैरंबरैश्चावृतान् ३ द्रव्याणां गोहिरण्यादीनां

शुकउवाच एवं दुर्मंत्रिभिः कंसः सहसंमंत्र्य दुर्मतिः ब्रह्महिंसां हितं मेने कालपाशावृतोसुरः ४५ संदिश्य साधु
लोकस्य कदने कदनप्रियान् कामरूपधरान् दिक्षु दानवान् गृहमाविशत् ४६ ते वै रजःप्रकृतयः तमसा मूढ
चेतसः सतां विद्वेषमाचेरुरारादागतमृत्यवः ४७ आयुः श्रियं यशो धर्मं लोकानाशिष एव च हंति श्रे
यांसि सर्वाणि पुंसो महदतिक्रमः ४८ इति श्रीभागवते दशमस्कंधे चतुर्थोध्यायः ४ शुकउवाच नंदस्त्वा
त्मजउत्पन्ने जाताल्हादो महामनाः आहूय विप्रान् वेदज्ञान् स्नातः शुचिरलंकृतः १ वाचयित्वा स्वस्त्ययनं
जातकर्मात्मजस्य वै कारयामास विधिवत् पितृदेवार्चनं तथा २ धेनूनां नियुते प्रादाद्विप्रेभ्यः समलं
कृते तिलाद्रीन्सप्तरत्नौघान् शातकौंभांबरावृतान् ३ कालेन स्नानशौचाभ्यां संस्कारैः तपसेज्यया
शुध्यंति दानैः संतुष्ट्या द्रव्याण्यात्मात्मविद्यया ५

तन्मध्ये केषांचिद्दानैरेव शुद्धिर्यथा दानादि तथाजुष्टा जातकर्मादिसंस्कारैरेव गर्भाणां शुद्धिरिति दर्शयितुं प्रतिनियतानि शो
धकानि दृष्टांतत्वेनोदाहरति कालेन भूम्यादि स्नानेन देहादिः शौचेनासेधति संस्कारे गर्भादिः तपसेंद्रियादिः इज्यया ब्रह्म
यादिः दानैः इज्यादिभिः मंत्रैः आत्मविद्यया इति ५

ऽन्यासक्ता विमुखाश्चेति न हंसि ३५ क्षेमे निर्भयदेशे शूरैः संयुगादन्यत्र विकत्थनं प्रौढवादः तेषां तैः ननु हरेर्बिभेमि शंभोश्चेति तत्राहुः
रहोजुषेति सर्वस्यांतः अविषयेन क्वचिदपि बहिरदृष्टेनेत्यर्थः पुरुषप्रवेशरहितमिलावृतं वनमोको यस्य तेन शंभुना ३६ तथापि

नत्वं विस्मृतशस्त्रास्त्रान् विरथान् भयसंवृतान् हंस्यन्यासक्तमनसो भग्नचापानयुध्यतः ३५ किं क्षेमशूरैर्वि
बुधैरसंयुगविकत्थनैः रहोजुषा किं हरिणा शंभुना वा वनौकसा ३६ किमिंद्रेणाल्पवीर्येण ब्रह्मणा वा तप
स्विना तथापि देवाः सापत्न्यान्नोपेक्ष्या इति मन्महे ३७ ततस्तन्मूलखनने नियुंक्ष्वास्माननुव्रतान् ३८ यथामयो
ऽंगे समुपेक्षितो नृभिर्न शक्यते रूढपदश्चिकित्सितुं यथेंद्रियग्राम उपेक्षितस्तथा रिपुर्महान्बद्धबलो न चाल्यते
३९ मूलं हि विष्णुर्देवानां यत्र धर्मः सनातनः तस्य च ब्रह्म गोविप्रास्तपो यज्ञाः सदक्षिणाः ४० तस्मात्सर्वात्मना रा
जन्ब्राह्मणान्ब्रह्मवादिनः तपस्विनो यज्ञशीलान्गाश्च हन्मो हविर्दुघाः ४१ विप्रा गावश्च वेदाश्च तपः सत्यं दमः
शमः श्रद्धा दया तितिक्षा च क्रतवश्च हरेस्तनूः ४२ स हि सर्वसुराध्यक्षो ह्यसुरद्विड्गुहाशयः तन्मूला देवताः सर्वाः
सेश्वराः सचतुर्भुजाः ४२ अयं वै तद्वधोपायो यदृषीणां विहिंसनं ४३

धर्मैर्देवा न किंचिदपि कर्तुं समर्थाः तथापि नीतिरनुसर्तव्या इत्याह तथापीति ३७ आमयो रोगः रूढपदो बद्धमूलः ३९ देवानां विष्णुः
स च यत्र धर्मः तत्रास्ते धर्मस्य मूलं वेदादय इति ४ किंच विप्रादयो हरेरेव तनवो यस्मात्तस्मात्तद्वधमेवोपाय इत्याहुः ४२ श्रीरामजीसत्

भा॰ द॰ सुमृष्टान्युज्ज्वलितानि मणिमयानि कुंडलानि निष्काः पदकानि कंठेषु यासां ताश्च ताश्च शिखाभ्यः च्युतानि माल्यवर्षाणि यासां ताः
२२ पू॰ नंदालयं व्रजतीः व्रजंत्यः पथि विरेजुः सवलयाः कंकणभूषिताः व्यालोलैः कुंडलादिभिः शोभा यासां ताः १२ जनं सिंचंत्यः

गोप्यः सुमृष्टमणिकुंडलनिष्ककंठ्यश्चित्रांबराः पथि शिखाच्युतमाल्यवर्षाः नंदालयं सवलया व्रजती विरे
जुर्व्यालोलकुंडलपयोधरहारशोभाः १२ ताः आशिषः प्रयुंजानाः चिरं पाहीति बालके हरिद्रातैलचूर्णा
द्भिः संचिंत्योजनमुज्जगुः १३ अवाद्यंत विचित्राणि वादित्राणि महोत्सवे कृष्णे विश्वेश्वरे नंते नंदस्य व्रजमाग
ते गोपाः परस्परं हृष्टाः दधिक्षीरघृतांबुभिः आसिंचंतो विलिंपंतो नवनीतैश्च चिक्षिपुः १५ नंदो महाम
नास्तेभ्यो वासोलंकारगोधनं सूतमागधवंदिभ्यो येन्ये विद्योपजीविनाः १६ तैस्तैः कामैरदीनात्मा यथोचि
तमपूजयत् विष्णोराराधनार्थाय स्वपुत्रस्योदयाय च १७ रोहिणी च महाभागा नंदगोपाभिनंदिता व्यच
रद्दिव्यवासःस्रक्कंठाभरणभूषिता १८ तत आरभ्य नंदस्य व्रजः सर्वसमृद्धिमान् हरेर्निवासात्मगुणैरमा
क्रीडमभून्नृप १९ गोपान्गोकुलरक्षायां निरूप्य मथुरां गतः नंदः कंसस्य वार्षिक्यं करं दातुं कुरूद्वह १९

अजनमुज्जगुरिति वा १३ तेभ्यो गोपेभ्यः आदात् १५ यथोचितमन्यानपि अपूजयत् १६ हरेर्निवासेन ये आत्मनि गुणाः तैः रमायाः आक्रीडं विहारस्थानं १८ वार्षिकं प्रतिवर्षदेयं १९ रामः
२२

सोमंगल्यगिरः स्वस्तिवाचका विप्रादयो बभूवुः तत्र सूताः पौराणिकाः प्रोक्ताः मागधा वंशंसकाः वंदिनस्त्वमलप्रज्ञाप्रस्ताव
सदृशोक्तयः ६ संमृष्टानि संसिक्तानि च द्वाराणि अजिराणि अंगणानि गृहांतराणि गृहमध्यानि च यस्मिंस्तथा। चित्रध्वजेषु पता

दु १

सौमंगल्यगिरो विप्राः सूतमागधवंदिनः गायकाश्च जगुर्नेदुर्भेर्यो दुंदुभयो मुहुः ६ व्रजः संमृष्टसंसिक्त
द्वाराजिरगृहांतरः चित्रध्वजपताकास्रक्चैलपल्लवतोरणैः ७ गावो वृषा वत्सतरा हरिद्रातैलरूषिताः
विचित्रधातुबर्हस्रग्वस्त्रकांचनमालिनः ८ महार्हवस्त्राभरणकंचुकोष्णीषभूषिताः गोपाः समाय
युः राजन्नानोपायनपाणयः ९ गोप्यश्चाकर्ण्य मुदिता यशोदायाः सुतोद्भवं आत्मानं भूषयांचक्रुर्वस्त्रा द०
कल्पांजनादिभिः १० नवकुंकुमकिंजल्कमुखपंकजभूतयः बलिभिस्त्वरितं जग्मुः पृथुश्रोण्यश्चलत्कु

काः स्रजः चैलपल्लवतोरणानि च तैर्भूषितः ७ हरिद्रातैलरूषिता विचित्राधातवश्च बर्हस्रजश्च वस्त्राणि च कांचनमालाश्च
अलंकारतया विद्यंते येषां ते तथाभूता गवादयो बभूवुरित्यर्थः ८ आकल्पा अलंकाराः १० नवकुंकुमे मुखपंकजे भूतिः

भा० द० नै२
२३ पृ० सुहृदो बंधवस्तदनुभावितसंपादितः यस्त्रिवर्गः स हि पुंसो विहितः पुमर्थः शास्त्रेणैव प्रोक्तः नात्र पर्यवसितः अतस्तेषु क्लिश्यमाने
षु सुखाय न भवतीत्यर्थः २६ नंदो वसुदेवं सांत्वयन्नाह अहो त इति कंसचारभयं संक्रमाणः कालदेशौ उत्तरं दत्वाऽन्यदेवाह २७ अ
दृष्टमेव निष्ठा समाप्तिर्यस्य सः यदैव पुत्रादिषु सुखप्रदमदृष्टं क्षीयते तदैव ते पुत्रादयो न भवंतीत्यर्थः अदृष्टपरमः तथा अदृ

२३ पुंसस्त्रिवर्गो विहितः सुहृदो ह्यनुभावितः न तेषु क्लिश्यमानेषु त्रिवर्गोऽर्थाय कल्पते २६ नंद उ०
अहो ते देवकीपुत्राः कंसेन बहवो हताः एकावशिष्टावरजा कन्या सापि दिवं गता २७ नूनं ह्यदृ
ष्टनिष्ठोयमदृष्टपरमो जनः अदृष्टमात्मनस्तत्वं यो वेद न स मुह्यति २८ वसुदेव उवाच करो वै
वार्षिको दत्तो राज्ञे दृष्टा वयं च वः नेह स्थेयं बहुतिथं संत्युत्पाताश्च गोकुले २९ शुक उवाच इति नं
दादयो गोपाः प्रोक्तास्ते शौरिणा ययुः अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य गोकुलम् ३० इति दशमे पंचमोध्यायः

ष्टमेव परमं यस्य सः यद्यपि पुत्रादयो वियुक्ताः तथापि तानदृष्टमेव पुनः संगमयतीत्यर्थः एवमदृष्टमात्मनस्तत्वं अव्यभिचारि
कारणं सुखदुःखयोर्यो वेद स न मुह्यति तस्मादिदानीं त्वया दुःखं न भावनीयं मृतानामपि वियुक्तानामपि च कालांतरे दर्शनयोग
संभवात् अस्मदादिभिरपि कालांतरे तद्वियोगे सत्यपि इति नंदस्य दैवी वागेषा भाविसूचिका २८ तां च बुध्वा वसुदेवो दुःखसक्तो मुं
मंदमाह करो वै इति वः युष्माकं २९ अनोभिः शकटैः ३० अनोभिः स्यंदनैः अनः शाकटः शाकटः स्यंदनः कथ्यते रथ इति हला राम
इति दशमे पंचमः ५ २३

भ्रातरंसस्वार्यंतदवमोचनंतस्यवसतिस्थानं १९ पुनर्भवःपुनर्जातइवतत्रहेतुगर्भंविशेषणं संसारचक्रेवर्त्तमानइतिदुर्लभत्वमेवाह
२२ प्रियाणांसोसंवासस्सप्रियसंवासः नास्तिप्रियसंवासः हेधप्रेयेतिवास्रोतसावेगेनओघेननीयमानानां प्लवंती प्लवाः तृणकाष्ठादि

२१

वसुदेवउपश्रुत्यभ्रातरंनंदमागतं ज्ञात्वादत्तकरंराज्ञेययौतदवमोचनं १९ तंदृष्ट्वासहसोत्थायदेहःप्राण
मिवागतं प्रीतःप्रियतमंदोर्भ्यांसस्वजेप्रेमविह्वलः २० पूजितःसुखमासीनःदृष्ट्वानामयमादृतः प्रस
क्तधीस्स्वात्मजयोरिदमाहविशांपते २१ दिष्ट्याभ्रातःप्रवयसइदानीमप्रजस्यते प्रजाशायानिवृत्तस्यप्र
जायत्समपद्यत २२ दिष्ट्यासंसारचक्रेस्मिन्वर्त्तमानःपुनर्भवः उपलब्धोभवानद्यदुर्लभंप्रियदर्शनं
नैकत्रप्रियसंवासःसुहृदांचित्रकर्मणां ओघेनव्यूह्यमानानांप्लवानांस्रोतसोयथा २३ कच्चित्पशव्यं
निरुजंभूर्यंबुतृणवीरुधं बृहद्वनंतदधुनायत्रास्सेत्वंसुहृद्वृतः २४ भ्रातर्ममसुतःकच्चिन्मात्रासह
भवद्व्रजे तातंभवंतंमन्वानोभवद्भ्यामुपलालितः २५

यः तेषांयथैकत्रस्थितिःनास्तितद्वत् २३ पशव्यादिरूपेतस्मिन्वनेनिर्दोषगोपयोदध्यादि प्रभूतगोपिकास्तन्यादिनापुत्रक्षेमंविव
क्षयापृच्छतिप्रसक्तधीः स्वात्मजयोरित्युक्तत्वात् २४ भवद्भ्यामुपलालितःसन् कच्चिद्वर्त्तत इतिशेषः पुत्रदर्शनक्लेशेनाहनुसह

भा॰ द॰ वल्गुस्मितं स्मितं येषु तेन यानि अपांगविसर्गाः तेषु तैः वीक्षितैर्व्रजौकसां मनो हरंती मनो गोपानां हृतमनसः तेन तां न निवारितवंत इत्युक्तं भवंतः
२५ पृ॰ भवति गोप्यश्च श्रियमिव मत्वात् लक्ष्मी आसन् अतः केनाप्य निवारितासती प्रविवेशेति भावः ६ बालग्रहः पूतना असदंतकं बालं ददर्श अ
सतां अंतकं दृष्ट्वा कंपनं त्विभेति तत्राह प्रतिछन्न निजोरुतेजसं बालनमादेन प्रतिछन्नं तिरोहितं निज गुरु तेजो येन तं कमिव अ

२५ वल्गुस्मितापांगविसर्गवीक्षितैर्मनो हरंतीं वनितां व्रजौकसां अमंसतांभोजकरेण रूपिणीं गोप्यः श्रि
यं द्रष्टुमिवागतं पतिं ६ बालग्रहस्तत्र विचिन्वती शिशून् यदृच्छया नंदगृहे सदंतकं बालं प्रतिछन्ननिजो
रुतेजसं ददर्श तल्पे ग्निमिवाहितं भसि ७ विबुध्य तां बालकमारिकाग्रहं चराचरात्मासन मीलितेक्षणः
अनंतमारोपयदंकमंतकं यथोरगं सुप्तमबुद्धिरज्जुधीः ॥ ८ ॥ ॥

सि भस्मनि अग्निहितं अग्निमिवेति चराचरात्मत्वादेवतां विबुध्य निमीलितेक्षणः आसस्वयमेनंतं दृष्ट्वा नामंतकं सांवामारोप राम:
यत् व्यालं मत्वा यथोरगं सुप्तं बुद्धिश्च्यासो रज्जुधीश्च सः अज्ञानतो रज्जुबुध्या यथा गृह्णातीति तद्वत् ८ श्रीरामोजयति २५

मथेसख्युर्गिरानंदोव्रजंगच्छन्स्तांपथि दृष्ट्वातुराद्भसीत्तस्यामृत्युंश्रुत्वाचविस्मितः कृष्णविषयेसंकमानंराजानंप्रति अविषयेन
वत्रासेवमरिष्यतीति सूचयन्नाह नयत्रेति यत्रश्रीकृष्णस्यश्रवणादीनिनसंति तत्रैवतासांशक्तिः साद्यात्तस्मिन्नेवसति काशंकेति
भावः ३ योषित्वावेशतोवशेनीरीमिवात्मानंविधाय ननुनित्यक्रूराणिर्विशंकाचसतीकथंपरसद्मनिप्रविष्टाभूत तत्राह कामचारि

शुकउवाच नंदःपथिवचःशौरेर्नमृषेतिविचिंतयन् हरिंजगामशरणंउत्पातागमशंकितः १ कंसेनप्र
हिताघोरापूतनाबालघातिनी शिशूंश्चचारनिघ्नंतिपुरग्रामव्रजादिषु २ नयत्रश्रवणादीनिरक्षोघ्ना
निस्वकर्मसु कुर्वंतिसात्वतांभर्तुर्यातुधान्यश्चतत्रवै साखेचर्येकदोपेत्यपूतनानंदगोकुलं योषित्वा
माययात्मानंप्राविशत्कामचारिणी ४ तांकेशबंधव्यतिसक्तमल्लिकांबृहन्नितंबस्तनकृच्छ्रमध्यमां
सुवाससंकंपितकर्णभूषणत्विषोल्लसत्कुंतलमंडिताननां ५

णीतिनहिकामचारिणीविदंचिन्तमित्यर्थः ४ तांवनितांपतिं दृष्टुमागतामत्तिरूपवतींश्रियमिवगोप्योमंशतोमुत्तरश्लोकेनान्वयः श्री
स्त्रीसामाद्यानिविशेषणानि केसबंधव्यतिसक्ता मल्लिकांधम्मिल्ल संसक्तमल्लिकाकुसुमांवृहत्तानितंत्वेनस्तनाभ्यांचउभयतःश्रा
क्रांतमिवक्लच्छूकृशंमध्यममुदरंयस्याः तांसुवाससंरमणीयेवाससीयस्याः तांकंपितयोःकर्णभूषणयोः त्विषाउल्लसद्भिःकुंतलै

भा० द० व्यादाय मुखं विवृता निजरूपमास्थितां स बालः समये कपटमानुषाकृतिं १४ पतितेऽस्या देहः यद्यत्रो
२५ पृ० मध्यवर्तीनो द्रुमान् चूर्णयामास ईषा लांगलदंडः तत्प्रमाणं उग्रा दंष्ट्रा यस्मिं तत्तथाभूतमास्यं यस्मिन्
तत्तस्याः कलेवरं वीक्ष्य तत्र गोपा गोप्यश्च तत्रसुः संत्रासहेतुत्वेन रूपं विशिनष्टि गिरिकंदरनासिके

25 निशाचरीत्थं व्यथितस्तना व्यसुर्व्यादाय केशांश्चरणौ भुजावपि प्रसार्य गोष्टे निजरूपमास्थिता वज्राहतो वृत्र इवापतन्नृप १४ पतमानोपि तद्देहः त्रिगव्यूत्यंतरद्रुमान् चूर्णयामास राजेंद्र महदासीत्तदद्भुतं १५ ईषामात्रोग्रदंष्ट्रास्यं गिरिकंदरनासिकं गंडशैलस्तनं रौद्रं प्रकीर्णारुणमूर्धजं १६ अंधकूपगभीराक्षं पुलिनारोहभीषणं बद्धसेतुभुजोर्वंघ्रि शून्यतोयह्रदोदरं १७ संतत्रसुः स्म तद्वीक्ष्य गोपा गोप्यः कलेवरं पूर्वं तु तन्निःस्वनितभिन्नहृत्कर्णमस्तकाः १८

यस्मिंस्तत् च्युतो स्थूलोपला विवस्तनौ यस्मिंस्तत् रौद्रं घोरं प्रकीर्णाः अरुणा मूर्धजा यस्मिंस्तत् १६ अंधकूपाविव गभीरे अक्षिणी यस्मिंस्तत् पुलिनवदारोहौ जघने ताभ्यां भीषणं बुधाः सेवंतस्य ऊरुअंघ्री च यस्मिंस्तत् शून्यतोयह्रदवदुदरं यस्मिंस्तत् १७ पूर्वमेव तस्याः शब्देन भीताः पुनर्दर्शनेनातित्रेसुः हत्याह पूर्वं त्विति तस्या निःस्वनितं शब्दः तेन निर्भिन्नानि हृत्कर्णमस्त

रामः
२५

ननुयशोहारोहि एषोतांकथंनन्यवारयेत्तांतत्राह तामिति वामंवक्रंतुजनन्याइवचेष्टितंयस्यास्तांवरास्त्रियंच सहसैवांतराग्रहमध्येवीक्ष्यअं
तरतीक्ष्णत्वेनहिंसाद्वेषेचदृष्टांतः कोशपरिछदासिवत् मदुचर्मत्रिचर्मचित्रमयःकोशः परिछद आवरणं यस्यसः खड्गास्यतद्वत् तत्त्व

तांतीक्ष्णचित्तामथवामचेष्टितांवीक्ष्यांतराकोशपरिछदासिवत् वरस्त्रियंतत्रभयानधर्षितेनिरीक्ष्यमाणेज
ननीहृतिष्ठता १० तस्मिन्स्थानेदुर्जरवीर्यमुल्वणंतोकंकमादायशिशोर्देहावयं गाढंकराभ्यांभगवान्त्रपी
अलत्स्तरोः समंपरोक्षसमन्वितोपिवत् ११ सामुंचमुंचालमितिब्रभाषिणीनिपीड्यमानाखिलजीवमर्मणी
विवृत्यनेत्रेचरणौभुजौमुहुर्निर्विरन्नगात्राक्षिपतीरुरोदह १२ तस्याःस्वनेनातिगभीररंहसासाद्रिर्मही द्यौ
श्चचचालसग्रहा रसांदिशश्चप्रतिनेदिरेजनाः पेतुःक्षितौवज्रनिपातशंकया १३

भयाच्चधर्षिते अंतर्लीभूते अहमस्यजननीइयंवेत्ति मांहितेसमोजननीअनन्येनिरीक्षमाणेरवकेवलमतीष्ठतां ननिवारितवंतौ १०
तस्मिन्स्थानेदुर्जरंवीर्यंयस्मिन्संतंतंतोकमंकमादायतस्मैशिशवेदत्तो अथानंतरमेवपीडकेनवनं विषमयपयामितित्वमेव
तस्याः क्रोडेः समं सहापिवत् ११ चरणौभुजौच मुहुर्मुहुः क्षिपंतीनिःखिन्नानिखेदयुक्तानिगात्राणियस्याःसा १२ रसारसात

एवं बद्धिः रक्षां कृत्वा अंतरंगमः कुर्वन्नित्याह इंद्रियाणीति २५ आत्मानमहंकारं २६ २७ संन्यवेशयत् शाययामास ३१ विस्मयमे

इंद्रियाणि हृषीकेशः प्राणान्नारायणोवतु श्वेतद्वीपपतिश्चित्तं मनो योगेश्वरोवतु २६ पृश्निगर्भस्तु ते
बुद्धिमात्मानं भगवान्परः क्रीडंतं पातु गोविंदः शयानं पातु माधवः २६ व्रजंतमव्याद्वैकुंठ आसी
नं त्वां श्रियः पतिः भुंजानं यज्ञभुक्पातु सर्वग्रहभयंकरः २७ डाकिन्यो यातुधान्यश्च कुष्मांडा येर्भ
कग्रहाः भूतप्रेतपिशाचाश्च यक्षरक्षोविनायकाः २८ कोटरा रेवती ज्येष्ठा पूतना मातृकादयः उन्मा
दा ये ह्यपस्मारा देहप्राणेंद्रियद्रुहः २९ स्वप्नदृष्टा महोत्पाता वृद्धा बालग्रहाश्च ये सर्वे नश्यंतु ते विष्णोर्ना
मग्रहणभीरवः ३० इति प्रणयबद्धाभिर्गोपीभिः कृतरक्षणं पाययित्वा स्तनं माता संन्यवेशयदात्म
जं ३१ तावन्नंदादयो गोपाः मथुराया व्रजं गताः विलोक्य पूतनादेहं बभूवुरिति विस्मिताः ३२ नूनं
वत र्षिः संजातो योगेशो वा समास सः स एव दृष्टो ह्युत्पातो यदाहानकदुंदुभिः ३३ कलेवरं परशुभिः
छित्त्वा तत्ते व्रजौकसः दूरे क्षिप्त्वावयवशो न्यदहन्काष्ठवेष्टितं ३४ दह्यमानस्य देहस्य धूमश्चागुरुसौरभः
उत्थितः कृष्णनिर्भुक्तसपद्याहतपा
प्मनः ३५

वाद्यन्ननभिज्ञ ३३ वत विस्मये एषां प्राप्तं सः ऋषिः ततः प्रभाववान् योगेशो ज्ञानी वा समास यतः स एव दृष्ट इति ३३ विस्मयांतरमा

कृष्णेन भुक्तेन प्रणयवत्सपदि आहतः पाप्मा यस्याः ३५

द्वादशांगेषु ललाटादिषु केशवादिद्वादशनामभिः १९ अनाचांताः एव अप्यम मुनिसंभ्रमेणैव रक्षां कृत्वा किंचित् निश्वासाः पुनः
तालर्ये तां वीजन्यासमकुर्वतेत्याह संस्पृष्टसलिला आचांता आत्मनि प्रथमम् अंगेषु करयोश्च पृथक् अजादि एकादश वीजानां मध्ये

वालंच तस्या उरसि क्रीडंतमकुतोभयं गोप्यः तूर्णं समभ्येत्य जगृहुर्जातसंभ्रमाः १९ यशोदारोहिणीभ्यां ताः
समं वालस्य सर्वतः रक्षां विदधिरे सम्यक् गोपुच्छभ्रमणादिभिः २० गोमूत्रेण स्नापयित्वा पुनर्गोरजसार्भ
कं रक्षां चक्रुश्च शकृता द्वादशांगेषु नामभिः २१ गोप्यः संस्पृष्टसलिला अंगेषु करयोः पृथक् न्यस्यात्म
न्येव वालस्य वीजन्यासमकुर्वत २२ अव्यादजोंघ्रि मणिमांस्तव जान्वथोरू यज्ञोच्युतः कटितटं जठरं ह
यास्यः हृत्केशवोदुरमीश इनस्तु कंठं विष्णुर्भुजं मुखमुरुक्रम ईश्वरः कं २३ चक्र्यग्रतः सहगदो हरिरस्तु
पश्चात्त्वत्पार्श्वयोर्धनुरसी मधुहाजनश्च कोणेषु शंख उरुगाय उपर्युपेंद्रः तार्क्ष्यः क्षितौ हलधरः पुरुषः

कारस्पृष्टो त्रीणि करयोः संधिषु चत्वारि चत्वारि तथा द्वादशैकैकस्मिन्नंगे अप्राधे एकैकं वीजं न्यस्य वालस्याप्यंगेषु तथैवाकुर्वत २२
अंघ्रिमंघ्रि जानु जानुनी भुजं भुजौ कं शिरः २३ तथा दिक्षु रक्षामकुर्वन्नित्याह चक्र्यग्रत इति चक्रं च हि संहितो हरिः तव पश्चा
दस्तु त्वत्पार्श्वयोर्धनुर्धरी मधुहा असिधृक् शंखधरः उरुगायः कोणेषु क्षितौ अधस्तात् २४

भा० द० उत्क्षिप्य सकटं ज्योतिर्गणवर्त्मगाधः क्षिपन् दर्शयन्विश्वमास्ये च कृष्णः जीयादिति सप्तमे कृष्णार्भकसुधासिंधुसंप्लवानंदनिर्भरः
२७ पू० स्वयं तदेव संप्रष्टुं राजान्यदभिनंदति येन येनावतारेणापि यानि यानि कर्माणि करोति तानि नः कर्णसुखावहानि मनः प्रीति
कराणीति च भवंतः १ तथापि यत् शृण्वतः पुंसः पुरुषमात्रस्यारतिः मनोग्लानिः तन्मूला तृष्णा विविधा तृष्णा चापगच्छति तथा

27

राजोवाच येन येनावतारेण भगवान्हरिरीश्वरः करोति कर्णरम्याणि मनोज्ञानि च नः प्रभो १ यच्छृण्व
तोपैत्यरतिर्वितृष्णा सत्वं च शुध्यत्यचिरेण पुंसः भक्तिर्हरौ तत्पुरुषे च सख्यं तदेव हारं वद मन्यसे चेत् २
अथान्यदपि कृष्णस्य तोकाचरितमद्भुतं मानुषं लोकमासाद्य तज्जातिमनुरुंधतः ३ श्रीशुक उवाच कदाचि
दौत्थानिककौतुकाप्लवे जन्मर्क्षयोगे समवेतयोषितां वादित्रगीतद्विजमंत्रवाचकैः चकार सूनोरभिषेच
नं सती ४

सत्वशुद्धिर्हरिभक्तिः हरिदासैः सख्यानि च भवंति तदेव हारं हरेश्चरितं मनोहरं वा वद अनुग्रहं यदि करोषीति २ अथोत्सुकेन पृच्छति
[illegible] अथेति मनुरुंधतोनुकुर्वतः ३ उत्थानं शिशोरंगपरिवर्तनं तत्र करणीये ये कौतुकाप्लवे उत्सवाभिषेके तस्यात्तस्मिन्नेव दिने राम:
जन्मर्क्षस्यापि योगे अति महोत्सवे समवेतयोषितां मिलितपुरंध्रीणां मध्ये वादित्रादिभिः शोभितमभिषेचनं यशोदा चकार ४ २७

प्रसंगाद्भक्तिवैभवं कैमुत्यन्यायेनाह पूतनेति ३६ श्रद्धया श्रीशिक्षकेन भक्त्या प्रेम्णा रक्ताः स्निग्धाः तन्मातर इति वत्साहरणे लीला

पूतना लोकवालघ्नी राक्षसी रुधिराशना जिघांसयापि हरये स्तनं दत्वाप सद्गतिं ३६ किं पुनः श्रद्धया भ
क्त्या कृष्णाय परमात्मने यच्छन्प्रियतमं किं नु रक्ताः तन्मातरो यथा ३७ पद्भ्यां भक्तहृदिस्थाभ्यां वंद्याभ्यां
लोकवंदितैः अंगं यस्याः समाक्रम्य भगवानपि तत्स्तनं ३८ यातुधान्यपि सा स्वर्गमवाप जननीगतिं कृष्णभु
क्तस्तनक्षीराः किमु गावोनुमातरः ३९ पयांसि यासामपिवत्पुत्रस्नेहस्नुतान्यलं भगवान्देवकीपुत्रः कैव
ल्याद्यखिलप्रदः ४० तासामविरतं कृष्णे कुर्वतीनां सुतेक्षणं न पुनः कल्पते राजन्संसारोज्ञानसंभवः ४१
कटुधूमस्य सौरभ्यमवघ्राय व्रजौकसः किमिदं कुत एवेति वदंतो व्रजमाययुः ४२ ते तत्र वर्णितं गोपैः
पूतनागमनादिकं श्रुत्वा तन्निधनं स्वस्ति शिशोः चासन्सुविस्मिताः ४३ नंदः स्वपुत्रमादाय प्रेत्यागतमु
दारधीः मूर्ध्न्युपाघ्राय परमां मुदं लेभे कुरूद्वह ४४ य एतत्पूतनामोक्षं कृष्णस्यार्भकमद्भुतं निशम्य श्र
द्धयावै गोविंदे लभते रतिं ४५ अनुदेलकुलानीशः पूतनायाः शिशुघ्नात् स्तनपो योनतः प्राणैः प्रा
कृतिमकल्मषात् ४६ इति दशमे षष्ठः ६

भिप्रायेण वहुवचनं गोपिकाः तदा मातरो भवन्निति ४७ ४८ एतत् अर्भकमर्भकस्य चरितं किं तत् पूतनामोक्षमिति ४६ इति भावार्थ

दीपिकायां दशमे षष्ठोऽध्यायः ६

नत्वदधिरे विप्रविसंनजगृहुः उताथ्यपि बालस्यैतत्तत्संभवति एतेचबालाः किंनजानंतीति अप्रमेयंप्रमातुमसक्यं ९ स्तनैः स्तन्यैः दत्वा
१० भगवत्स्वभावानभिज्ञा विप्रचेष्टितं विडंबयन्नाह पूर्ववदित्यादिना वाक्तिभिः शान्तैः यद्वा अप्रदिग्धवालिभिः सहितं सपरिकरं यथाप्रा
र्वं स्थापितं विप्रादध्यादिभिः स्वर्चयामासुः कृत्वाग्रतादहोमं विधाय ११ असूयागुणेषु दोषाविष्करणं ईर्ष्या अर्दांति तेषां माशिषः कृताः

नतेऽत्रदधिरे गोपा बालभाषितमित्युत अप्रमेयं बलं तस्य बालकस्य न ते विदुः ९ रुदंतं सुतमादाय यशोदा ग्रहशंकि
ता स्वस्त्ययनं विप्रैः सूक्तैः स्तनमपाययत् १० पूर्ववत्स्थापितं गोपैर्बलिभिः सपरिच्छदं विप्राः कृत्वार्च
यां चक्रुर्दध्यक्षतकुशांबुभिः ११ येऽसूयानृतदंभेर्ष्याहिंसामानविवर्जिताः न तेषां सत्यसीलानामाशिषो
विफलाः कृताः १२ इति बालकमादाय सामर्ग्यजुरुपाकृतैः जलैः पवित्रौषधिभिरभिषिच्य द्विजोत्तमैः १३
वाचयित्वा स्वस्त्ययनं नंदगोपः समाहितः कृत्वाचाग्निं द्विजातिभ्यः प्रादादन्नं महागुणं १४ गावः सर्वगु
णोपेताः वासः स्रक्रुक्ममालिनीः आत्मजाभ्युदयार्थाय प्रादात्ते चान्वयुंज्यत १५

तेऽप्रयुक्ता इति निष्फला न भवंति १२ इत्येवमभिप्रेत्य सामर्ग्यजुर्भिरुपाकृतैः संस्कृतैः पवित्रा ओषधयो येषु जलेषु द्विजोत्तमैः कर्तृभि राम:
अभिषिच्याभिषेकं कारयित्वा कृत्वा लावयित्वा १३ गावः गाश्च प्रादात् अन्वयुंजत आशिषो युयुजुः १५ ॐ नमो भगवते वासुदेवाय २८

अन्नाद्यैः सुपूजितैर्विप्रैः कृतमंगलं संजातनिद्रं अद्वितीयस्यं अशीशयत् शायितवती सकटस्याधस्तात् स्वैभिः ५ ऊर्द्ध्वं चालितवान् ६ अधःशयानस्य शिशोः अनः शकटं अल्पकाः सूक्ष्माः प्रवालवन्मृदवश्च ये अंघ्री ताभ्यां हतं सकटं व्यवर्त्तत विपरीतमपतत् कथंविधं विध्वस्तनानारसकु

मू०

नंदस्य पत्नी कृतमज्जनादिकं विप्रैः कृतस्वस्त्ययनं सुपूजितैः अन्नाद्यवासःस्रगभीष्टधेनुभिः संजातनिद्राक्षम शीशयच्छनैः ५ औत्थानिकौत्सुक्यमना मनस्विनी समागतान्पूजयती व्रजौकसः नैवाशृणोद्वै रुदितं सुतस्य सा रुदन्स्तनार्थी चरणावुदक्षिपत् ६ अधःशयानस्य शिशोरनोऽल्पक प्रवालमृद्वंघ्रिहतं व्यवर्त्तत विध्वस्त नानारसकुप्यभाजनं विन्यस्तचक्राक्ष विभिन्नकूबरं ६ दृष्ट्वा यशोदा प्रमुखा व्रजस्त्रिय औत्थानिके कर्मणि याः समागताः नंदादयश्चाद्भुतदर्शनाकुलाः कथं स्वयं वै शकटं विपर्यगात् ७ ऊचुरव्यवसितमतीन्गोपान्गोपी श्च बालकाः रुदतानेन पादेन क्षिप्तमेतन्न संशयः ८

टी०

प्यभाजनं विध्वस्तानि नानारसवंति सुवर्णरजतानि रिक्तकांस्यादिमयानि रिक्तानि यस्या भवंति यस्याश्चक्रे चालाक्षकाक्षाः विन्यस्ताः चक्राक्षा यस्मिन् विभिन्नः कूबरो युगंधरो यस्य तच्च यथा वर्त्तते ति ६ अद्भुतदर्शनेनाकुलाबभूवुः तदेवाह कथमिति विपर्यगात् विपरीतमपतदिति ७ अनिश्चितबुद्धीन् ८

भा० द० पांसुवर्षे सति २३ उपारतः पांसुवर्षस्य वेगो यस्मिंस्तथाभूते पवने सति तत्र तस्या हे रुदितं अनुनिशम्य गोप्यो रुरुदुः २४ वात्याचक्रवातः
२९ पू० तद्रूपधरः कृष्णं हरन् खं नभः कथंचिन्न भोगतः ततः परं गंतुं नाशक्नोदित्यर्थः २५ गुरुमत्तया गौरवेण तथा अश्मानं अश्मवं
तं पर्वतप्रायं मन्यमानः तेनैवात्मनां गतस्तेन गृहीतं तत्मुक्तुं मिच्छन्नपि नाशक्नोदित्यर्थः २६ तस्योरसि लंबमानं कृष्णमादाय मा

इति खर पवन चक्र पांसुवर्षे सुतपदवीमबला विलक्ष्य माता अतिकरुणमनुस्मरंत्यशोचद्भुवि पतिता मृत
वत्सका यथा गौ २३ रुदितमनुनिशम्य तत्र गोप्यो भृशमनुतप्तधियो ऽश्रुपूर्णमुख्यः २४ रुरुदुरनुपलभ्य
नंदसूनुं पवन उपारतपांसुवर्षवेगे २४ तृणावर्तः शांतरयो वात्यारूपधरो हरन् कृष्णं नभोगतो गंतुं नाशक्नो
द्भूरिभारभृत् २५ तमश्मानं मन्यमान आत्मनो गुरुमत्तया गले गृहीत उत्स्रष्टुं नाशक्नोदद्भुतार्भकं २६ गल
ग्रहणनिश्चेष्टो दैत्यो निर्गतलोचनः अव्यक्तरावो न्यपतत्सह बालो व्यसुर्व्रजे २७ तमंतरिक्षात्पतितं शिलायां
विशीर्णसर्वावयवं करालं पुरं यथा रुद्रशरेण विद्धं स्त्रियो रुदंत्यो ददृशुः समेताः २८ प्रादाय मात्रे प्रतिहृत्य
विस्मिताः कृष्णं च तस्योरसि लंबमानं तं स्वस्तिमंतं पुरुषादनीतं विहायसा मृत्युमुखात्प्रमुक्तं २९ गोप्य
श्च गोपाः किल नंदमुख्या लब्ध्वा पुनः प्रापुरतीव मोदं २९

त्रे प्रतिहृत्य समर्प्य विस्मिताश्च बभूवुः विहायसा गगनमार्गेण पुरुषादेन नीतं तथापि मृत्युमुखात्प्रमुक्तं पुनर्लब्ध्वा मोदं प्रापुरिति प रस्परं हर्षकथामाहुः २९

ताः तथैव बभूवुरित्यर्थः १६ अन्यदपि बालचरितमाह तृणावर्तस्य मृत्युपरिहाराय कश्मलेनैवात्मन उत्संगादुत्तारणाय कृतं भारमजानती

विप्रा मंत्रविदो युक्ताः तैर्याः प्रोक्तास्तथाशिषः ता निष्फला भविष्यंति न कदाचिदपि स्फुटं १६ एकदारोहमा
रूढं लालयंती सुतं सती गरिमाणं शिशुं वोढुं न सेहे गिरिकूटवत् १७ उत्क्षिप्य मृदुपादेन शकटं व्योम्नि लीलया
तृणावर्तं पदापीड्य नु पातयदर्भकः १८ भूमौ निधाय तं गोपी विस्मिता भारपीडिता महापुरुषमादध्यौ जग
तामास कर्मसु १९ दैत्यो नाम्ना तृणावर्तः कंसभृत्यः प्रचोदितः चक्रवातस्वरूपेण जहारासीनमर्भकं २० गो
कुलं सर्वमावृण्वन्मुष्णंश्चक्षूंषि रेणुभिः ईरयन्सुमहाघोरशब्देन प्रदिशो दिशः २१ मुहूर्तमभवद्गोष्ठं रजसा
तमसावृतं सुतं यशोदा नापश्यन्तस्मिन्न्यस्तवती यतः २२ नापश्यत्कश्चनात्मानं परं चापि विमोहितः
तृणावर्तनिसृष्टाभिः शर्कराभिरुपद्रुतः २३

उत्पातशंकया महापुरुषमादध्यौ भारेण पीडिता विस्मिता च सती यद्वा जगतां मध्ये कर्मसु आस बभूव न तु जगदुदरं वेदेत्यर्थः १९
ईरयन्निनादयन्नित्यर्थः २० यतो यत्र न्यस्तवती तस्मिन्स्थानेनापश्यत् २१

भा० द० अष्टमे नामकर्मास्य बालक्रीडाकुतूहले मृज्जक्षणमिषेणैव विश्वरूपं निरूप्यते विश्वरूपादि बालस्य निशम्य शंकितः पितुः नामकरणं गर्ग
३० पू० वाक्येन निर्जितत्वं प्रसुसूचत् गर्गश्चेत्कथं धनिनां गृहमागतः तत्राह महद्विचलनमिति महतां स्वाश्रमादन्यत्र विचलनं नर्स्वा
र्थं किंतु गृहिणां परमंगलाय ननु तर्हि त एव महद्दर्शनार्थं किमिति नागच्छंतीति तत्राह दीनचेतसां कृपणानां क्षणमपि गृहं त्यक्तुमशक्नुव
तामित्यर्थः ४ त्वया बालयोर्नामकरणादि करणीयमिति वक्तुं तस्य ज्ञानातिशयमाह ज्योतिषामयनमिति पदत्तीन्द्रियज्ञानस्तु

३०

श्रीशुक उवाच गर्गः पुरोहितो राजन् यदूनां सुमहातपाः व्रजं जगाम नंदस्य वसुदेवप्रचोदितः १ तं दृष्ट्वा पर
मप्रीतः प्रत्युत्थाय कृतांजलिः आनर्चाधोक्षजधिया प्रणिपातपुरस्सरं २ सूपविष्टं कृतातिथ्यं गिरा
सूनृतया मुनिं नंदयित्वाब्रवीद्ब्रह्मन् पूर्णस्य करवाम किं ३ महद्विचलनं नृणां गृहिणां दीनचेतसां
निःश्रेयसाय भगवान् कल्पते नान्यथा क्वचित् ४ ज्योतिषामयनं साक्षाद्यत्तज्ज्ञानमतींद्रियं प्रणीतं भ
वतायेन पुमान्वेद परावरं ५

धनं ज्योतिषामयनं तत्प्रतिपादकं ज्योतिःशास्त्रमित्यर्थः तत्साक्षाज्ज्ञानं त्वया प्रणीतं येन चान्योऽपि पुमान् परावरं परं कारणं पूर्वजन्म
कृतं कर्म अवरं कार्यमस्मिन् जन्मनि भावि फलं तद्वेद उक्तं च जातके यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः प्रा
प्तिं व्यंजयति शास्त्रमेतत्तमसि द्रव्याणि दीप इवेति विवक्षितमाह त्वं हीति ५ ॐ नमो भगवते वासुदेवाय श्रीरामो जयति रामः
३०

अप्योवतीतिनिवृत्तिं गमितः मृत्युंप्रापितः कोत्रविस्मयोयुज्यतेतेष्वेचकेचिदाहुः हिंस्त्र इति ३० नोस्माभिःचीर्णंव्हितं पूर्तंवापी

अहोवतात्यद्भुतमेषरक्षसावालोनिवृत्तिंगमितोभ्यगात्पुनः ३० हिंस्त्रःस्वपापेनविहिंसितःखलःसाधुः
समत्वेनभयाद्विमुच्यते ३१ किंनस्तपःचीर्णमधोक्षजार्चनंपूर्तेष्टदत्तमुतभूतसौहृदम् यत्संपरेतः
पुनरेववालकोदिष्ट्यास्वबंधून्प्रणयन्नुपस्थितः ३२ दृष्ट्वाद्भुतानिवहुशोनंदगोपोवृहद्वने वसुदेववचोभू
३३ योमानयामासविस्मितःएकदार्भकमादायस्वांकमारोप्यभामिनी प्रस्नुतंपाययामासस्तनंस्नेहपरिप्लुता॥३४॥
पीतप्रायस्यजननीसुतस्यरुचिरस्मितं मुखंलालयतीराजन्जृंभतोददृशेइदं ३५ खंरोदसीज्योतिर
नीकमाशाः सूर्येंदुवन्हिश्वसनांवुधींश्चद्वीपान्नगांस्तद्दुहितॄर्वनानिभूतानियानिस्थिरजंगमानि ३७॥ ॥०॥
सावीक्ष्यविश्वंसहसाराजन्संजातवेपथुः संमील्यमृगशावाक्षीनेत्रेआसीत्सुविस्मिता ३८॥ ॥॥॥०॥
इतिश्रीभागवतेमहापुराणेदशमस्कंधेसप्तमोध्यायः ७ ॐनमोभगवतेवासुदेवाय श्रीरामोज

कूपतडागादिनिर्माणं इष्टं पंचयज्ञाग्निहोत्रादिदत्तं दानं यद्यस्मात् तपआदेः प्रणयन् हर्षयन् १ संलुत्यात्तमग्रगोकुलेइति
वचनं मानयामास ३३ पीतप्रायस्यपीतप्रायेणस्तनोयेन ३५ नगान्गिरीन् तद्दुहितॄर्नदी ६३ इतिश्रीभावार्थदीपिकायां
तृणावर्तोगमेद्दृष्ट्वा नवापंकिनीमातरं वोधयन्दर्शयामास जृंभमाणोमुखेजगत् ९ टिका १

दशमस्कंधः ७

यद्रूनामपच्यभावात् कुविद्वेनोविज्ञतिपथमानालं यदूनामन्नथ्यभावात् भावोभावोनतस्मादन्योत्याशिच्छयासर्वैकमतिकरणा
दित्सर्थः सम्यक् कर्मेत्येकीकरोति संकर्षणमप्युत्रांतिमन्यंतेवदंतीत्यर्थः गर्भसंकर्षणंतुनप्रकाशयति अस्यतवपुत्रस्य
अतः ब्रह्मइति एकंनामभविष्यति १२ आगयमितिसामान्योतयास्थिरयंजन्मांतरगतंनाम कथयतीति नंदो मन्यतेस्म

स्क३

३) शुकउवाच एवंसंप्रार्थितोविप्रः स्वचिकीर्षितमेवतत् चकारनामकरणंगूढोरहसिवालयोः ११
अयंहिरोहिणीपुत्रोरमयन्सुहृदोगुणैः आख्यास्यतेराम इति वलाधिक्यंविदुः १२ यदूनाम
हमाचापृथग्भावात्संकर्षणमुशंत्युत आसन्वर्णास्त्रयोस्यगृह्णतोनुयुगंतनुः १३ शुक्लोरक्तः
स्तथापीतः इदानींकृष्णतांगतः १३ प्रागयंवसुदेवस्यक्वचिज्जातस्तवात्मजः वासुदेवइतिश्रीमानभि
ज्ञाःसंप्रचक्षते १५ एषवःश्रेयआधास्यन्गोपगोकुलनंदनः अनेनसर्वदुर्गाणियूयमंजस्तरिष्यथः १६

अतएनंवासुदेवइतिसंप्रचक्ष्यतेइति १४ गुणानुरूपाणिईश्वरः सर्वतइत्यादीनि कर्मानुरूपायोपतिः गोवर्धनोर्द्ध
रण इत्यादीनितानिसर्वाण्याह मपिनोवेदजना अपिनोविदुरति १५ जातकफलमाह एषेति आधास्यत् आधा
स्यति अनेन १६ श्रीरामचंद्रायनमः

वज्ञोमंत्रविद्धश्च अतोत्वंनामकरणादिसंस्कारान्कर्त्तुंकर्त्तुमर्हसीत्यर्थः नन्वेतद्ब्राह्मणकरणीयं इतिचेत तत्राह नृणामिति ६ असुतत्वादि
दं नंदं प्रति गुप्तमेतत्कार्यमित्यभिप्रायेणाशंकमानइवाह यदूनामिति भवतु तथापित्वमत्रागतइतिकोविजानात् इतिचेत्तत्रा
ह ख्यातश्चेति ततः किंममसुतमितिकंसोमन्यते मन्येत कल्पयेदित्यर्थः ७ ननुयदुकुमारइतिकथंविजानातु तत्रवसुदेवस्य

त्वंहिब्रह्मविदांश्रेष्ठःसंस्कारान्कर्त्तुमर्हसि बालयोरनयोर्नृणांजन्मनाब्राह्मणोगुरुः ६ गर्गउवाच
यदूनामहमाचार्यःख्यातश्चभुविसर्वदा सुतंमयासंस्कृतंतेमन्यतेदेवकीसुतं ७ कंसःपापमतिःस
ख्यंतवचानकदुंदुभेः देवअष्टमोगर्भोनस्त्रीभवितुमर्हति ८ इतिसंचिंतयन्श्रुत्वादेवक्यादारिकावचः
अपिहंतागताशंकःतर्हितन्नोनयोमहान् ९ नंदउवाच अलक्षितोस्मिन्रहसिमामकैरपिगोव्रजे
कुरुद्विजातिसंस्कारंस्वस्तिवाचनपूर्वकं १०

सुतः तत्रापिदेवक्यांजातइति कुतोजानीयात्तत्राह पापमतिरित्यादि ८ किंमयाहतयामंदेत्यादिदेवकीकन्यावचः श्रुत्वादेवक्या
अष्टमोगर्भोनस्त्रीभवितुमर्हतीतिचनित्यंसंचिंतयन् सामान्येनकश्चिदस्तीति ज्ञात्वायुवयोश्चसख्यंसंचिंतयन् त्वद्गृहेभवेदितिसं
भाव्यमत्संस्कारलिंगेनच आगताशंकः आगताआशंकायस्यसः अपियदिहंताहनिष्यति तर्हीतत्तदानीमस्मानयनःस्यात् यदि
भाति द्विजातिसंस्कारं द्विजातीनामवश्यंकर्त्तव्यं संस्कारमात्रं केवलं स्वस्तिवाचनपूर्वंकुर्वंति १० ॐनमोनारायणाय ऽऽ ऽऽ

भा० द०
३२ पू०

तदा च तन्मातरौ निजसुतौ दोर्भ्यामुपगृह्य प्रमोदं ययतुः कथंभूतौ घृणया स्नेहेन स्नुवंत्यौ पयः पूर्णपयोधरे सत्यौ पंकेनांगरागेण च रुचि
चिरं कथंभूतं मुखं निरीक्ष्य मुग्धं स्मितं यस्मिन् अल्पाद् दशना यस्मिन् तच्च तत्तच्च २४ यर्हि यर्हि अंगनानां दर्शनीया दर्श
नीया कुमारलीला ययोः तथाभूतौ तदा अंतर्व्रजे अजस्य पुच्छेन तदनुलापव्रजांगनाः तौ प्रेक्षंत्यः प्रेक्ष्यमाणाः विस्मृतगृहकृत्याः

32

तन्मातरौ निजसुतौ घृणया स्नुवंत्यौ पंकांगरागरुचिरावुपगृह्य दोर्भ्यां दत्वा स्तनं प्रपिबतोः स्म मुखं मुग्धा
स्मिताल्पदशनं ययतुः प्रमोदं २४ यर्ह्यंगनादर्शनीयकुमारलीलावंतर्व्रजे तदबलाः प्रगृहीतपुच्छैः व
त्सैरितस्तत उभावनुकृष्यमाणौ प्रेक्षंत्य उज्झितगृहा जहृषुर्हसंत्यः २५ शृंग्यग्निदंष्ट्र्यसिजलद्विजकंटके
भ्यः क्रीडापरावतिचलौ स्वसुतौ निषेद्धुं गृह्याणि कर्त्तुमपि यत्र न तज्जनन्यौ शेकात आपतुरलं मनसो
नवस्थां २६ कालेनाल्पेन राजर्षे रामः कृष्णश्च गोकुले अघृष्टजानुभिः पद्भिर्विचक्रमतुरंजसा २७
ततस्तु भगवान्कृष्णो वयस्यैर्व्रजबालकैः सहरामो व्रजस्त्रीणां चिक्रीडे जनयन्मुदं २८

हसंत्यो जहृषुर्हृष्टा बभूवुः कथंभूतौ ताभ्यां प्रगृहीतानि पुच्छानि येषां तैर्वत्सैरितस्ततोऽनुकृष्यमाणौ २५ अतिचपलौ तौ शृंगादि
भ्यो निषेद्धुं गृहोचितानि कर्माणि च कर्त्तुं यत्र यदा जनन्यौ न शेकाते तदालं मनसोऽनवस्थां प्रापतुरिति गृहसौख्यस्य परा काष्ठा

दृष्टिका २४

रामः
३२

प्रति१

अराजकेनरक्ष्यमाणाः समेधिताश्च दस्यून् जिग्युरिति १७ इति चात्मानं समादिश्य आत्मानं ज्ञात्वा आशिषामाशीर्भिः बालक्रीडाचमत्कारैः इत्थं रामेण संयुतः परमानंदमाधत्ते व्रजे नन्दयशोदयोः २० पूर्णत्वमेव दर्शयन्नाह कालेनेति २१ अनुव्रज्य पुनः आक्रम्य

पुराणेन व्रजपते साधवो दस्युपीडिताः अराजके रक्ष्यमाणा जिग्युर्दस्यून्समेधिताः १७ य एतस्मिन्म
हाभागाः प्रीतिं कुर्वंति मानवाः नारयोऽभिभवंत्येतान्विष्णुपक्षानिवासुराः १८ तस्मान्नंदात्मजोयं ते नारा
यणसमो गुणैः श्रियाकीर्त्यानुभावेन गोपायस्व समाहितः १९ इत्यात्मानं समादिश्य गर्गे च स्वगृहं गते
नंदः प्रमुदितो मेने आत्मानं पूर्णमाशिषां २० बालक्रीडाचमत्कारैः इत्थं रामेण संयुतः परमानंदमा
धत्त व्रजे नंदयशोदयोः २१ कालेन व्रजताल्पेन गोकुले रामकेशवौ जानुभ्यां सह पाणिभ्यां रिंगमा
णौ विजह्रतुः २२ तावंघ्रियुग्ममनुकृष्य सरीसृपंतौ घोषप्रघोषरुचिरं व्रजकर्दमेषु तन्नादहृष्टम
नसावनुसृत्य लोकं मुग्धप्रभीतवदुपेयतुरंति मात्रोः २३

सरीसृपंतौ अतिशयेन चलंतौ कर्षंतौ वा कटिपादभूषणाकिंकिण्यः तेषां प्रघोषेण रुचिरं यथा भवति तथा तेषां घोषाणां नादेन प्रसंमनो ययोः तौ लोकं यतस्ततो गच्छंतं जनमनुसृत्य विचलुराणि पदानि अनुगम्य मुग्धवत् भीतवच्च मात्रोरंति अतिकंस

मीपकुकेपगु:उपजमतु: ३३

भा॰ द॰ रेरेचोरी आत्मा क्रुष्टः सन् उशतिजल्पति त्वमेव चोरः अहं गृहस्वामी स्यादीधाष्ट्यानि आगत्य यानि अथवा उशति उशति भो
३३ पू॰ भोकमनीये यशोदे यदा उशत्ति वास्तो स्वचिते गृहे मेहनादीनि पुरीषोत्सर्गादीनि कुरुते स्तेयोपायैर्विरचितानां कृतिः कर्मेये

33 एवं धार्ष्ट्यान्युशति कुरुते मेहनादीनि वास्तौ स्तेयोपायैर्विरचित कृतिः सुप्रतीको यथास्ते इत्थं स्त्री
भिः सभयनयनश्रीमुखालोकिनीभिर्व्याख्यातार्था प्रहसितमुखी न ह्युपालब्धुमैच्छत् ३२ एकदा
क्रीडमानास्ते रामाद्या गोपदारकाः कृष्णो मृदं भक्षितवानिति मात्रे न्यवेदयन् ३३ सा गृहीत्वा क
रे कृष्णमुपालभ्य हितैषिणी यशोदा भयसंभ्रांते प्रेक्षणाक्षमभाषत ३४ कस्मान्मृदमदांता
त्मन् भवान् भक्षितवान् रहः वदंति तावका ह्येते कुमारास्ते ग्रजोप्ययं ३५

नसः त्वत्समीपे सुप्रतीकः साधुरिवास्ते सभयेनयने यस्मिं तच्छ्रमत् श्रीयुक्तं मुखं तदालोकिनीभिः व्याख्यातार्थो प्रख्यापिकर्मफ
ला उपालब्धुमार्चत्तु नैच्छत् ३२ कदाचिद्पर्याधांतरे उपालभत तदानु महदाश्चर्यं मभूदिति कथयन्नाह एकदेति ३३ उपाल राम॰
निर्भर्त्सभयेन संभ्रांतप्रेक्षणो चपलनिरीक्षणं अक्षणीयस्वतं ३४ अदांतात्मन् चपल गात्र रहः एकांते ३५ ३३

असमयेऽदोहकाले क्रोशसंजातहासः स्तेयंचौर्यं लिंगनसुदत्तं तत्रापि स्वादु नेतरत् दधि च पयश्चाश्निति किंच भोक्ष्यन् मर्कान् मर्कटान् प्रति विभज्य ददाति तेषाम ध्येन् सत्वेन कोपि नात्ति चेत्तर्हि भांडं भिनत्ति कुचिद् द्रव्यालाभे सति सगृहान् धक्ष्यामीति एवं कुपितो याति यद्वा सगृहान्गृहस्थिताः तेभ्यः कुपितः तेषां तोकान्मर्यकादिषु सुतमनुपक्रोश्य रोदयित्वा यातीति कल्पितैः स्तेययोगैरित्युक्तं प्रपंचयति

वत्सान्मुंचन्क्वचिदसमये क्रोशसंजातहासः स्तेयंस्वाद्वत्त्यथदधिपयः कल्पितैः स्तेययोगैः मर्कान्भोक्ष्यन्विभजति सचेन्नात्ति भांडंभिनत्ति द्रव्यालाभेसगृहकुपितो यात्युपक्रोश्य तोकान् ३० हस्ताग्राह्ये रचयति विधिं पीठकोलूखलाद्यै श्छिद्रं ह्यंतर्निहितवयुनः शिक्यभांडेषु तद्वित् ध्वांतागारे धृतमणिगणं स्वांगमर्थप्रदीपं कालेगोप्यो यर्हिगृहकृत्येषु व्यग्रचित्ताः ३१

हस्ताग्राह्ये हस्तेनाग्रहीतुमशक्ये शिक्यस्य भांडेषु अंतर्निहिते दध्यादौ वयुनं ज्ञानं यस्य सः छिद्रं रचयतीति तद्वित् छिद्ररचनादिवित् ध्वांतयुक्ते गृहे स्वांगमेवार्थप्रदीपं रचयति विशेषतो धृतमणिगणं यर्हि यस्मिन्काले ३१

भा॰ द॰ तामाह किं स्वप्न इति परितोविलोक्य विकल्पयाह नायं स्वप्नः तर्हि किं चिद्देवास्य हरेर्माया तथा चेत्कि मन्येन पश्यंति तर्हि किं वा मदीय एव कश्चि
३८ प्र॰ द्बुद्धिमोहः विपर्यासो दर्पणेमुखवत् एवं तर्हि एवं कश्चोपि कश्चिमंतः प्रतीयते अंतर्बहिश्चैकरूपेण कथं जगत्प्रतीयते तथा सनि विं
तु प्रतिबिंबयोरिव परस्परं वैपरीत्येन प्रतीतिः स्यादित्याशंक्य अन्यथा वितर्कयति अथो इति अथ एक मम अमुष्य अर्भकस्यापि सतो

किं स्वप्न एतदुत देवमाया किं वा मदीयो वत बुद्धिमोहः अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आ
त्मयोगः ४० अथो यथावन्न वितर्कगोचरं चेतोमनःकर्मवचोभिरंजसा यदाश्रयं येन यतः प्रतीय
ते सुदुर्विभाव्यं प्रणतास्मि तत्पदं ४२ अहं ममासौ पतिरेष मे सुतो व्रजेश्वरस्याखिलवित्तपा सती
गोप्यश्च गोपाः सहगोधनाश्च मे यन्माययेत्थं कुमतिः स मे गतिः ४२

यः कश्चनाचिंत्यात्मयोगः स्वीव मे श्चर्ययोत्पत्तिकः स्वाभाविकः ४१ चरमं पक्षमाश्रित्य अयमेवेश्वर इति निश्चित्याह अथो
इति चेतः चित्तं चित्ता दिभिर्निवर्त्तकं गोचरं जगद्यदाश्रयं यदधिष्ठानं येन कारनेणाधिष्ठा जायते बुद्धिवृत्तिभिव्यक्तात्
नेन्विदम वितर्क्यं भवतु तत्पदं कीदृगत आह सुदुर्विभाव्यमिदं असंतमचिंत्यमिति सर्पः ४२ एवं प्रपंच प्रतीत्यां प्रतीतं तत्त्वपुन राम॰
जीवसंसृति हेतुमायाश्रयत्वेनांत्रयं स्याह ४२ ३८

व्यादेहि मुखं प्रसारयेति व्यादत्त प्रसारितवान्

नाहं भक्षितवानिति नहि वाहं किंचिन्मया भक्ष्यते मत्कुक्षावादावेव सर्वमस्तीति भावः समक्षं प्रत्यक्षं ३६ तत्र तस्मिन्मुखे विश्वं ददृशे ददर्श तस्य प्रपंचयति जगज्जंगमं स्थास्नु स्थावरं खमंतरिक्षं लोकं साद्रिद्वीपाब्धिभूगोलं पर्वतद्वीपसमुद्रसहितं भूगोलं भूर्लोकं वायुः प्रवहः अग्निर्वैद्युतः इंदुश्च तारकाश्च तत्सहितं ३८ ज्योतिश्चक्रं स्वर्लोकं वैकारिकाणि देवाः मन इति वैकारिकं श

नाहं भक्षितवानंब सर्वे मिथ्याभिशंसिनः यदि सत्यगिरः तर्हि समक्षं पश्य मे मुखं ३६ यद्येवं तर्हि व्यादेही
त्युक्तः स भगवान् हरिः आदत्ता व्याहतैश्वर्यः क्रीडामनुजबालकः ३७ सा तत्र ददृशे विश्वं जगत्स्थास्नु च खं दि
शः साद्रिद्वीपाब्धिभूगोलं सवाय्वग्नींदुतारकं ३८ ज्योतिश्चक्रं जलं तेजो नभस्वान्वियदेव च वैकारिकाणी
द्रियाणी मनो मात्रा गुणास्त्रयः ३९ एतद्विचित्रं सहजीवकालस्वभावकर्माशयलिंगभेदं सूनोस्तनौ वी
क्ष्य विदारितास्ये व्रजं सहात्मानमवाप शंकां ४०

ब्देन गृहीतमपि देववैलक्षण्यात् पुनरुक्तं इंद्रियाणि च तैजसानि मात्राः तामसाः शब्दादयः ३९ एवं तद्विचित्रं विश्वं सहैकदेवं वीक्ष्य शंकामवापेत्यन्वयः विचित्रतामाह जीवश्च गुणक्षोभकः कालश्च परिणामहेतुः स्वभावश्च जन्महेतुः कर्म च तत्संस्कारः आशयश्च तैर्लिंगानां चराचरशरीराणां भेदो यस्मिन् तत् व्रजं च सहात्मानं स्वसहितं कञ्चिद्दीप्य सूनोस्तनौ अत्यंत विदारितेऽस्ये

संकामवाप ४०

भा॰ द॰ ब्रह्मण आदेशं गोपालनादिलक्षणं ५० द्रोणो जज्ञे स च नंद इति ख्यातः सा च धरा यशोदाभवत् अस्त्विसुक्तः स एव देतिवा ५१
३५ पृ॰ गोपगोपीनामपि वस्तुस्वभावादस्येव भक्तिः तयोः पुनः नितरामिति ५३ स्वलीलया पुत्रभावाचुकारिणः ५४ इति श्री
भावार्थदीपिकायां दशमे ऽष्टमः ८ नवमे पयउत्सिक्तो गत्वा गोप्य पयन्तकृतं विलोक्य भांड भंगादि कृष्णं दाम्नावबं

35

शुकउवाच द्रोणो वसूनां प्रवरो धरया सह भार्यया करिष्यमाण आदेशं ब्रह्मणस्तमुवाच ह ५० जात
योर्नौ महादेवे भुवि विश्वेश्वरे हरौ भक्तिः स्यात्परमा लोके ययांजो दुर्गतिं तरेत् ५१ अस्त्वित्युक्तः स
ब्रजे द्रोणो महायशाः जज्ञे नंद इति ख्यातो यशोदा सा धराभवत् ५२ ततो भक्तिर्भगवति पुत्रभूते ज
नार्दने दंपत्योर्नितरामासीद्गोपगोपीषु भारत ५३ कृष्णो ब्रह्मण आदेशं शत्यं कर्तुं ब्रजे भुवि स
हरामो वसंश्चक्रे तेषां प्रीतिं स्वलीलया ५४ इति श्रीभागवते दशमस्कंधे ऽष्टमोध्यायः ८ शुक उ॰
एकदा गृहदासीषु यशोदा नंदगेहिनी कर्मांतरनियुक्तासु निर्ममंथ स्वयं दधि १ यानि यानीह गीता
नि तद्बालचरितानि च दधिनिर्मंथने काले स्मरंती तान्यगायत २

धृतं तन्नदरालोकितं विश्वं दृष्ट्वा विस्मितचेतसः बंधनं श्रुत्वा पूर्ण्या पूर्णिमा मन्वदर्शयत् स्वयं दधि निर्ममंथ तदा चागाय

अहमिति यशोदानामाहं असौ मम पति अमुष्य व्रजेश्वरस्याखिलवित्तपा सति अधिष्ठात्री अहं सती जाया रक्षकः अमी मे सुताः
गोपादयश्च मदीया इत्यतः स्वयं कुमतिः यन्मायया स एष मे शरणमिति ४३ वैष्णवीं स्वीयां आरोहमुत्संगं प्रवृद्धस्नेहेन कलिलं व्या
प्तं हृदयं यस्याः सा पुरीवासीत् ४६ मायावतोऽङ्केकमाह त्रय्या इंद्रियादिरूपेण उपनिषद्भिः ब्रह्मेति सांख्यैः पुरुष इति योगैः

इत्थं विदिततत्वायां गोपिकायां स ईश्वरः वैष्णवीं व्यतनोन्मायां पुत्रस्नेहमयीं विभुः ४५ सद्योनष्टस्मृती
र्गोपी सारोप्यारोहमात्मजं प्रवृद्धस्नेहकलिल ० हृदयासीद्यथापुरा ४६ त्रय्या चोपनिषद्भिश्च
सांख्ययोगैश्च सात्वतैः उपगीयमानमाहात्म्यं हरिं सामन्यतात्मजं ४७ राजोवाच नंदः किमकरो
द्ब्रह्मन् श्रेय एवं महोदयं यशोदा च महाभागाः पपौ यस्याः स्तनं हरिः ४८ पितरौ नान्वविंदेतां कृष्णो
दारार्भकेहितं गायंत्यद्यापि कवयो यल्लोकशमलापहं ४९

परमात्मेति सात्वतैर्भगवानिति उपगीयमानं माहात्म्यं यस्य तं ४७ अतिविस्मयेन पृच्छति नंद इति महोदयः महानुदय
उद्भवो यस्य तत् ४८ ययोः प्रसन्नोऽवतीर्णः तौ पितरावपि यत् नान्वविंदेतां न प्रापतुः कृष्णस्य उदारं महत् अर्भकेहितं
बाललीलां यच्च कवयो गायंति अकरोत् ब्रह्मण आदेशात् गोपालनादिलक्षणात् स एव ४९ ॐ नमो नारायणाय

भा॰ द॰ तपसादपाजतोरितं तदाकारणानीतं अलएवं क्षमं योग्यं प्रवेष्टं योगिनां मनोपि नापतं प्रयत्ना अन्वधावत् केवलं तत्वायपतो योगिनांम
३६ पू॰ नोपियं प्रवेष्टं न क्षमं मिति ९ अन्वञ्चमाना जननी एवंकृत्स्नमन्वगच्छंती वृहत्यौ श्चलंती या श्रोणी तस्या भरणेन क्रांतास्तब्धा
गतिर्यस्याः केशबंधात् च्युतैः प्रसूनैरनुगतिर्गमनं यस्याः सा यद्वा जवेन कंपिता त्वोशबंधात् पुरः पतितानि प्रसूनानि अनुप

तामात्तयष्टिं प्रसमीक्ष्य सत्वरस्ततोवरुह्यापससारभीरुवत् गोप्यान्वधावन्नयमापयोगिनां क्षमं प्रवे
ष्टुं तपसेरितं मनः ९ अन्वञ्चमाना जननी बृहच्चलच्छ्रोणीभराक्रांतगतिः सुमध्यमा जवेन विस्रंसि
तकेशबंधनच्युतप्रसूनानुगतिः परामृशत् १० कृतागसं तं प्ररुदंतमक्षिणी कषंतमंजन्मषिणी स्वपा
णिना उद्वीक्षमाणं भयविह्वलेक्षणं हस्ते गृहीत्वा भिषयंत्यवागुरत् ११ त्यक्त्वा यष्टिं सुतं भीतं विज्ञा
यार्भकवत्सला इयेष किल तं बद्धुं दाम्नातद्वीर्यकोविदा १२

36

श्चाक्रांतिर्यस्याः सा परामृशत् धृतवती पृथ्वापस्पर्शो वेद महाएवं विनिर्मथ्य मत्वा खिन्नया पश्चादुपनिषन्मार्गमनुसरति आत्मानं
प्राप्नोति तया निजसुत माप १० किं कुर्वंतमंजन्मषिणी अंजंती सर्वतः प्रसरंती मषी ययोस्ते अक्षिणी स्वपाणिना कर्षं
तं संसुमर्दयंतं भिषयंती दृश्यः छांदसः भीषयंती भयमुत्पादयंती अवागुरत् अभर्त्सयत् ११ इयेष ऐच्छत् अतद्वीर्यकोवि दाम॰
दा तत्प्रभावानभिज्ञा १२ ३६

स्रस्तं नद्धं कांचीवद्धं रज्वोराकर्षणेन भ्रमो ययोः तयोर्भुजयोश्चलंतौ कंकणौ च कटकौ च वाहिगतं त्योत्वालतो यस्याः सा ३ अधि
श्रिते चुल्लीमारोपिते अतितापेनोत्सिच्यमाने ५ दंशाद्दश्मना शिलापत्रेण अंतर्गेहमध्यं गतः रहः एकान्ते नवनीत

क्षौमं वासः पृथुकटितटे विभ्रती सूत्रनद्धं पुत्रस्नेहस्नुतकुचयुगं जातकंपं च सुभ्रुः रज्ज्वाकर्षश्रमभुजचलत्
कंकणौ कुंडले च स्विन्नं वक्त्रं कवरविगलन्मालती निर्ममंथ २ तां स्तन्यकाम आसाद्य मथ्नंतीं जननीं हरिः
गृहीत्वा दधिमंथानं न्यषेधत् प्रीतिमावहन् ४ तमंकमारोप्य यमपाययत् स्तनं स्नेहस्नुतं सस्मितमीक्षती मुखं
अतृप्तमुत्सृज्य जवेन सा ययावुत्सिच्यमाने पयसि त्वधिश्रिते ५ संजातकोपः स्फुरितारुणाधरः संदश्य
दद्भिर्दधिमंथभाजनं भित्वा मृषाश्रुर्दृषदश्मना रहो जहार हैयंगवमंतरंगतः ६ उत्तार्य गोपी सुशृतं
पयः पुनः प्रविश्य संदृश्य च दध्यमत्रकं भग्नं विलोक्य स्वसुतस्य कर्म तज्जहास तं चापि न तत्र पश्यती ७
उलूखलांघ्रेरुपरि व्यवस्थितं मर्काय कामं ददतं शिचि स्थितं हैयंगवं स्तेयविशंकितेक्षणं निरीक्ष्य पश्चा
त्सुतमागमच्छनैः ८

मभवदयत् ६ सुश्रुतं सुन्दरं पक्वं उत्तार्य दधिमंथानस्थानं प्रविश्य भिन्नं संदृश्य दृष्ट्वा दध्यमत्रकं वटी ७ उलूखलांघ्रेः
परिवर्त्तितस्योपरि शिचिशिक्यं चौर्येण विशंकितं चंचलं ईक्षणं यस्य तं ८

भा॰ द॰ फलितमाह नायमिति देहिनां देहाभिमानिनां तापसादीनां ज्ञानिनां निवृत्ताभिमानिनामपीति आत्मपोतानामेव पोतस्तरणसाधनं
३७ पू॰ यथाभक्तानां सुखापः यशोदायाः कृष्णबंधने प्रतिज्ञा अयं मया बंधनीय एवेति कृष्णस्य स्वबंधानिवृत्तौ प्रतिज्ञा इयं ब्रह्मांड
गतं तरज्वापि किं मां बद्धुं शक्नोति न तावत्कृष्ण इति विचार्य अहं कृपया भक्ताधीनो स्वयं प्र इति द्वित इव भगवान्स्य कृतघ्नानां

37

नायंसुखापो भगवान्देहिनां गोपिकासुतः ज्ञानिनां चात्मभूतानां यथा भक्तिमतामिह २१ कृष्ण
स्तु गृहकृत्येषु व्यग्रायां मातरि प्रभुः अद्राक्षीदर्जुनौ पूर्वं गुह्यकौ धनदात्मजौ २२ पुरा नारदशा
पेन वृक्षतां प्रापितौ मदात् नलकूवरमणिग्रीवाविति ख्यातौ श्रियान्वितौ २३ इति श्रीभागवते
महापुराणे दशमस्कंधे गोपीप्रसादो नाम नवमोध्यायः ९ राजोवाच कथ्यतां भगवन्नेतत्तयोः शा
पस्य कारणं यत्तद्विगर्हितं कर्म येन वा देवर्षेस्तमः शुक उवाच रुद्रस्यानुचरौ भूत्वा सुदृप्तौ धनदात्म
जौ कैलासोपवने रम्ये मंदाकिन्यां मदोत्कटौ २

दूरीकुर्वन् मम व्रति ज्ञान मम भक्तस्येति स्वबंधनं स्वीकृतवान् एवं गोपीप्रतिज्ञा कथं ज्ञाता तत्राह खिन्नगात्राइति
२१ भक्तैर्वद्धस्यापि अन्यमोचकत्वं वक्तुमाह कृष्णस्त्विति २२ इति श्रीभावार्थदीपिकायां दशमे नवमः ९ दशमे रामः
पातय ... ज्ञा ... न्नंतरा ... यमुलार्जुनौ तत्रा ताभ्यां देवाभ्यां कृष्णस्तुत इतीर्यते १ क्रोधः तदेतत्कथ्यतामिति १ ३७
यद्विगर्हितं कर्म येन वा देवर्षेभोगवतोत्तमस्यापितमः १

ग्र को विद्धत्वमेवाह नचांतरिति यंचभिः बंधनं द्विविधः परिच्छिन्नेन दाम्नांतरा च्छन्नस्य भवति तथा पूर्वापर भागवतोवस्तुनः पूर्वतोदाम ध्य
त्वापरतः परवेष्टनेन भवति नत्वेतदस्तीत्याह नचांतरिति किंचिद्व्यापकत्वेन व्याप्यस्य बंधो भवति तच्च विपरीत मित्याह पूर्वाप
रमिति किंचेत द्व्यतिरिक्तस्य चाभावान्नवध इत्याह जगन्मय इति १३ तं मत्वेति लिंगम धोक्षजमात्मजं मत्वा तु वंधेति १४ व्यंगुलो

नचांतर्नवहिर्यस्य न पूर्वं नापिचापरं पूर्वापरं वहिश्चांतर्जगतो योजगन्मयः १३ तं मत्वात्मजमव्यक्तं मर्त्यलिं
गमधोक्षजं गोपिकोलूखले दाम्ना ववंध प्राकृतं यथा १४ तद्दाम बध्यमानस्य स्वार्भकस्य कृतागसः द्व्यंगुलो
नमभूत्तेन संदधेन्यच्च गोपिका १५ यदासीत्तदपि न्यूनं तेनान्यदपि संदधे तदपि द्व्यंगुलं न्यूनं यद्यदादत्त वंधनं १६
एवं स्वगेह दामानि यशोदा संदधत्यपि गोपीनां सुस्मयंतीनां स्मयंती विस्मिताभवत् १७ स्वमातुः स्विन्नगात्रा
या विस्रस्तकवरस्रजः दृष्ट्वा परिश्रमं कृष्णः कृपयासीत्स्ववंधने १८ एवं संदर्शिता ह्यंग हरिणा भृत्यवश्यता
स्ववशेनापि कृष्णेन यस्येदं सेश्वरं वशे ॥ १९ नेमं विरिंचिर्न भवो न श्रीरप्यंगसंश्रया प्रसादं लेभिरे गोपी यत्तत्प्राप
विमुक्तिदात् २० पी

नं द्वाभ्यामंगुलिभ्यामपूर्णं १५ स्मितं कुर्वतीनां मध्ये स्वयमपि हसंती विस्मयमाप १७ नचैव स्वातंत्र्य भंग इत्याह एवं संदर्शितेति से
श्वरमिदं विश्वं यस्य वशे यदधीनमित्यर्थः १९ भगवत्प्रसादमन्येपि भक्ता लभंते इदं त्वति चित्र मिति सरोमांचेत माह नेम मिति
विरिंचिः ब्रह्मापि भवः स्वात्मापि श्रीर्जायापि २० ॥ गोपिन्नेभिरेउखलवंधने विमुक्तिदात्प्रसादं यत् प्राप तत्
प्रसादं विरंचिन प्राप न भव न प्राप श्रीर्न प्राप ॥ २० ॥

नरदेवभूदेवसंज्ञितमपि श्वादिभिर्भक्षितं विट्संज्ञितं अथवा दग्धं भस्मसंज्ञितं अथवा दग्धं कृमिसंज्ञितं तत्कृते तदर्थं यो भूतध्रुक्
क्रोधाद्यतो भूतद्रुहान्निरये भवति किं स्वार्थं न वेद स्वार्थः १२ निषेक्तुः पितुः मातुः पितुर्वा मातामहस्य पुत्रिकाकरणे १३
अव्यक्तप्रभवाप्ययं अव्यक्तात्प्रभवः तस्मिन्नेवाप्ययो यस्य तमात्मसात्कृत्वा आत्मेति मत्वा असतो मूढानसते १४ एवं श्री

38

देवसंज्ञितमप्यंते कृमिविड्भस्मसंज्ञितं भूतध्रुक्तत्कृते स्वार्थं किं वेद निरयो यतः १२ देहः किमन्नदातुः स्वं
निषेक्तुर्मातुरेव वा मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनोऽपि वा १३ एवं साधारणं देहं अव्यक्तप्रभवाप्य
यं को विद्वानात्मसात्कृत्वा हंति जंतूनृतेऽसतः १४ असतः श्रीमदांधस्य दारिद्र्यं परमंजनं आत्मौ
पम्येन भूतानि दरिद्रः परमीक्षते १५ यथा कंटकविद्धांगो जंतुर्नेच्छति तां व्यथां जीवसाम्यं गतो लिंगै
र्न तथाविद्धकंटकः दरिद्रो निरहस्तंभो मुक्तः सर्वमदैरिह कृच्छ्रं यदृच्छयाप्नोति तद्धि तस्य परं तपः १७
॥१६॥

मदविचेष्टितमुक्त्वा तत्प्रतीकारं निरूपयति असत इति परं श्रेष्ठं केवलं दारिद्र्यमेव कुत इत्याह आत्मौपम्येनेति ततो न द्रुह्यतीति भा
वः १५ सदृष्टांतमाह यथेति सुखदुःखान्या लिंगैः सर्वेषां जीवानां सुखदुःखे समे इति ज्ञातव्यानेस्यर्थः १६ किंच दारिद्र्यं मोक्षम राम:
पि साधयतीत्याह श्लोकचतुष्टयेन निरहस्तंभो निर्गतो हंकाररूपः स्तंभो यस्य १७ ॐ नमो भगवते वासुदेवाय श्रीरामाय नमः ३८

पुनर्नवास्य त्रि पिष्टैर्विदित्वा वारुणीस्मृता ३ गंगायामंतर्मध्ये कथं भूते अंभोजानां वनानि तेषां राजयः ता विद्यंते यस्मिन् ४ अपश्यत् दृष्ट्वा चक्षीवाणो मत्तो समबुध्यत ५ उतः इत्यतः आह तां दृष्ट्वेति ६ अनुग्रहार्थं यं अनुग्रहश्च मदनाशश्च अर्थं श्रीहस्मदर्शनं तदर्थं इदं वक्ष्यमाणं ७ न ह्यन्य इति ज्येष्ठान्प्रमादान्विषयान् जुषतः सेव्यमानस्य पुंसः श्रीमदादन्यः

वारुणीं मदिरां पीत्वा मदघूर्णितलोचनौ स्त्रीजनैरनुगायद्भिश्चेरतुः पुष्पिते वने ३ अंतः प्रविश्य गंगायामंभोजवनराजिनि चिक्रीडतुर्युवतिभिर्गजाविव करेणुभिः ४ यदृच्छया च देवर्षिर्भगवांस्तत्र कौरव अपश्यन्नारदो देवौ क्षीबाणौ समबुध्यत ५ तं दृष्ट्वा व्रीडिता देव्यो विवस्त्राः शापशंकिता वासांसि पर्यधुः शीघ्रं विवस्त्रौ नैव गुह्यकौ ६ तौ दृष्ट्वा मदिरामत्तौ श्रीमदांधौ सुरात्मजौ तयोरनुग्रहार्थाय शापं दास्यन्निदं जगौ ७ नारद उवाच न ह्यन्यो जुषतो जोष्याद्बुद्धिभ्रंशो रजोगुणः श्रीमदादाभिजात्यादिर्यत्र स्त्री द्यूतमासवः ८ हन्यंते पशवो यत्र निर्दयैरजितात्मभिः मन्यमानैरिमं दे

अभिजात्यादिः सत्कुलविद्यादिजनितो मदः अन्यो वा रजोगुणः रजः कार्यं हास्यहर्षादिरूपो न हि तथा बुद्धिभ्रंशः बुद्धिं भ्रंशयतीति तथा किं तु श्रीमद एवेति ८ हन्यंते इत्यादिभिः चतुर्भिः यत्र श्रीमदे इमं नश्वरं देहमजरामृत्यु अजरश्च अमृत्युश्च यथा भवति तथा मन्यमानैः ९

भा॰ द॰ यमयोर्यमलयोः सहजातयोः आत्मनः कृष्णस्य तन्मध्यप्रवेशमात्रेण तिर्यग्गतत्वपादत्वेनोलूखलतास्तो दृष्टत्वंजातमिति २७ अनु च प्र
३९ पू॰ चेतीसन्बक तच्च हेतुः दामोदरेणेति उत्कलितउत्सादित अग्निबंधो मूलबंधा ययोस्तौ परमस्य श्रीकृष्णस्य विक्रमितं विक्रमः
तेनातिवेपः अतिकंपो येषु ते स्कंधश्च वाल विटपाय योस्तौ २८ ककुभः सर्वतः स्फुरंतौ इत्यर्थः यद्वा दिवः प्रकाशयंता वितिवा

३९ इत्यंतरेणार्जुनयोः कृष्णस्तु यमयोर्ययौ आत्मनिर्वेशमात्रेण तिर्यग्गतमुलूखलं २७ बालेन निष्क
य र्षतान्वगुलूखलं तद्दामोदरेण तरसोत्कलितांघ्रिबंधौ निष्पेततुः परमविक्रमितातिवेपस्कंदप्रवाल
विटपौ कृततचंडशब्दौ २८ तत्र श्रिया परमया ककुभः स्फुरंतौ सिद्धावुपेत्य कुजयोरिव जातवेदाः
कृष्णं प्रणम्य शिरसाखिललोकनाथं बद्धांजली विरजसाविदमूचतुः स्म २९ कृष्ण कृष्ण महायोगिं
स्त्वमाद्यः पुरुषः परः व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः ३०

२९ गोपालं मां युवां देवो किमिति प्रणतौ इति चेत्तत्राहतुः हे कृष्ण कृष्ण महायोगिन् अचिंत्यप्रभावः त्वं न बालः किंतु परः
पुरुषाय तमाद्यः कारणभूतः तत्रापि न निमित्तमात्रं किंतूपादानमपि त्वमेवेत्याशयेन तुष्टवतुः व्यक्ताव्यक्तमिति स्थूलसूक्ष्म रामः
मिदं ते रूपं विदुः ३० ३९

युज्यंते स्वत एव संगच्छंते तर्षं तत्सां १९ ननु साधूनां नाधिक एव प्रियः स्यान्न दरिद्र इति तत्राह साधूनामिति धनेस्तंभो गर्वो येषां तैः
२० तमोमदमज्ञानकृतं मदं स्त्रैणयोः स्त्रीजितयोः २१ तमः प्लुतौ तमोव्याप्तौ २२ शापति अतोऽर्हतामिति अनुग्रहमाह तिस्यातां नैवमि

निस्वं क्षामदेहस्य दरिद्रस्यान्नकांक्षिणः इंद्रियाणि विशुष्यंति हिंसापि विनिवर्तते १८ दरिद्रस्य हि युज्यंते
साधवः समदर्शिनः सद्भिः क्षिणोति तं तर्षं तत आराद्विशुध्यति १९ साधूनां समचित्तानां मुकुंदचरणैषिणां
उपेक्ष्यैः किं धनस्तंभैरसद्भिरसदाश्रयैः २० तदहं मत्तयोर्माध्व्या वारुण्या श्रीमदांधयोः तमोमदं हरिष्यामि स्त्रै
णयोरजितात्मनो २१ यदिमौ लोकपालस्य पुत्रौ भूत्वा तमःप्लुतौ न विवाससमात्मानं विजानीतः सुदुर्मदौ २२
अतोर्हतः स्थावरतां स्यातां नैवं यथा पुनः स्मृतिः स्यान्मत्प्रसादेन तत्रापि मदनुग्रहात् २३ वासुदेवस्य सांनिध्यं लब्ध्वा
दिव्यशरच्छते वृत्ते स्वर्लोकतां भूयो लब्धभक्ती भविष्यतः २४ शुक उवाच एवमुक्त्वा स देवर्षिर्गतो नारायणाश्रमं
नलकूवरमणिग्रीवावासतुर्यमलार्जुनौ देवर्षिर्मे प्रियतमो यदिमौ धनदात्मजौ तत्तथा साधयिष्यामि यद्गीतं तत्
अथ भगवानमुष्य सत्यं कर्तुं वचो हरिर्जगाम महात्मना २६
सनकेतनयभ्रातौ यमलार्जुनौ २५

त्यादिना मत्प्रसादेन स्मृतिः स्यात् स्वर्लोकतां देवत्वं पुनर्लब्ध्वा तस्मिन्मदनुग्रहात् लब्धभक्ती भविष्यत इति २४ प्रस्तुतमाह २५
येरिति २५ किमिति सत्यं कर्तव्यं तत्राह देवर्षिर्यद्यत्तः तत्ततः २६

वा

भा. द. ञो भावां अनुचरः कुवेरः नारदोतस्य किंकरौ भगवत्स्तावदर्शनं ३७ तत्र गतमोजावयोः पूर्वस्वभावो माभूत् किंतुवाणीगुणानुकथने इत्या
४. पू. दिना अस्मदोईयो श्लोति द्विवचनस्यानेव हुवचनं अस्मत्संगिनां सर्वेषामपीति वहुवचनं तवनिवासभूतं यज्जगत् तस्य प्र
णामे शिरोस्त्वित्यर्थः भवत्तन्वनां भवन्मूर्तीनां ३८ संकीर्त्तितः संस्तुतः ३९ वाग्भिः नद्यन्योजुषतोजोष्यानित्या दिभिः श्रीवि

अनन्तानीहतो भमन्नवीन चरकिंकरो दर्शनं नौ भगवतः कुबेरासी दनुग्रहात्।

नमः परमकल्याण नमः परममंगलः वासुदेवाय शांताय यदूनां पतये नमः ३७ वाणी गुणानुक
40 थने श्रवणौ कथायां हस्तौ च कर्मसु मनः तव पादयोर्नः स्मृत्यां शिरस्तव निवासजगत्प्रणामे दृष्टिः सतां २२
दर्शनेस्तु भवत्तनूनां ३८ शुक उवाच इत्थं संकीर्त्तितः ताभ्यां भगवान्देवकीसुतः दाम्नाचोलूख
लेवद्धः प्रहसन्नाह गुह्यकौ ३९ भगवानुवाच ज्ञातं मम पुरैवैत दृषिणा करुणात्मना यच्छ्री
मदांधयोर्वाग्भिर्विभ्रंशोनुग्रहः कृतः ४० साधूनां समचित्तानां सुतरां मत्कृतात्मनां दर्शनान्नो भवे
द्वंधः पुंसोक्ष्णोः सवितुर्यथा ४१॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

भ्रंशरूपोनुग्रहः कृत इति ४० युक्तमेवैतदित्याह साधूनां सुधर्मवर्त्तिनां समचित्तानां मात्मविदां सुतरां मत्कृतात्मनां मय्यर्पि राम:
तचित्तानां तेषां कृपातिरेकात् सुतरामिति सूक्तं सवितुर्दर्शनादक्ष्णोर्यथा न भवेत् तद्वत् ४१ ॐ नमो नारायणाय ११ ४०
बंधो

नियंतावपि त्वमेवेत्याहतुः त्वमेक इति देहः असवः प्राणाः आत्मा अहंकारः इंद्रियाणि च तेषामीश्वरः तत्रास्य कालो नि
मित्तं प्रकृतेः क्षोभमहान् विष्ण्वात्मतया परिणाममे पुरुषः कर्त्ता नियंता किमत्राह मत आहतुः त्वमेव काल इत्यादिना सादेनय
नो भगवानीश्वरो विष्णुः त्वमतः कालो नाम ३१ तवलीला प्रकृतिः शक्तिः पुरुषोऽध्यक्षः महान् कार्यमतः त्वमेव सर्वमित्यर्थः ३२
नन्वहं चेत्सर्वं तर्हि घटादिज्ञानेन मज्ज्ञानं किं न भवति चेत्सर्वोपि ब्रह्मवित् स्यात् अत आहतुः गृह्यमाणैरिति दृश्यत्वेन
वर्त्तमानैः बुद्ध्यहंकारेंद्रियादिभिः द्रष्टा त्वं न गृह्यसे इति भावः ननु तर्हि जीवो जानातु नेत्याहतुः कोन्विहेति जीवा

त्वमेकः सर्वभूतानां देहस्वात्मेंद्रियेश्वरः त्वमेव कालो भगवान्विष्णुरव्यय ईश्वरः ३१ त्वं महान्प्रकृतिः
सूक्ष्मा रजःसत्वतमोमयी त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ३२ गृह्यमाणैस्त्वमग्राह्यो विका
रैः प्राकृतैर्गुणैः कोन्विहार्हति विज्ञातुं प्राक्सिद्धं गुणसंवृतः ३३ तस्मै तुभ्यं भगवते वासुदेवाय वे
धसे आत्मद्योतगुणैश्छन्नमहिम्ने ब्रह्मणे नमः ३४ यस्यावतारा ज्ञायंते शरीरेष्वशरीरिणः तैस्तैरतु
ल्यातिशयैर्वीर्यैर्देहिष्वसंगतैः ३५ भगवान् सर्वलोकस्य भवाय विभवाय च अवतीर्णोंऽशभागेन सां
प्रतं पतिराशिषां ३६

द्यतेः प्रागेव स्वप्रकाशतया सिद्धं त्वां को वा जानाति गुणसंवृतो देहाद्यावृतः ३३ अतो दुर्ज्ञेयत्वात् केवलं प्रणमतः तस्मै तु
भ्यमित्यादिना स्वस्माद्द्योतः प्रकाशो येषां तैर्गुणैः छन्नो महिमा यस्याच्छादितः तस्मै ३४ अहो त्वमीश्वर इति कुतो ज्ञातं
त्वया आहतुः यस्येति ३५ भवाय उद्भवाय विगतो भवो यस्मिंस्तस्मै कैवल्यायेत्यर्थः ३६ ॐ नमो भगवते वासुदेवाय ॥

भा॰ द॰ तत्तद्द्वयंप्रत्यक्षतःपुरतोदृश्यमपिपतनकारणमविज्ञायबभ्रमुः २ तद्द्वयंकारणमुलूखलमिति भ्रमकारणमाह कस्येदंशान्त
४१ चू॰

41

भूम्यां निपतितौ तत्र ददृशुर्यमलार्जुनौ । बभ्रमुः तमविज्ञायलक्ष्यं पतनकारणं ॥२॥ उलूखलं विक-
र्षन्तं दाम्नाबद्धंचबालकं कस्येदंकुत आश्चर्यमुत्पात भयकातराः ॥३॥ बाला ऊचुरनेनेति ति-
र्यग्गतमुलूखलं विकर्षतामध्यगेनपुरुषावपिचक्ष्महि ४ ॥ ॥ ॥ ॥

सा॰ दे॰ कस्यकुतोवाकारणात् अहो आश्चर्यं उत्पातः इतिकातराः भीताः संतस्तेबभ्रमुरित्यन्वयः मध्यगेनवृक्षयोर्मध्यगेनकेवल श्रा॰ म॰
मेतावत् वृक्षाभ्यांनिर्गतौदिव्यौपुरुषावपिचक्ष्महि दृष्टवंतोवयमिति ४ ४१

एव॰ प्रभवःन भवोयस्मि

प्राधान्यादेकस्यसंबोधनं हेनलकूवरयुवांसाधनंसदनं निकेतनं मत्परमौसंतौ गच्छतंवांयुवयोरपेक्षितोमयिप्रेमाजातंइति

तद्गच्छतंमत्परमौनलकूवरसादनं संजातोमयिभावोवामीप्सितःपरमोभवः ४२ शुकउवाच
इत्युक्तौतौपरिक्रम्यप्रणम्यचपुनःपुनः बद्धोलूखलमामंत्र्यजग्मतुर्दिशमुत्तरां ४३ इति
श्रीभागवतेमहापुराणेदशमस्कंधेनलकूवरमणिग्रीवमोक्षोनामदशमोध्यायः १० शुकउ॰
गोपानंदादयःश्रुत्वाद्रुमयोःपततोरवं तत्राजग्मुःकुरुश्रेष्ठनिर्घातभयशंकिताः १

भाव॰ ४२ बद्धोलूखलंबद्धमुलूखलंयस्मिंस्तं ४३ इतिभावार्थदीपिकायांदशमेदशमः १० एकादशेसमागत्यवृंदा
वनमथार्भकैः वत्सान्पालयतानेनहतोवत्सबकासुरौ १

तेषामेवं व्रजस्यहर्षमुवाहेति ९ शुचिः कृतस्नातः १२ अजोहवीत् आजुहाव अतिवेलमतिक्रांतसमयं १५ व्रजकार्य

स

परस्परस्यवयस्यांतेमातरः प्रास्वलंकृतान् तंचस्नातः कृताहारो विहरस्वस्वलंकृतः १३ ओपेयातांयदा तौक्री

डासंगेनपुत्रकौ यशोदाजेषयामासरोहिणीपुत्रवत्सलां १४ इत्थंयशोदातमशेषशेखरं मत्वासुतंस्नेहनिब

द्धधीर्नृप हस्तेगृहीत्वासहराममच्युतं नीत्वास्ववाटं कृतवत्यथोदयं १५ क्रीडंतंसा कृतंवालैरतिवेलंसह

ग्रजं यशोदाजोहवीत्कृष्णंपुत्रस्नेहस्नुतस्तनी १६ कृष्णकृष्णारविंदाक्ष तातएहिस्तनंपिब अलंविहारैः क्ष

त्क्षांतः क्रीडाश्रांतोसिपुत्रक १७ हेराम गच्छताताशुसानुजः कुलनंदन प्रातरेवकृताहारः तद्भवान्भोक्तुम

त्वा हेति १७ प्रतीक्षतेत्वांदाशार्ह भोक्ष्यमाणोव्रजाधिपः एह्यावयोःप्रियंदेहि स्वगृहान्यातवालकाः १८ इत्यानीय

गृहंकृष्णंयशोदामंगलाहणैः अभ्यर्च्यभोजयित्वातु मुदमापपयस्विनी १९ वनंवृंदावनंगंतुमतः कृष्णेनयंत्रि

ताः स्वतंत्राएवनंदाद्यामंत्रमेतदमंत्रयन् २० शुकउ॰ गोपवृद्धामहोत्पातानुनुभूयबृहद्वने नंदादयःसमागत्यमं

त्रमेतदमंत्रयन् २१ तत्रोपनंदनामाह गोपोज्ञानवयोधिकः देशकालार्थतत्त्वज्ञः प्रियकृद्रामकृष्णयोः २२ उत्पात

व्यमितोस्माभिर्गोकुलस्यहितैषिभिः आयांत्यत्रमहोत्पातावालानांनाशहेतवः २३

गोकुलस्यहितंकार्यं २० ॐनमोभगवतेवासुदेवाय ॐनमोनारायणाय ॐनमोजानकीवल्लभाय श्रीरामचंद्रायश्रीकृष्णायनमः २३

केवलंतार्किकानांजगद्गुरुरेव अन्येतुसंदेहयुक्तचित्ताबभूवुरिति ५ भगवन्मायया मोहितस्यनंदस्याचरितुमाह उलूखलमिति

नतेतदुक्तंजगृहुर्नघटेतेतितस्यतत् बालस्योत्पाटनंतर्वोः केचित्संदिग्धचेतसः ५ उलूखलंविकर्षंतं
दाम्नाबद्धंस्वमात्मजं विलोक्यनंदःप्रहसद्वदनोविमुमोचह ६ [illegible]
गोपीभिस्तोभितोऽनृत्यद्भगवान्बालवत्क्वचित् उद्गायतिक्वचिन्मुग्धःतद्वशोदारुयंत्रवत् ७ बिभर्तिक्वाचि
दाज्ञप्तःपीठकोन्मानपादुकं॥बाहुक्षेपंचकुरुतेस्वानांचप्रीतिमावहन् ८ दर्शयंस्तद्विदांलोकेआत्मनोभृ
त्यवश्यतां व्रजस्योवाहवैहर्षंभगवान्बालचेष्टितैः ९ क्रीणीहिभोःफलानीति श्रुत्वासत्वरमच्युतः फ
लार्थीधान्यमादायययौसर्वफलप्रदः १० फलविक्रीयनीतस्यच्युतधान्यकरद्वयं फलैरपूरयद्रत्नैःफ प२
लभांडमपूरिच ११ सरित्तीरगतंकृष्णंभग्नार्जुनमथाह्वयत् जन्मर्क्षेमथभवतोविप्रेभ्योदेहिगाःशुचिः

६ गोपीभिरिति मामितिशंकमानोऽतीवबाल्यमनुकरोतिस्मेत्याह स्तोभितःकरतालादिनाप्रोत्साहितः ७ इदमानये
त्याज्ञप्तः आनेतुमसमर्थइवबिभर्तिकेवलं पीठादिबाहुक्षेपंकरतालंउच्चलद्दिशंचेति चकारस्यान्वयः ८ तस्यैश्वर्यंविदंतीतिये

भा० द० गतैः कुंकुमैः कांतियीसांता: स्तनेषु कुचेषु यत्कुंकुमं तेन कांतियीसामिति वा ३३ व्रजस ति स्थानं ३४ स्वकालेन तथोगकालेन ३७ अथको
४३ पू० मारलीलां वर्णयति अविदूरे साद्दिना ३८ दोपरोौ विलामलकादिभिः किंकिणीयुक्तैः पादैः क्षिपत स्ताडयतः वत्सपाला

43

गोप्यो रूढरथा नूत्नकुचकुंकुमकांतयः कृष्णलीलां जगुः प्रीता निष्ककंठ्यः सुवाससः ३३ यशो
यशोदा रोहिणी पौत्रकं शकटमास्थितं रेजतुः कृष्णरामाभ्यां तत्कथाश्रवणोत्सुके ३४ वृंदावनं संप्र
विश्य सर्वकालसुखावहं तत्र चक्रुर्व्रजावासं सकटैरर्द्धचंद्रवत् ३५ वृंदावनं गोवर्द्धनं यमुनापु
लिनानि च वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप ३६ एवं व्रजौकसां प्रीतिं यच्छंतौ बालचेष्टि
तैः कलवाक्यैः स्वकालेन वत्सपालौ बभूवतुः ३७ अविदूरे व्रजभुवः सह गोपालदारकैः चारया
मासतुर्वत्सान्नानाक्रीडापरिच्छदौ ३८ क्वचिद्वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् क्वचित्पादैः किंकि
णीभिः क्वचित्कृत्रिमगोवृषैः ३९ वृषायमाणौ नर्दंतौ युयुधाते परस्परं अनुकृत्य रुतैर्जंतूंश्चेरतुः जाह्नतोपथा ४०

पवद्धिव्यः कंबलादविहितः वृषुरूप मनुकुर्वंतितैः सहः ३९ स्वयमपि तथैव वृषायमाणो नर्दंतौ तदनुकारिशब्दान् कुर्वंतौ युयु धाते इत्यर्थः कृतैः छद्रैः जंतून् हंसमयूरादीन् ४०

रामः
४३

विपदं वीर्णपक्षिणं पदं विहारस्थाने विपदं विगतच्छलिर्वा २५ अन्यतमो वा कश्चिद्बालः तत्राप्यच्युते नैव रक्षणमासीत् २६

मुक्तः कथंचिद्राक्षस्या बालघ्न्या बालको ह्यसौ हरेरनुग्रहान्नूनमनश्चोपरि नापतत् २२ चक्रवातेन नीतोऽयं दैत्येन विपदं वियत् शिलायां पतितस्तत्र परित्रातः सुरेश्वरैः २३ यन्न म्रियेत द्रुमयोरंतरं प्राप्य बालकः असावन्यतमो वापि तदप्यच्युतरक्षणं २४ यावदौत्पातिकोऽरिष्टो व्रजं नाभिभवेदितः तावद्बालानुपादाय यास्यामोऽन्यत्र सानुगाः २५ वनं वृंदावनं नाम पशव्यं नवकाननं गोपगोपीगवां सेव्यं पुण्याद्रितृणवीरुधं २६ तत्राद्यैव च यास्यामः शकटान्युंक्त माचिरं गोधनान्यग्रतो यांतु भवतां यदि रोचते २७ तच्छ्रुत्वैकधियो गोपाः साधु साध्विति वादिनः व्रजान्स्वान्स्वान्समायुज्य ययू रूढपरिच्छदः २८ वृद्धान्बालान्स्त्रियो राजन् सर्वोपस्करणानि च अनःस्वारोप्य गोपाला यत्ता आत्तशरासनः २९ गोधनानि पुरस्कृत्य शृंगाण्यापूर्य सर्वतः तूर्यघोषेण महता ययुः सह पुरोहिताः ३०

ति

अरिष्टो निष्ट इतः स्थानात् पशव्यं पशुभ्यो हितं नवानि काननानि वर्जान्तराणि तत् २६ एकधियो विप्रतिरहिता व्रजम् शकटव्यूहान् रूढाः शकटयन्त्रारोपिताः परिच्छदाः यैस्तैः यत्ता उद्धतप्रयत्नाः ३०

भा॰ द॰ तुंडयोः चुंचोर्वीरणवत् निर्ग्रंथ तृण विशेषवत् ५० समीडिरे तुष्टुवुः आनकैः भेरैवैरन्यैश्च संस्तवैः सह ५१ स्वंस्थामभागतं प्रा
४४ पू॰ णमिव इमं च प्रणीय एकीकृत्य ५२ अतिप्रियेण प्रीत्याढ्याया दृताः प्रीत्यागतमिव लोकानां तदा दागत मिव तृषतामि

तमापतंतं स निगृह्य तुंडयो र्दोर्भ्यां बकं कंस सखं सतां गतिः पश्यत्सु बालेषु ददार लीलया मुदावहो वीर
त्र२ णवद्दिवौकसां ५० तदा बकारिं सुरलोकवासिनः समाकिरन्नंदनमल्लिकादिभिः समीडिरे चानक
संखसंस्तवैः तद्वीक्ष्य गोपालसुता विशिष्मिरे ५१ मुक्तं बकास्यादुपलभ्य बालका रामादयः प्राणमि
वेंद्रियोगणाः स्थानागतं तं परिरभ्य निर्वृताः प्रणीय वत्सान्व्रजमेत्य तज्जगुः ५२ श्रुत्वा तद्विस्मिता गो
त्याह तदिति ४९ तस्मादेव कारणात् स्वस्वकात्मनि अहंकारास्पदेऽपि देहे आत्माध्यासतारतम्येन प्रेमतारतम्यं दृश्यमानं तन्नि रामः
बंधनमेवेति दर्शयितुं मूढामूढभेदेन विशेषमाह देहात्मवादिनामिति द्वाभ्यां ५० ॐ नमो भगवते वासुदेवाय ऽऽ ऽऽ ॥ ६५

पादयोर्नत्वाऽभीष्टं सर्वतः प्रजितमपि भिन्नेतं वा ४० अनुज्ञाप्यानुज्ञां प्राप्य पूर्वस्थल्यपि स्वयंभुवं ब्रह्माणं यथापूर्वं स्वकः सखा योय स्मिंस्तान् यथापूर्वं स्वकं तादृशं पुलिनं ४१ ननु एतावंतं कालं कथं नेते तत्रोपविष्टः कथं च क्षुत्पिपासादि विस्मरणमत आह एक

शिशु

ससखवत्सकमोक्षणकौतुकद्भुतविलंवितपुत्रमुदेक्षुतं निखिलरूपमनोदधदच्युतो वत्सुसवः कालयन्व्रज मंगलं ३९ शुक उवाच इत्यभिष्टूय भूमानं त्रिः परिक्रम्य पादयोः नत्वाभीष्टं जगद्धाता स्वधाम प्रत्यपद्यत ४० ततोनुज्ञाप्य भगवान् स्वयंभुवं प्रागवस्थितान् वत्सान्पुलिनमानिन्ये यथापूर्वं सखं स्वकं ४१ एकस्मि न्नपि याते ऽब्दे प्राणेशं चांतरात्मनः कृष्णमायाहता राजन्क्षणार्धं मेनिरे ऽर्भकाः ४२ किं किं न विस्मरंतीह मा यामोहितचेतसः यन्मोहितं जगत्सर्वमभीक्ष्णं विस्मितात्मकं ४३ ऊचुश्च सुहृदः कृष्णं स्वागतं ते तिरंहसा नैकोप्यभोजि कवलं एहीतः साधु भुज्यतां ४४ ततो हसन् हृषीकेशोऽभ्यवहृत्य सहार्भकैः दर्शयं चर्माजगरं

म० २ न्यवर्त्तत वनाद्व्रजं ॥४५॥

स्मिनिति श्लोकद्वयेन अब्देपि याते आत्मेशं ऋष्णमंतरापि विनापि प्रियविरहे क्षणोप्यब्दाधिको भवति तथापि मायाहताः क्षणार्धं मेनिरे ४२ यया मायया मोहितं जगत् अभीक्ष्णं पुनः पुनर्विस्मृतात्मकं विस्मृत आत्मा येन तत्तथा ४३ अत एव ऊ चुश्च ते त्वया अतिवेगेन स्वागतं सम्यगागतं वत्साः किं समीपे आनीतवन् एकोपि ग्रासः त्वां विनास्माभिर्नो भोजि न भुक्तः इतरा हिसा

अघवधे पौगण्डभुजतामिति ७० अध्यवहरस्मप्रभुजा ५९

तस्मात्श्रीकृष्णस्यैवपरमार्थत्वात् तदेकशरणानामयन्नतो हि कोमोत्त इति अकरध्यार्थमुपसंहरति स्म समाश्रिताइति पुण्यंय
शोयस्येसपुण्ययशः सचासौमुरारिश्चतस्यपादपल्लवएवप्लवः तंयेसम्यगाश्रिताः महत्पदं महतांपदं आश्रयं यद्वा महच्चतत्
पदंचेतितत्तथातेषांभवांबुधिर्वत्सपदमात्रंभवति किंच परंपदं श्रीवैकुंठाख्यंपदं स्थानंभवति विपदांयत्पदं विषयः तत्पुनःक

66

समाश्रितायेपदपल्लवप्लवंमहत्पदंपुण्ययशोमुरारेः भवांबुधिर्वत्सपदंपरंपदंपरंपदंयद्विप
दांनतेषां ५७ एतत्तेसर्वमाख्यातंयत्पृष्टोहमिहत्वया यत्कौमारेहरिकृतंपौगंडेपरिकीर्तितं ५८
एतत्सुहृद्भिश्चरितंमुरारेरघार्दनंशाद्वलजेमनंच व्यक्तेतरद्रूपमजोर्वभिष्टवंशृण्वन्गृणन्नेति
नरोखिलार्थान् ५९ एवंविहारैःकौमारैःकौमारंजहतुर्व्रजे निलायनैःसेतुबंधैर्मर्कटोत्प्लवनादिभिः

इति श्रीभागवतेदशमस्कंधेब्रह्मस्तुतिर्नामचतुर्दशः १४

कदाचिदपितेषांनभवतिनततः पुनरावर्ततेइत्यर्थः ५७ एतत्सुहृद्भिरिति सुहृद्भिश्चरितंमुरारेःतोन्योन्यशिक्यादीनिसादिनोक्तं
अघार्दनमघासुरवधः शाद्वलेजेमनंभोजनंचव्यक्तेतरत् व्यक्तात्जगत्प्रपंचादितरत् शुद्धसत्वात्मकं वत्सपालरूपं यद्वाव्य
क्तेतरस्मिंश्चिद्विलासः तद्रूप्यते इतिरूपं अजस्यब्रह्मणः उरुमहान् अभीष्टवः तं ब्रह्मकृतांस्तुतिमेतत् शृण्वन् गृणन्नरः स
र्वपुरुषार्थानाप्नोति ५९ इति श्रीपरमानंदनृसिंहपदद्वंद्वः व्याकरोत् श्रीधरस्वामीयथामतिविधिस्तुतिं इतिभावार्थदीपि

पा० प्रियभवति

तं देहमनुभवंति येपुत्रादयस्ते तु न तं प्रियतमाः यथात्मवादिनां देह इत्यर्थः ५१ यद्यस्मात् जीर्यत्यपि आसन्नमरणेपि जीविताशा भवति अयंभावः न जीविष्यामीति निश्चितेपि देहे यस्येमास्पदत्वेन हात्मगतमेव संगच्छते इति अथवा यद्यस्मिन्देहे जीर्यत्यपि जीविताशा अविवेकदशायामस्ति सापि विवेकिनो यदा सममता भागनेवति तदा आत्मविषयो न भवति अतस्तत्रान्नाजीवारयेति तदर्थमेव सकलं प्रियमित्यर्थः ५२ प्रस्तुतमाह कृष्णमेनमिति न केवलमात्मनमात्मा अपितु जगतामपीत्याह ५४ वस्तुत माहकृष्ण

मे०

देहात्मवादिनां पुंसामपि राजन्यसत्तम तथापि प्रियतमो देहस्तथा न ह्यनु ये च तं ५१ देहोपि ममताभाक्चेत्तर्ह्यसौ नात्मवत्प्रियः यज्जीर्यत्यपि देहेस्मिन् जीविताशा बलीयसी ५२ तस्मात् प्रियतमः स्वात्मा सर्वेषामेव देहिनां तदर्थमेव सकलं जगदेतच्चराचरं ५३ कृष्णमेनमवेहि त्वमात्मानमखिलात्मनां जगद्धिताय सोप्यत्र देहीवाभाति मायया ५४ वस्तुतो जानतामत्र कृष्णं स्थास्नु चरिष्णु च भगवद्रूपमखिलं नान्यद्वस्त्विह किंचन ५५ सर्वेषामपि वस्तूनां भावार्थो भवति स्फुटं तस्यापि भगवान्कृष्णः कि [illegible] ५५

सर्वजगत्कारणमखिलं कृष्णं जानतां पुंसां स्थावरं जंगमं च सर्वं भगवद्रूपं यस्मात्तत् नान्यत् ५५ कुत इति तदाह सर्वेषामिति ह्येषां भावार्थः परमार्थः भवति भवत्यारम्भं प्राप्नुवत् कारणं तस्मिन्भवति स्थितः तस्यापि भवतः कारणस्यापि भगवान् श्रीकृष्णो भवत्कारणं अतः किं अतत् श्रीकृष्णव्यतिरिक्तं वस्तु रूप्यतां ५६

भा० द० तरुजन्मयेन कृतं तस्य तमसः पापस्यापहत्यै नाशाय अथवा त्वया ईश्वरेण सर्वोपकारकं तरुजन्म कृतं पादांबुजमुपास्य तं त्वां नमंति एनं
६७ पू० स्थावरेपि जन्मनि पद्ज्ञानरूपं तमोस्ति तस्यापहत्यै किं कृत्वा सुमनःफलार्हणं विधाय ५ हे अनघ वने गूढमपि त्वां न त्यजंति त्वपि

67

श्रीभगवानुवाच अहो अमी देववरामरार्चितं पादांबुजं ते सुमनःफलार्हणं नमंत्युपादाय शिखाभिरात्मनः
तमोपहत्यै तरुजन्म यत्कृतं ५ एते लयः तव यशो खिललोकतीर्थं गायंत आदिपुरुषानुपदं भजंते प्रायो
ह्यमी मुनिगणा भवदीयमुख्या गूढं वनेपि न जहत्यनघात्मदैवं ६ नृत्यंत्यमी शिखिन ईड्य मुदा हरिण्यः कु
र्वंति गोप्य इव ते प्रियमीक्षणेन सूक्तैश्च कोकिलगणा गृहमागताय धन्या वनौकस इयान् हि सतां निसर्गः ७
धन्येयमद्य धरणी तृणवीरुधस्त्वत्पादस्पृशो द्रुमलताः करजाभिमृष्टाः नद्योद्रयः खगमृगाः सदयावलोकैः
गोप्योंतरेण भुजयोरपि यत्स्पृहा श्रीः ८

मनुष्यवेशेन हि गूढे सति मुनयोपि अलिवेशेन निगूढं त्वां भजंतीत्यर्थः ६ इयान् हि सतां सर्गः स्वभावः अतिवर्हं ति यदस्ति प्रियं वा
स्तु स्वस्मिन् तद्गृहमागताय महते समर्पयंती ७ तृणवीरुधः अत्र तव पादैः स्पृशंतीति तथा करजाभिमृष्टाः सदयैरवलोकैः श्रीरपि श्रभः
यस्मै स्पृहयती केवलं तेन भुजयोरंतरेण वक्षसा गोप्यो धन्या इति ८ नखैः स्पृष्टाः ६७

प्रद्युम्नहाणे
प्रति २

ततःपंचदशे धेनुपालनं धेनुकार्दनं कालियक्ष्वेडतो गोपरक्षणं च निरूप्यते शैशवे पूतनां पीत्वा कौमारे हत्वा बकादिकान् पौगंडे दशादे स्थानां महन्मदं महानलः अहिवक्त्रप्रवेशेन तृष्याखिन्नान्स्सखींस्ततः ह्रदःप्रवेशयेन्नाक्ष फलं तालादिकाननं पशुपालसंमतौ पशुपालेन संमतौ पशुपालानां वा संमतौ ईषद्वयो बलातिरेकमनुकूलत्वं ताविसर्प्य अतीव पुण्यं वृंदावनं चक्रतुः सर्वतः प्रसर्पणे

श्रीशुक उवाच ततश्च पौगंडवयःश्रितौ व्रजे बभूवतुस्तौ पशुपालसंमतौ गाश्चारयंतौ सखिभिः समं पदैर्वृं
दावनं पुण्यमतीव चक्रतुः १ तन्माधवो वेणुमुदीरयन्वृतो गोपैर्गृणद्भिः स्वयशो बलान्वितः पशून्पुर
स्कृत्य पशव्यमाविशद्विहर्तुकामः कुसुमाकरं वनं २ तन्मंजुघोषालिमृगद्विजाकुलं महन्मनःप्रख्यपय
सरस्वता वातेन जुष्टं शतपत्रगंधिना निरीक्ष्य रंतुं भगवान्मनो दधे ३ स तत्र तत्रारुणपल्लवश्रिया फल
प्रसूनोरुभरेण पादयोः स्पृशच्छिखान्वीक्ष्य वनस्पतीन्मुदा स्मयन्निवाहाग्रजमादिपूरुषः ४

न १ स्वयशो गृणद्भिः तद्वनं प्राविशत् २ तद्वनं निरीक्ष्य भगवान् श्रीकृष्णो रंतुं मनो दधे कथंभूतं वनं मंजुघोषा ये अलि
मृगद्विजाः भ्रमरमृगपक्षिणः तैराकुलं व्याप्तं महन्मनःप्रख्यपयःसरस्वता महतां मनसः प्रख्यं तुल्यं स्वच्छं पयो यस्मिंस्तत्
३ अरुणपल्लवश्रिया सह स्पृशंतः शाखाः शिखा यासां येषां तान् वीक्ष्य अग्रजं बलं प्रत्याह ४ श्रीरामचंद्राय नमः ऽऽ ऽऽ

ईशचेष्टित इति निगूढस्वभावत्वेपि अंतरांतरा ईशस्येव चेष्टितानि दृश्यंते यस्मिन् सः १९ ईशचेष्टितमेव दर्शयितुमाह श्रीदामेति

68

अन्ये तदनुरूपाणि मनोज्ञानि महात्मनः गायंति स्म महाराज स्नेहक्लिन्नधियः शनैः १८ एवं निगूढात्मगतिः
स्वमायया गोपात्मजत्वं चरितैः विडंबयन् रेमे रमालालितपादपल्लवो ग्राम्यैः समं ग्रामवदीशचेष्टितः १९
श्रीदामा नाम गोपालो रामकेशवयोः सखा सुबलस्तोककृष्णाद्या गोपाः प्रेम्णेदमब्रुवन् २० रामराम म
हाबाहो कृष्ण दुष्टनिवर्हण इतो विदूरे सुमहद्वनं तालालिसंकुलं २१ फलानि तत्र भूरीणि पतंति पतिता
नि च संति किंत्ववरुद्धानि धेनुकेन दुरात्मना २२ सोतिवीर्योसुरो राम हे कृष्ण खररूपधृक् आत्मतु
ल्यबलैरन्यैर्ज्ञातिभिर्बहुभिर्वृतः २३ तस्मात्कृतनराहाराद्भीतैर्नृभिरमित्रहन् न सेव्यते पशुगणैः
पक्षिसंघैर्विवर्जितं २४ विद्यंतेभुक्तपूर्वाणि फलानि सुरभीणि च एष वै सुरभिर्गंधो विषूचीनोवगृह्य
ते २५ प्रयच्छ तानि नः कृष्ण गंधलोभितचेतसां वांछास्ति महती राम गम्यतां यदि रोचते २६ एवं सु
हृद्वचः श्रुत्वा सुहृत्प्रियचिकीर्षया प्रहस्य जग्मतुर्गोपैर्वृतौ तालवनं प्रभू २७ बलः प्रविश्य बाहुभ्यां
तालान्संपरिकंपयन् फलानि पातयामास मतंगज इवौजसा फलानां पततां शब्दं निशम्यासुररासभः

श्रीमद्भागवते टीकायां दशमस्कंधे पत्र ६८

स्तोककृष्णः कश्चित् २० तालालिसंकुलं तालपंक्तिव्याप्तं २१ विषूचीनः सर्वतः प्रसृतः २५ ॐ नमो भगवते वासुदेवाय

एवंश्रीमद्वृंदावनंप्रतिप्रीतःसन् अद्रेःसमीपवर्त्तिसरित्तटेषुसंचारयन् सानुगोलोकप्रसिद्धाभिःक्रीडाभिःप्रीतमनारेमे ८ तामेवरतिमाह
क्वचिदितिदशभिः १० बर्हिणंनृत्यंतमनु अभिनृत्यति बर्हिणमभिमुखं नृत्यतीति बालखीन् आनंदयन् ११ चकोरादीननुकलनौति

वृंदावनंश्रीमत्कृष्णःप्रीतमनाःपशून् रेमेसंचारयन्नद्रेःसरिद्रोधस्सुसानुगः ९ क्वचिद्गायतिगायत्सु
मदांधालिष्वनुव्रतैः उपगीयमानचरितःस्रग्वीसंकर्षणान्वितः १० क्वचिच्चकलहंसानामनुकूजतिकूजितं
अभिनृत्यतिनृत्यंतंबर्हिणंहासयन् क्वचित् ११ मेघगंभीरयावाचानामभिर्दूरगान्पशून् क्वचिदा
ह्वयतिप्रीत्यागोगोपालमनोज्ञया १२ चकोरक्रौंचचक्राह्वभारद्वाजांश्चबर्हिणः अनुरौतिस्मसत्वा
नांभीतवद्व्याघ्रसिंहयोः १३ क्वचित्क्रीडापरिश्रांतंगोपोत्संगोपबर्हणं स्वयंविश्रमयत्यार्यंपादसं
पुष्प[illegible] वाहनादिभिः १४ नृत्यतोगायतःक्वापिवल्गतोयुध्यतोमिथः गृहीतहस्तौगोपालान्हसंतौप्रशशंसतुः १५
क्वचित्पल्लवतल्पेषुनियुद्धश्रमकर्षितः वृक्षमूलाश्रयःशेतेगोपोत्संगोपबर्हणः १६ पादसंवा
हनंचक्रुःकेचित्तस्यमहात्मनः अपरेहतपाप्मानोव्यजनैःसमवीजयन् १७

कदाचिच्चसत्वानांमध्येव्याघ्रसिंहयोः ताभ्यांभीतवज्जवति सत्वेषुपलायमानेषुपलायतइत्यर्थः तयोसत्वानांचवत्नोजोकारणंभीतव
ज्जवतीतिवा १३ आर्यमग्रजंविश्रमयति विगतश्रमंकरोति १४ नृत्यादीन् कुर्वतोगोपान् मिथःप्रशशंसतुः १५ व्यजनैपल्लवा

टि०भा०टी० ७

आदन् अभक्षयन् ४० गोरजोभिः छुरितेषु कुंतलेषु बद्धं बर्हं वन्यानि प्रसूनानि च यस्य रुचिरे ईक्षणे चारुहासश्च तं चरंतं च दिदृक्षिता दृशः
दिदृक्षिता दर्शनोत्कंठायुक्ता दृशो यासां ताः ४२ मुकुंदस्य मुखपद्मगतं सारघं मधु अह्नि यो विरहः तस्माज्जातं तापं सचतासां

69

तयोस्तत्सुमहत्कर्म निशम्य विबुधादयः मुमुचुः पुष्पवर्षाणि चक्रुर्वाद्यानि तुष्टुवुः ३९ अथ ताल
फलान्यादन्मनुष्या गतसाध्वसाः तृणं च पशवश्चेरुर्हतधेनुककानने ४० कृष्णः कमलपत्राक्षः पुण्य
श्रवणकीर्तनः स्तूयमानोनुगैर्गोपैः साग्रजो व्रजमागतः ४१ तं गोरजःछुरितकुंतलबद्धबर्ह वन्यप्र
सूनरुचिरेक्षणचारुहासं वेणुंक्वणंतमनुगैरनुगीतकीर्त्तिं गोप्यो दिदृक्षितदृशोभ्यगमन्समेताः ४२
पीत्वा मुकुंदमुखसारघमक्षिभृंगैः तापंजहुर्विरहजं व्रजयोषितोन्हि तत्सत्कृतिं समधिगम्य विवेश गो
ष्ठं सव्रीडहासविनयं यदपांगमोक्षं ४३ तयोर्यशोदारोहिण्यौ पुत्रयोः पुत्रवत्सले यथाकालं यथाकामं
व्यधत्तां परमाशिषः ४४ गताध्वानश्रमौ तत्र मज्जनोन्मर्दनादिभिः नीवीं वसित्वा रुचिरां दिव्यस्रग्गंध
मंडितौ ४५ जनन्युपहृतं प्राश्य स्वाद्वन्नमुपलालितौ संविश्य मृदुशय्यायां सुखं सुषुपतुर्व्रजे ४६

सत्कृतिं पूजां का च सत्कृतिः कथं वा हृतानामाह सव्रीडेति सलज्जहासेनु विनयो भवति तथा यदेतत् किंचापांगमोक्षं कटाक्षद
र्शनं तथा तां सत्कृतिं प्राप्येत्यर्थः ४३ ४६

प्रत्यग्द्वाभ्यां पश्चिमाभ्यां पाभ्यां पादाभ्यां काशब्दं इति गर्दभजातिस्वभावानुकरणं पर्यसरत् परितोभ्यधावदित्यर्थः ३० उपक्रोष्टा गर्दभः पराक् प्रतिमुखः अपरौ पश्चिमौ वलाय वलं हंतुं ३१ तृणराजस्तालः ३२ उत्सृष्टेन खरदेहेन हतेनाहताः चकंपिरे अकंपयन् ३४

समेत्य तरसा प्रत्यग्द्वाभ्यां पद्भ्यां वलं वली निहत्योरसि काशब्दं मुंचन्पर्यसरत्खलः ३० पुनरासाद्य संरब्ध उपक्रोष्टा पराक् स्थितः चरणावपरौ राजन्वलाय प्राक्षिपद्रुषा ३१ स तं गृहीत्वा प्रपदोर्भ्रामयित्वैकपाणिना चिक्षेप तृणराजाग्रे भ्रामणत्यक्तजीवितं ३२ तेनाहतो महातालो वेपमानो बृहच्छिराः पार्श्वस्थं कंपयन्भग्नः स चान्यं सोपि चापरं ३३ वलस्य लीलयोत्सृष्टखरदेहहताहताः तालाश्चकंपिरे सर्वे महावातेरिता इव ३४ नैतच्चित्रं भगवति ह्यनंते जगदीश्वरे ओतप्रोतमिदं यस्मिंस्तंतुष्वंग यथा पटः ३५ ततः कृष्णं च रामं च ज्ञातयो धेनुकस्य ये क्रोष्टारोभ्यद्रवन्सर्वे संरब्धा हतवांधवाः ३६ तांस्तानापततः कृष्णो रामश्च नृप लीलया गृहीतपश्चाच्चरणान्प्राहिणोत्तृणराजसु ३७ फलप्रकरसंकीर्णं दैत्यदेहैर्गतासुभिः रराज भूः सतालाग्रैर्घनैरिव नभस्तलं ३८

यस्मिन्निदं विश्वं ओतं ऊर्ध्वं तंतुषु पट इव ग्रथितं प्रोतं तिर्यक्तंतुषु पटवदेव संग्रथितं सर्वतोनुस्यूतं वर्तत इत्यर्थः ३५ घनैर्नभ इव भूवस्तत्र रराज तत्र फलप्रकरसंकीर्णे भिति दैत्यदेहैः सतालाग्रैश्च संकीर्णमित्यरुणाभनीलघनसादृश्यसंपादनं ३८

गोपालेन यदुरुसंचरितं तदेवामृतं अंतेकाव्यतामिति ३ श्रप्यमाणं यस्मात्पयो यस्य सः अतउपरिगच्छंतः खगाः यस्मिन्पतंति ४ किंतु
विप्रुष्मता अंबुकणयुक्तेन विषोदकतरंगस्य स्पर्शमात्रेण तेनाभिमर्षिताः स्पृष्टाः यस्य तीरगा म्रियंते स ह्रद आसीदिति ५ तं कालीयं चं
डो वेगो यस्य तं विषमेव वीर्यं यस्य तं वा दंदवमिति किंच दंतो रसो यस्य स रसं लाभाविना श्रीकृष्णचरणस्पर्शभागेन सरकः तत्तीरे कादं

स्व॰

ब्रह्मन् भगवतस्तस्य भूम्नः स्वच्छंदानुवर्त्तिनः गोपालोदारचरितं कस्तृप्येतामृतं जुषन् ३ शुकउवाच कालिं
द्यां कालियस्यासीद्ध्रदः कश्चिद्विषाग्निना श्रप्यमानपयो यस्मिन्पतंत्युपरिगाः खगाः ४ विप्रुष्मता विषो
दोर्मिमारुतेनाभिमर्षिताः म्रियंते तीरगा यस्य प्राणिनः स्थिरजंगमाः ५ तं चंडवेगविषवीर्यमवीक्ष्य तेन
दुष्टां नदीं च खलसंयमनावतारः कृष्णः कदंबमधिरुह्य ततोतितुंग मास्फोट्य गाढरसनो न्यपतद्विषो
दे ६ सर्पह्रदः पुरुषसारनिपातवेगसंक्षोभितोरगविषोच्छ्वसितांबुराशिः पर्यक्प्लुतो विषकषायविभीष
णोर्मिर्धावन् धनुःशतमनंतबलस्य किं तत् ७

बमारुह्य वा अप्यवाप्य तमारुह्य रतो गरुडेन गरुत्मता क्रांतत्वादिति उरगांतरं आस्फोट्य बाहुं करतलेन आहत्य गाढं दृढं बद्धा रसना क
टिबंधनवस्त्रं येन सः ६ तदा सर्पह्रदः पुरुषश्रेष्ठस्य पतनभरेण संक्षोभिमानामुरगाणां विषैरुच्छ्वसितोंबुराशिः यस्य सः विषे
ण कषायीकृताः भयंकराश्च ऊर्मयो यस्य सः पर्यक् परितो धनुःशतं प्लुताः प्रसृताः नैतच्चित्रमित्याह अनंतबलस्येति ७

धावन्॰

संप्रतिसद्यएवइत्याशंक्याहस्मृतिर्यैः तेसंप्रतीतस्मृतयः यथासम्यक्प्रतीतौप्रतिज्ञाहास्मृतिर्यैस्तेतथा ५१ एतदन्वंसत ५२
इतिश्रीभावार्थदीपिकायांदशमेपंचदशः १५ षोडशेकालियस्योग्रोव्यग्रंहोयमुनाह्रदे तत्पत्नीभिःस्तुतेनाथकृष्णेनानुगृहःपु

एवंसभगवान्कृष्णोवृंदावनचरःक्वचित् ययौराममृतेराजन्कालिंदींसखिभिर्वृतः ४७ अथगावश्चगोपा
श्चनिदाघातपपीडिताः दुष्टंजलंपपुःतस्याःतृष्णार्ताविषदूषितं ४८ विषांभस्तदुपस्पृश्यदैवोपहतचेतसः
निपेतुर्व्यसवःसर्वेसलिलांतेकुरूद्वह ४९ वीक्ष्यतान्वैतथाभूतान्कृष्णोयोगेश्वरेश्वरः ईक्षयामृतवर्षि
ण्यास्वनाथान्समजीवयत् ५० तेसंप्रतीतस्मृतयःसमुत्थायजलांतरात् आसन्सुविस्मिताःसर्वेवीक्षमा
णाःपरस्परं ५१ अन्वमंसततद्राजन्गोविंदानुग्रहेक्षितं पीत्वाविषंपरेतस्यपुनरुत्थानमात्मनः ५२
इतिश्रीभागवतेमहापुराणेदशमस्कंधेधेनुकवधोनामपंचदशः १५ शुकउवाच विलोक्यदूषितांकृ
ष्णांकृष्णःकृष्णाहिनाविभुः तस्याविशुद्धिमन्विच्छन्सर्पंतमुदवासयत् १ राजोवाच कथमंतर्जलेगाधेन्य
गृह्णाद्भगवानहिं सवैबहुयुगावासंयथासीद्विप्रकथ्यतां २

नःकृत्वारासभदैत्येथान्जघ्नुस्तालफलान्यलं क्रीडान्योन्यंफलैःसंगेकालीयस्यकलानिधिः उदवासयत् निःसारितवान् १ बहूनि
युगानिआवासोयस्यतमहिं सर्वेअद्रि अजगरोपितस्मिन् अंतर्जले यथायेनप्रकारेणासीत् अथवाबहूनियुगानिआवासोयथाभव

तितथातेनप्रकारेणसर्वेतत्रासीदितिकथ्यतामिति ४

भा॰ द॰ नतंविदंतीत्यतद्विदः १४ पशूनामिव वृत्तिर्येषां ते अतिवत्सलत्वात्पशुप्रपंचभूते युद्धाजिस्थितिर्येषां वा हे अंग १५ कातरान्भीतान्
७१ पू॰ बलो बलभद्रः १६ भगवंतं लक्षयंति यानि तैः पदैः सूचितया पदव्या मार्गेण १७ पदे मार्गे ज्ञानप्रकारमाह त इति विश्पतेः श्रीकृष्ण

श्लो॰ ४

तैदुर्निमित्तैर्निधनं मत्वाप्राप्तमतद्विदः तत्प्राणास्तन्मनस्का ते दुःखशोकभयातुराः १४ आबालवृद्धवनि
ताः सर्वेंगपशुवृत्तयः निर्जग्मुर्गोकुलाद्दीनाः कृष्णदर्शनलालसाः १५ तांस्तथा कातरान्वीक्ष्य भगवान्मा
धवो बलः प्रहस्य किंचिन्नोवाच प्रभावज्ञोनुजस्य सः १६ तन्वेषमाणा दयितं कृष्णं सूचितया पदैः भगव
ल्लक्षणैर्जग्मुः पदव्या यमुनातटं १७ ते तत्र तत्राब्जयवांकुशाशनिध्वजोपपन्नानि पदानि विश्पतेः मार्गे गवाम
न्यपदांतरांतरे निरीक्षमाणा ययुरंग सत्वराः १८ अंतर्ह्रदे भुजगभोगपरीतमारात्कृष्णं निरीहमुपलभ्य ज
लाशयांते गोपांश्च मूढधिषणान्परितः पशूंश्च संक्रंदतः परमकश्मलमापुरार्ताः १९ गोप्योनुरक्तमनसो
भगवत्यनंते तत्सौहृदस्मितविलोकगिरः स्मरंत्यः ग्रस्तेहिना प्रियतमे भृशदुःखतप्ताः शून्यं प्रियव्यतिहृतं

स्य अन्येषां पादानामंतरांतरे मध्ये मध्ये तत्तत्पदयोर्हेन यथा गवां ज्ञातीनां मार्गे सत्वरा योगिनः तत्तदुपायपवादेन यथा परतत्वं मृगयं
ते तद्वदिति भावः १८ ततश्च सर्पशरीरवेष्टितं श्रीकृष्णं दूरान्निरीक्ष्य गोपांश्च पशूंश्च तथा तथा निरीक्ष्यार्ताः परं मोहमापुः १९
प्रियेण श्रीकृष्णेन विरहितं त्रैलोक्यं शून्यं ददृशुः २०

राम:
७०

भुजदंडाहतो दवाघो अंभुला ततः स्वसदनाभिभवं च निरीक्ष्य तदसहमानः सर्पः समसरत् समाजगाम संमुखमागतः असौ मत्स्वामी मम गृहमायाति ममात्यात्सुजमनं कारणीयमिति ८ प्रेक्षणीयस्य सुकुमारस्य घनवज्ज्वलच्छ्रीवत्सपीतवसनं ह्रदे विहरंतं श्रीवत्सेन संयुक्तमुल्लसत्पीतं वसनं यस्य तं भुजयाभोगेन च छाद अवेष्टयसन्धियां येषां ते तत्स्त्रियः तेच

तस्य ह्रदे विचरतो भुजदंडघूर्णवार्घोषमंग वरवारणविक्रमस्य आश्रुत्य तत्स्वसदनाभिभवं निरीक्ष्य चक्षुःश्रवाः समसरत्तदमृष्यमाणः ८ तं प्रेक्षणीयसुकुमारघनावदातं श्रीवत्सपीतवसनं स्मितसुंदरास्यं क्रीडंतमप्रतिभयं कमलोदरांघ्रिं संदश्य मर्मसु रुषा भुजया चछाद ९ तं नागभोगपरिवीतमदृष्टचेष्टमालोक्य तत्प्रियसखाः पशुपा भृशार्त्ताः कृष्णेर्पितात्मसुहृदर्थकलत्रकामाः दुःखानुशोकभयमूढधियो निपेतुः १० गावो वृषा वत्सतर्यः क्रंदमानाः सुदुःखिताः कृष्णे न्यस्तेक्षणा भीता रुदंत्य इव तस्थिरे ११ अथ व्रजे महोत्पातास्त्रिविधा ह्यतिदारुणाः उत्पेतुर्भुवि दिव्यात्मन्यासन्नभयशंसिनः १२ तानालक्ष्य भयोद्विग्ना गोपा नंदपुरोगमाः विना रामेण गाः कृष्णं ज्ञात्वा चारयितुं गतम् १३

तेसखाय इति च १० तथा भुवि कंपादयः दिवि उल्कापातादयः आत्मनि वामनेत्रस्फुरणादयः आसन्नं भयं संशितुं शीलं येषां ते ११ तान्नुत्पातानालक्ष्य गोकुलानंदादयो गोपा निर्जग्मुरिति तत्तीयेनान्वयः भयोद्विग्नाः भयहेतोर्भीताः भयेन कंपमा

भा॰टिका ९३

भा॰ द॰ परिभ्रमणेनैव हृतं तेजो यस्य तं उन्नतौ अंसौ यस्य तं तस्य मूर्धसु ये रत्ननिकराः तेषां स्पर्शेनातिताम्रं पादांबुजं यस्य सः ननु च चलेषु शिर
७२ पू॰ स्सु कथं ननर्त तत्राह अखिलकलानामादिगुरुः ॥२६॥ शतैकशीर्ष्णः शतं एकानि मुख्यानि शीर्षाणि यस्य तस्य क्षीणायुषोपि
पुनर्भ्रमतः यद्यच्छिरो न नमते स्म ध्वस्तं न जहाति न नमति तत्तत् खलानां अंघ्रिपातैः । तत्तन्ममर्द तदा तत् आस्यतो मुखेभ्यः नस्तो नासाविवरेभ्य
श्च असृक् वमन् नागः परमकश्मलं प्राप ॥२८॥ पुनरपि रुषा उच्छ्वसितो यद्यत् समुन्नमति तत्तत्पदाघातेनानुनमयन् इत्यादि

72

एवं परिभ्रमहतौजसमुन्नतांसमानम्य तत्पृथुशिरःस्वधिरूढ आद्यः तन्मूर्धरत्ननिकरस्पर्शातिताम्रपादां
बुजो खिलकलादिगुरुर्ननर्त २६ तं नर्तु मुद्यतमवेक्ष्य तदा तदीयगंधर्वसिद्धमुनिचारणदेववध्वः
प्रीत्या मृदंगपणवानकवाद्यगीतपुष्पोपहारनुतिभिः सहसोपसेदुः २७ यद्यच्छिरो न नमते ग शतैकशी
र्ष्णः तत्तन्ममर्द खलदंडधरोंघ्रिपातैः क्षीणायुषो रुधिरमुल्बणमास्यतः सृक् नस्तो वमन् परमकश्मलमा
प नागः २८ तस्याक्षिभिर्गरलमुद्वमतः शिरस्सु यद्यत्समुन्नमति निःश्वसितो रुषोच्चैः नृत्यन्पदानुनमय
न्दमयांबभूव पुष्पैः प्रपूजित इवेह पुमान्पुराणः २९ तच्चित्रतांडवविरुग्नफणातपत्रो रक्तं मुखैरुरु वम
न्नृप भग्नगात्रः स्मृत्वा चराचरगुरुं पुरुषं पुराणं नारायणं तमरणं मनसा जगाम ३०

न्नवसरे हृष्टैः गंधर्वादिभिः शोभासनः पुराणः पुरुष इव स यशोदानंदनः पुष्पैः पूजितः यथा तदा गंधर्वादिभिः पुष्पैः प्रपूजितः राम:
गोपे पुराणः पुरुष इव हृष्ट इति यथा पुष्पैः संपूजित इव प्रसन्नः सन् तं दमयांबभूव तेदितं कृतवानित्यर्थः २९ अरणं शरणं ७२

अनन्यगतिंश्रीकृष्णशरणंगोकुलंनिरीक्ष्यप्राणएवात्महेतोः स्वगोकुलमतिदुःखितमाज्ञायदुरगबंधाज्जगवेंदुदतिष्ठतिसन्वयः
२३ तस्यमथ्यमानेनवपुषाव्यथितात्मसरीरः भुजंगःकुंडलीउन्मुच्यतंसक्त्वाकुपितः स्वफणानुन्नमय्यश्वसन् केवलमीक्षणः

ताःकृष्णमातरमपत्यमनुप्रविष्टांतुल्यव्यथाःसमनुगृह्यशुचास्रवंत्यः तास्ताव्रजप्रियकथाःकथयंत्यआसन्
कृष्णाननेर्पितदृशोमृतकप्रतीकाः २१ कृष्णप्राणान्निर्विशंतोनंदादीन्वीक्ष्यतंहृदे प्रत्यसेधत्सभगवान्रामः
कृष्णानुभाववित् २२ इत्थंस्वगोकुलमनन्यगतिंनिरीक्ष्यसस्त्रीकुमारमतिदुःखितमात्महेतोः आज्ञायमर्त्यपद
वीमनुवर्त्तमानः स्थित्वामुहूर्त्तमुदतिष्ठदुरगबंधात् २२ तंमथ्यमानवपुषाव्यथितात्मभोगः त्यक्त्वोन्नमय्य
कुपितःस्वफणान्भुजंगः तस्थौ श्वसन्श्वसनरंध्रविषांबरीषस्तब्धेक्षणोल्मुकमुखोहरिमीक्षमाणः २४
तंजिह्वयाद्विसिखयापरिलेलिहानं द्वेसृक्किणीह्यतिकरालविषाग्निदृष्टिं क्रीडन्नमुंपरिससारयथाख
गेंद्रोबभ्रामसोप्यवसरंप्रसमीक्षमाणः २५

तस्थौकपंभृतःश्वसनरंध्रेषुनासिकारंध्रेषुविषंयस्यसतथा अंबरीषोऽङ्कमाकभाजनंतद्वत् संतप्तानिनेत्राणियस्य तथा
उल्मुकानिमुखेयस्यसच २४ हरिश्चक्रीडंस्तंसर्पंपरिससार परितोबभ्राम अतिकरालंविषाग्निमुक्ताहृष्टिर्यस्यतंजिह्वया
द्विसिखयेतिप्रतिमुखमेव २५

महांश्चायमनुग्रह इतितस्यपूर्वंगुणमभिनंदति तपइति स्वयंमानरहितेन अन्येभ्योमानदेनच सर्वंजीवयतीतिसर्वजीवः ३५
नतपआदिनिमित्तएवभाग्योदयः किंत्वचिंत्यंतवकृपावैभवमित्याहुः श्लोकत्रयेण ३६ कस्यानुभाव इतितपआदिनाब्रह्मादयोपि
यस्याः श्रियः प्रसादमिच्छंतिसाश्रीः ललनापिस्त्रीरेव ललना उत्तमा स्त्री यस्य त्वदंघ्रिस्पर्शाधिकारस्य वांछया तपआदिप्र

तपःसुतप्तं किमनेनपूर्वंनिरस्तमानेनचमानदेन धर्मोथवासर्वजनानुकंपया यतोभवांस्तुष्यतिसर्व
जीवः ३५ कस्यानुभावोस्यनदेवविद्महे तवांघ्रिरेणुस्पर्शाधिकारः यद्वांछयाश्रीः ललनाचरत्तपोवि
हायकामान्सुचिरंधृतव्रता ३६ ननाकपृष्ठंनचसार्वभौमंनपारमेष्ठ्यंनरसाधिपत्यं नयोगसिद्धीर
पुनर्भवंवावांछंतियत्पादरजःप्रपन्नाः ३७ तदेषनाथापदुरापमन्यैस्तमोजनिःक्रोधवशोप्यहीशः संसा
रचक्रेभ्रमतःशरीरिणोयदिच्छतःस्याद्विभवःसमक्षः ३८

चरत् अस्यसर्पस्यसकिंकृत्वा इतिकोवेत्तीत्यर्थः ३६ यत्तवपादरजःप्रपन्नाःप्राप्ताःपारमेष्ठ्यादिपितुच्छंमन्यंते ३७
अहोतदेषः अप्रयत्नएवप्रापप्राप्तः अन्यैर्लक्ष्म्यादिभिरपि पुनःकथंभूतंपादरजः यदिच्छतःसेव्यमेवभवत्वितिप्रार्थ
यतएवसमक्षःप्रत्यक्षएवविभवःअपेक्षितःसम्यग्भवति ३८

गर्भेजगंतियस्यतस्यातिभरेण अवसन्नमाक्रांतं पार्ष्णिः पादपृष्ठं आद्यं श्लथं विस्रंसमानावसनादयोयासांताः शरणंप्रपन्नाः
सत्यः तंप्रणेमुः सुविग्नमनसोविह्वलचित्ताः भुवीति तस्मिन्स्थानेजलादधस्ताद्धात्रीरेवासमलस्य पाप्मनोपिभर्त्तुर्मोक्षेप्स
वः भर्त्तुर्येछमलंतस्यवाभूतपतिं प्राणिमात्रस्यपतिं शरणदमाश्रयप्रदं ३२ प्रथमंतावत्कुपितंभगवंतंदंडानुमोदनेनोप
शमयंत्यः स्तुवंति न्याय्योहीति तत्रदंडानुमोदनं षड्भिर्दशभिः हरेःस्तुतिः आर्थनं पंचभिः श्लोकैः ततः पन्नगयोषितां नच

कृष्णस्यगर्भजगतोतिभरावसन्नं पार्ष्णिप्रहारपरिरुग्णफणातपत्रं दृष्ट्वाहिमाद्यमुपसेदुरमुष्यपत्न्य
आर्त्ताःश्लथद्वसनभूषणकेशबंधाः ३१ तास्तंसुविग्नमनसोथपुरस्कृतार्भाः कायंनिधायभुवि
भूतपतिंप्रणेमुः साध्व्यःकृतांजलिपुटाःशमलस्यभर्त्तुर्मोक्षेप्सवःशरणदंशरणंप्रपन्नाः ३२
नागपत्न्यऊचुः न्याय्योहिदंडःकृतकिल्बिषेस्मिंस्तवावतारःखलनिग्रहाय रिपोःसुतानामपितुल्य
दृष्टेर्धत्सेदमंफलमेवानु शासन् ३३ अनुग्रहोयंभवतःकृतोहिनोदंडोसतांतेखलुकल्मषा
पहः यद्दंदशूकत्वममुष्यदेहिनःक्रोधोपितेनुग्रहएवसंमतः ३४

निग्रहार्थेनुग्रहलक्षणंवैषम्यमित्याहुः धत्सेदममिति अनुशासन् आलोचयन् ३३ निग्रहोप्यनुग्रहायेत्युक्तं इदानी
मनुग्रहएवायंननिग्रहार्थइत्याहुः अनुग्रहइति नोस्माकं यस्मादमुष्यसर्पत्वंदृश्यते अतस्तन्मूलपापनिवर्त्तकोदंडोनुग्रह
एवक्रोधत्वेनप्रतीयमानोपीत्यर्थः ३४

आ. द.
७४ पृ.

तदेवाह: भूतेति आशय: चित्तं भूतादिरूपाय अतः सर्वकारणरूपायेति अहंकारात्मतयानमस्यंति त्रिगुणेनेति एवं सर्वे
कार्यैः त्रिगुणोभिमानः तेन गूढः स्वांशोभूतानामात्मनाअनुभूतिर्येनतस्मै ४२ तत्वे हंकारेणनावृत्त इति स्तुवंति नमोनंताय
अहंकारापरिच्छेदात् अतःसूक्ष्माया दृश्यत्वात् अतएव कूटस्थाय उपाधिकृतविकाराभावात् अतएव विपश्चितेसर्वज्ञा
य एवं वस्तुतः स्तुत्वा अचिंत्यमायात्वेन पुनः स्तुवंति नानावादानुरोधाय अस्तिनास्ति सर्वज्ञः किंचिंज्ञा बद्धः मुक्त एकोनेक
इत्यादीन्नानावादाननुरुणद्धि मायया अनुवर्तत इति यस्तस्मै किंच वाच्यवाचकयोः शक्तये अभिधानाभिधेयशक्तिभेदादपिनाना

74

भूतमात्रेंद्रियप्राणमनोबुद्ध्याशयात्मने त्रिगुणेनाभिमानेन गूढस्वात्मानुभूतये ४२ नमोनं
ताय सूक्ष्माय कूटस्थाय विपश्चिते नानावादानुरोधाय वाच्यवाचकशक्तये ४३ नमः प्रमाणमू
लाय कवये शास्त्रयोनये प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ४४ नमः कृष्णाय रामाय वसु
देवसुताय च प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः ४५

तेन प्रमीलायेत्यर्थः ४३ अनावृतत्वमेव हेतुं तरेणापि स्वयं सः स्तुवंति नमः प्रमाणमूलाय मानकार्यैः तत्वानुभवः
प्रमाप्रमायोगव्यवच्छिन्नं भाणं चक्षुरादीनां चक्षुरादिरूपाय अतएव कवये स्वयं तन्निरूपणे ज्ञानाय कुतः शास्त्रयोन
ये वेदात्मकत्व निःश्वासाय किंच प्रवृत्ताय निवृत्ताय निगमाय नमो नमः ४४ अनावृतैश्वर्यो बाह्यदेवचतुर्मूर्तिरूपेणासर्वो
पास्यत्वं च नमस्यंति नमः कृष्णायेति श्लोकत्रयेण रामाय संकर्षणाय वसुदेवसुताय वसुदेवशब्दितं शुद्ध सत्वं तत्र प्रकाश रामः
मानाय वासुदेवायेत्यर्थः सत्वतामुपासकानां पतये सात्वतपादिना पालकाय एवं चतुर्मूर्तये श्रीकृष्णाय तुभ्यं नमस्यति ७४
८५

नमस्तुभ्यंभगवते अचिंत्यैश्वर्यादिगुणाय तदुपादानाय दर्शयति श्लोकैर्विशेषणानि पुरुषाय पुरुषदेहेषु पूर्णांतर्यामिस्वरूपेण
वर्त्तमानाय महात्मने एवमपि अपरिच्छिन्नाय कुतः भूतावासाय आकाशादिवदाश्रयाय एतदपि कुतः भूताय पूर्वमपि सत्त्वेन कु
तः पराय कारणाय किंच परमात्मने कारणातीताय ॥३९ कारणत्वे कारणातीतत्वं समर्थयितुमाहुः ज्ञानविज्ञाननिधये
ज्ञानं श्रुतिः विज्ञानं चिच्छक्तिः उभयोर्निधये ताभ्यां पूर्णाय कथं तथात्वमत उक्तं ब्रह्मणेऽनंतशक्तये ब्रह्मणे कथंभू
ताय अगुणायाविकाराय कथंभूताय अनंतशक्तये प्राकृताय प्रकृतिप्रवर्त्तकाय अप्राकृतायेति वा अप्राकृतायानं

नमस्तुभ्यंभगवते पुरुषाय महात्मने भूतावासाय भूताय पराय परमात्मने ३९ ज्ञानविज्ञाननि
धये ब्रह्मणेऽनंतशक्तये अगुणायाविकारायनमस्तेप्राकृताय च ४० कालाय कालनाभाय का
लावयवसाक्षिणे विश्वाय तदुपद्रष्ट्रे तत्कर्त्रे विश्वहेतवे ४१

तशक्तियुक्ताय अयमर्थः अगुणत्वादविकारं ब्रह्मज्ञप्तिमात्रत्वात्कारणातीतं प्रकृतिप्रवर्त्तकोऽनंतशक्तिः विज्ञाननिधित्वा
दीश्वरः कारणं तदुभयात्मनेन नमस्यति ४० अनंतशक्तित्वात्कालशक्त्या विश्वसृष्ट्यादिरूपेण नमस्यति कालायका
लस्वरूपाय कालनाभाय कालशक्त्याश्रयाय कालावयवानां संख्यादिशामयानां साक्षिणे ततश्च विश्वाय विश्वरूपाय
तर्हि किं जडोऽहं नहि तदुपद्रष्ट्रे द्रष्टुमात्राय किंतु तत्कर्त्रे न च कर्तृमात्राय विश्वहेतवे सर्वकारणरूपाय ४१ रामजी

भा॰ द॰ कुतः परावरगतिज्ञाय स्थूलसूक्ष्माणां गतिज्ञत्वेन क्वापि भज्यमानायेत्यर्थः किंच तद्दृष्टे सर्वाध्यक्षाय सर्वस्याधिष्ठात्रे कुत एतत
७५ पृ॰ अविद्याय न विद्या यस्मिंस्तन्निषेधावधये विद्याय च तद्विकार्याधिष्ठानायेत्यर्थः किंच तद्दृष्टे अध्यासापवादसाक्षिणे अपि चो
स्य विद्याध्यासस्य तदपवादस्य च विद्याविद्याभ्यां हेतवे सिद्धे तवे विद्यारूपाय असिद्धे तवे अविद्यारूपाय यद्वा अविद्याय विद्यातोज
सा एव स्थारहिताय विद्याय च मायया स्वांशैः तत्तदवस्थाय तद्दृष्टे तासामवस्थानां भावाभावसाक्षिणे अन्यत्समानं तस्मा
२४२ त्सर्वगतित्वसर्वाधिष्ठातृत्वात्माभिमानत्वादिभिर्निरतिशयैश्वर्याय लुब्धं नम इति विशेषणैरसंकीर्णैः पंचपंचाशतानुतः अ
हि भिः प्रसन्नो नस्तासामिव भवेद्धरिः ४८ एवं तावदनुमोदनेन नमस्कारे भगवंतं प्रसाद्येदानीं तदधीनानां प्राणिनां को

75

परावरगतिज्ञाय सर्वाध्यक्षाय ते नमः अविद्याय च विद्याय तद्दृष्टेस्युत हेतवे ४८ त्वं ह्यस्य जन्मस्थिति
संयमान्विभो गुणैरनीहोकृतकालशक्तिधृक् तत्तत्स्वभावान्प्रतिबोधयन्सतः समीक्षयामोघविह
रईहसे ४९ तस्येव तेमूस्तनवः त्रिलोक्यां शांता अशांता उत मूढयोनयः शांताः प्रियास्ते ह्यधुनावितुं सतां
स्थातुं च ते धर्मपरीप्सयेहतः ५०

पराधस्त्वाशयवंत्यः प्रार्थयंते त्वं हीति अस्य लोकस्य जन्मादीन् त्वमेवाहृत अकर्तेः ततश्च तांस्तान्संस्कार रूपेण सतः स्वभा
वाद्गौरत्वादीन्प्रतिबोधयन् ईहसे क्रीडसि यद्वा अस्य जन्मादीस्त्वमेवेहसे इत्यन्वयः कथंभूतः अकृतः अनादिः याकालशक्तिः
तां धारयतीति तथा अन्यत्समानं ४९ अतस्तस्य तवैव अमूस्तनवः तन्यंत इति क्रीडोपस्काराः तथापि तवाधुना शांताः प्रियाः रामः
कुतः सतां परिपालनेच्छया ईहतः अवर्तमानस्य अतः तानवितुं स्थातुं स्थितस्य ५० ॐनमोभगवतेवासुदेवाय ऽऽ ऽऽ ७५

कथंचतुर्मूर्त्तित्वमित्यत आहुः नमोगुणप्रदीपायेति गुणाः अंतःकरणानि तानि प्रदीपयति प्रकाशयति इति तथा तस्मै चित्ताधिष्ठातृ
त्वेन चतुर्मूर्त्तित्वमित्यर्थः ननु तथाप्येकस्यैव कथं चातुर्रूप्यं अत आहुः गुणात्मच्छादनाय च तैरेव गुणैरुपासकानां फलदाने चित्त्या
द्यात्मानमाच्छाद्य नानात्वेन प्रतीतायेत्यर्थः ननु कथं तर्हि प्रतीतिः अतः उक्तं गुणवृत्त्युपलक्ष्यायेति चित्तादीनां चेतनाध्यवसा

नमोगुणप्रदीपायगुणात्मच्छादनायच गुणवृत्त्युपलक्ष्यायगुणद्रष्ट्रे
स्वसंविदे ४६ अव्याकृतविहारायसर्वव्याकृतसिद्धये हृषीकेशनमस्ते
स्तुमुनयेमौनशीलिने ४७

यादिवृत्तीनां उपलक्ष्याय गुणद्रष्ट्रे गुणसाक्षिणे कथंचिदुपलक्ष्य एवनज्ञेय इत्याहुः स्वसंविदे स्वगोचरायेत्यर्थः ४६
अगोचरत्वानुपलक्ष्यत्वं दर्शयंस्तो नमस्यंति अव्याकृतविहाराय वा अतर्क्यमहिम्न इत्यर्थः सर्वव्याकृतसिद्धये सर्वका
र्योत्पत्तिप्रकाशहेतुत्वेनोपलक्षणयोग्यायेत्यर्थः उपलक्षणांतरमाहुः हृषीकेश करणप्रवर्तक किं विषयत्तिस्यथा न मुनये
आत्मारामाय किं साधनवशेन महि मौनशीलिने मौनमात्मारामत्वात् तत्स्वभावाय ४७

नयुष्मत्तोभयमाप्नुयात् तस्यपुरुषाभिर्भयंजोसादनीयमित्याशङ्क्योपित्वयानिर्गंतव्यमित्याह ५९ त्वयित्रास्यितेतत्रसंभव

यएतत्संस्मरेन्मर्त्यः तुभ्यंमदनुशासनं कीर्तयन्नुभयोःसंध्योर्नयुष्मद्भयमाप्नुयात् ५९ योस्मिन्स्ना
त्वामदाक्रीडेदेवादीस्तर्पयेज्जलैः उपोष्यमांस्मरन्नर्चेत्सर्वपापैःप्रमुच्यते ६० द्वीपंरमणकंहित्वाह्र
दमेतमुपाश्रिताः यद्भयात्ससुपर्णस्त्वांनाद्यान्मत्पादलांछितं ६१ ऋषिरुवाच एवमुक्तोभगवताकृ
ष्णेनाद्भुतकर्मणा तंपूजयामाससुदानागपत्न्यश्चसादरं ६२ दिव्यांबरस्रङ्मणिभिःपरार्ध्यैरपिभूष
णैः दिव्यगंधानुलेपैश्चमहत्योत्पलमालया ६३ पूजयित्वाजगन्नाथंप्रसाद्यगरुडध्वजं ततःप्रीतो
भ्यनुज्ञातःपरिक्रम्याभिवाद्यतं ६४ सकलत्रसुहृत्पुत्रोद्वीपमब्धेर्जगामह तदैवसामृतजला
निर्विषायमुनाभवत् ६५ अनुग्रहाद्भगवतःक्रीडामानुषरूपिणः गतेसर्पेपरिष्वज्यमृतंपुनरिवा
गतं ६६ गोपाश्चर्मिहाईनसिंचिन्नेत्रजैर्जलैः कृष्णमक्लिष्टकर्माणमन्येविस्मितचेतचेत
सः ६७ तुष्टुवुर्मुदितागोपाहृष्टाशिवजलांनदीं गीयमानेसगोपीभिश्चरितैश्चारुविक्रमः संस्तूय
मानोगोपैश्चकृष्णोव्रजमुपागतः ६८ इतिश्रीभागवतेमहापुराणेदशमेषोडशोध्यायः १६

तीतिभावः नचत्वगरुडाद्भयंभवेदित्याह द्वीपमिति ६० इतिभावार्थदीपिकायांदशमेषोडशः १६ नागंशमदशेनागालयंतं
निरयापयत् वंधन्स्वच्छुवतःश्रांताःसुप्तांस्तत्रदवादयत् १

एवं चेत्त्वस्त्रियाचरणाय पराधः नहिं सोढव्य इति ५१ युष्मदनुग्रहे अन्येषां मृत्युरिति चेन्नेत्याहुः ५२ त्वदाज्ञया प्राणिनो नाधा

अपराधः सकृद्भर्त्रा सोढव्यः स्वप्रजाकृतः क्षंतुमर्हसि शांतात्मन्मूढस्य त्वामजानतः ५१ अनुगृह्णीष्व
भगवन्प्राणांस्त्यजति पन्नगः स्त्रीणां नः साधुशोच्यानां पतिः प्राणः प्रदीयतां ५२ विधेहि ते किंकरी
णामनुष्ठेयं तवाज्ञया यच्छ्रद्धयानुतिष्ठन्वै मुच्यते सर्वतो भयात् ५३ शुकउवाच इत्थं स नागपत्नीभिर्भग
वान्समभिष्टुतः मूर्छितं भग्नशिरसं विससर्जांघ्रिकुट्टनैः ५४ प्रतिलब्धेंद्रियप्राणः कालियः शनकैर्ह
रिं कृच्छ्रात्समुच्छ्वसन्दीनः सर्पः प्राह कृतांजलिः ५५ कालीय उ० वयं खलाः सहोत्पत्त्या तामसा दीर्घम
न्यवः स्वभावो दुस्त्यजो नाथ लोकानां यदसद्ग्रहः ५६ त्वया सृष्टमिदं विश्वं धातर्गुणविसर्जनं नानास्वभा
ववीर्यौजोयोनिबीजाशयाकृतिः ५७ वयं च तत्र भगवन्सर्पाजात्युरुमन्यवः कथं त्यजामस्त्वन्मायां
दुस्त्यजां मोहिताः स्वयं ५८ भवान्हि कारणं तत्र सर्वज्ञो जगदीश्वरः अनुग्रहं निग्रहं वा मन्यसे तद्वि
धेहि नः ५९ शुक उ० इत्याकर्ण्य वचः प्राह भगवान्कार्यमानुषः नात्र स्थेयं त्वया सर्प समुद्रं याहि माचिरं
स्वज्ञात्यपत्यदाराढ्यो गोनृभिर्भुज्यतां नदी मा भिर्भिमुनि भिर्भिर्नैवक्रतो वा हि मामाज्ञया ५९

मिति भावः ५३ गुणोर्मिविविधतया सृज्यते इति विसर्जनं तत्रापि नाना स्वभावादयो यस्य जगत् ५६ जात्याजन्मनैव उरुमन्युर्येषां ते
स्वयं कथं त्यजामः ५७ हि यस्मात् तत्र त्वन्मायात्यागे भवानेव कारणमितस्त्वनुग्रहं विहि वा मम माज्ञया स्वादतीति ईश्वरत्वान्निग्रहं

वा विधेहि ५९ यतो गोभिर्नृभिश्च नदी भुज्यतामिति ६०

भा॰ द॰
७१ पू॰

ताक्ष्यपुत्रोगरुडः मधुसूदनस्यासनं यस्मात्सः ७ यस्य गरुडस्या गम्यं अगाधतया दुरासदं ८ तदगम्यत्वे कारणमाह मंत्रेति

तं तार्क्ष्यपुत्रोस निरस्य मन्युमान् प्रचंड वेगो मधुसूदनासनः पक्षेण सव्येन हिरण्यरोचिषा जघान क
द्रुसुत मुग्रविक्रमः ७ सुपर्णपक्षाभिहतः कालीयोतीव विह्वलः ह्रदं विवेश कालिंद्याः तदगम्यं दुरास
दं ८ तत्रैकदा जलचरं गरुडो भक्ष्यमीप्सितं निवारितः सौभरिणा प्रसह्य क्षुधितो हरत् ९ मीना
न्सुदुःखिता न्दृष्ट्वा दीनान्मीनपतौ हते कृपया सौभरिः प्राह तत्रत्य क्षेम माचरन् १० ॥ अत्र प्रविश्य ग
रुडो यदि मीनान्स खादति सद्यः प्राणैर्वियुज्येत सत्यमेतद्ब्रवीम्यहं ११ तत्कालियः परं वेद नान्यः क
श्चन लेलिहः अवात्सीद्गरुडाद्भीतः कृष्णेन च विवासितः ॥ १२ ॥ कृष्णं ह्रदाद्विनिष्क्रांतं दिव्यस्रग्गंधवा
ससं महामणिगणाकीर्णं जांबूनदपरिष्कृतं ॥ १३ उपलभ्योत्थिताः सर्वे लब्धप्राणा इवासवः प्र
मोद निभृतात्मानो गोपाः प्रीत्याभिरेभिरे १४ यशोदा रोहिणी नंदो गोप्यो गोपाश्च कौरव कृ
ष्णं समेत्य लब्धेहा आसंल्लब्ध मनोरथाः १५

निवारितोपि १० लेलिहः सर्पः तत्रावात्सीत् १२ जांबूनदं सुवर्णं तेन अलंकृतं १३ असवः प्राणं इंद्रियाणि प्रमोदनिभृता त्मानः आनंदपूर्णमनसः १४ लब्धेहाः लब्धचेष्टाः १५

श्रीम॰
७१

असमंजसमप्रियं १ उपाहार्यैः सुपर्णभक्ष्यैः सर्पजनैः सर्पाजनाः तैः नागानां संबंधी यस्मिन्नेकैकेन नागेनोदीयते तथाभूतो यो बलिः सुपर्णाय निरूपितः वानस्पत्यः वनस्पतेर्बलिर्देयः नागालयवधापरिहाराय यो बलिः निरूपितः उपकल्पितः २ ते च नागाः स्वं स्वं भागं सुपर्णाय प्रयच्छंति ततो भीताः गोपीथाय रक्षणाय ३ विषवीर्याभ्यां यो मदः तेनाविष्टः काद्रवेयः कद्रूपुत्रः गरुडं कदर्थीकृत्य विगणय्य यद्वा उपहार्यैः सुपर्णभक्ष्यैः सर्पा एव जनाः तैर्नागानां संबंधी यस्मिन्नेकैको नागोदीयते तथाभूतो

राजोवाच नागालयं रमणकं कस्मात्तत्याज कालियः किं वा कृतं सुपर्णस्य तेनैकेनासमंजसं १
शुक उवाच उपहार्यैः सर्पजनैर्मासि मासीह यो बलिः वानस्पत्यो महाबाहो नागानां प्राङ्निरूपितः २ स्वं
स्वं भागं प्रयच्छंति नागाः पर्वणि पर्वणि गोपीथायात्मनः सर्वे सुपर्णाय महात्मने ३ विषवीर्यमदावि
ष्टः काद्रवेयस्तु कालियः कदर्थीकृत्य गरुडं स्वयं तं बुभुजे बलिं ४ तच्छ्रुत्वा कुपितो राजन्भगवान्भ
गवत्प्रियः विजिघांसुर्महावेगः कालियं समुपाद्रवत् ५ तमापतंतं तरसा विषायुधः प्रत्यभ्ययादु
च्छ्रितनैकमस्तकः दद्भिः सुपर्णं व्यदशद्दतायुधः करालजिह्वोच्छ्वसितोग्रलोचनः ६

यो बलिः सुपर्णाय निरूपितः तत्र स्वं स्वं भागं सर्वे नागाः प्रयच्छंति कालियस्तु न प्रयच्छति किंतु अन्यैर्दत्तमपि बलिं स्वयमेव बुभुजे ४ विषमेवायुधं यस्य सः प्रत्यभ्ययात् योद्धुं प्रतिजगाम उच्छ्रितनैकमस्तकः उन्नमितानेकफणः दद्भिः आयुधः कराल जिह्वश्चासौ उच्छ्वसितोग्रलोचनः उच्छ्वसितानि जृंभितानि उग्राणि लोचनानि यस्य सः ६ ॐ नमो भगवते वासुदेवाय ऽऽ

भा० द० अष्टादशे ततो ग्रीष्मे वसंतगुणलक्षिते अथात यद्वने नाम प्रलंबं लीलया हरिः १ हत्वा नृत्तं फणाग्रेषु कालियस्य सकौतुकं व
७८ पू० लं प्रलंबं तुंगांसमारोह यदराति हा गोपालछद्ममायया गोपालनमेव छद्म यस्यां तया २ वसंतमासमाह चतुर्भिः ३ यत्र ग्रीष्मे
पि निर्झराणां निनादेन घोषेण निरस्तस्वनाः छन्नध्वनयो झिल्लिकाः कठोरध्वनयः सूक्ष्मकीटका यस्मिन् स्वरेति पाठे स्वरो गंध
र्वजातिषु इति कोशे स्वराणां गंधर्वाणां झिल्लिकाः कठोरध्वनिः तथाभूतं वृंदावनं भवति किंच शश्वत्तेषां निर्झराणां शी

78

शुकउवाच अथकृष्णःपरिवृतोज्ञातिभिर्मुदितात्मभिः अनुगीयमानोन्यविशद्व्रजंगोकुलमंडितं १
व्रजेविक्रीडतोरेवंगोपालछद्ममायया ग्रीष्मोनामर्तुरभवन्नातिप्रेयाञ्छरीरिणां २ सचवृंदावनगु
णैर्वसंतइवलक्षितः यत्रास्तेभगवान्साक्षाद्रामेणसहकेशवः ३ यत्रनिर्झरनिर्ह्रादनिवृत्तस्वनझि
ल्लिकं शश्वत्तच्छीकरर्जीषद्रुममंडलमंडितं ४ सरित्सरःप्रस्रवणोर्मिवायुना कल्हारकंजोत्पलरेणुहा
रिणा नविद्यतेयत्रवनौकसांदवोनिदाघवह्न्यर्कभवोतिशाद्वले ५ ॥ ॥

करैः अंबुकणैः ऋजीषाः स्निग्धाः ये द्रुमाः तेषां मंडलेन मंडितं ४ यत्र ग्रीष्मे वने वा निदाघो ग्रीष्मः तेन वह्निकालेन वह्न्यर्को राम:
र्काच्च भवतीयो दवः तापः अतिशाद्वले अति हरिततृणाकीर्णे यद्वा अतिक्रांत शाद्वलेपि स्थाने ५ श्रीरामजी ॥ ७८

नागा वृक्षा अपि शुष्काः संतः सद्य एव विरूढा इत्यर्थः १६ नष्टलब्धप्रजा नष्टा पुनर्लब्धा प्रजा यस्याः सा १९ श्रमेण कर्षिता उपकू

रामश्चाच्युतमालिंग्य जहासास्यानुभाववित् प्रेम्णा तमंकमारोप्य पुनः पुनरुदैक्षत १६ नगा गावो वृषा
वत्सा लेभिरे परमां मुदं १६ नंदं विप्राः समागत्य गुरवः सकलत्रकाः ऊचुस्ते कालियग्रस्तो दिष्ट्या मुक्तः
तवात्मजः १७ देहि दानं द्विजातीनां कृष्णनिर्मुक्तिहेतवे नंदः प्रीतमना राजन्गाः सुवर्णं तदादिशत् १८ य
शोदा च महाभागा नष्टलब्धप्रजा सती परिष्वज्यांकमारोप्य मुमोचाश्रुकलां मुहुः १९ तां रात्रिं तत्र
राजेंद्र क्षुत्तृड्भ्यां श्रमकर्षिताः ऊषुर्व्रजौकसो गावः कालिंद्या उपकूलतः २० तदा शुचिवनोद्भूतो दा
वाग्निः सर्वतो व्रजं सुप्तं निशीथ आवृत्य प्रदग्धुमुपचक्रमे २१ तत उत्थाय संभ्रांता दह्यमाना व्रजौक
सः कृष्णं ययुस्ते शरणं मायामनुजमीश्वरं २२ कृष्ण कृष्ण महाभाग हे रामामितविक्रम एष घोरत
मो वह्निः तावकान्ग्रसते हि नः २३ सुदुस्तरान्नः स्वान्पाहि कालाग्नेः सुहृदः प्रभो न शक्नुमः त्वच्चरणं
संत्यक्तुमकुतोभयं २४ इत्थं स्वजनवैक्लव्यं निरीक्ष्य जगदीश्वरः तमग्निमपिबत्तीव्रमनंतोऽनंतश
क्तिधृक् २५ इति दशमे सप्तदशः १७

लतः कूलप्रांते २० कालाग्नेर्मृत्युरूपादग्नेः न भवतो विभीमः किंतु त्वच्चरणवियोगादित्याहुः न शक्नुम इति विमोहितो हि दंडे
न ततः स्वचरणं गतान्गोपान्पादांततोऽसावनंतावहनवह्नितः २४ २५

इति भावार्थदीपिकायां दशमे सप्तदशः १७

भा० द०　दुर्दुरस्त्रावैः मंडूकस्तुतिभिः स्यंदोलिकया दोलालंबनेन नृपाणामिव लीलया १५ नद्यः अद्रिद्रोण्यः पर्वतदर्यः कुंजाश्चिलत
७९ पू०　तादिपिहितावकाशा कुंजेषु कानने स्वसरस्सु च १६ पशूंश्चारयंतोः सतोः तद्वने तस्मिन्वने तयोर्जिहीर्षया हर्तुमिच्छया

क्वचिच्च दुर्दुरस्त्रावैर्विविधैरुपमंत्रिणैः कदाचित्स्यंदोलिकया कर्हिचिन्नृपलीलया १५ एवं तौ लोकसि
द्धाभिः क्रीडाभिश्चेरतुर्वने नद्यद्रिद्रोणीकुंजेषु कानने सु सरस्सु च १६ पशूंश्चारयतो गोपैस्तद्वने राम
कृष्णयोः गोपरूपी प्रलंबो गादसुरस्तज्जिहीर्षया १७ तं विद्वानपि दाशार्हो भगवान्सर्वदर्शनः अ
न्वमोदत तत्सख्यं वधं तस्य विचिंतयन् १८ तत्रोपहूय गोपालान्कृष्णः प्राह विहारवित् हे गोपा वि
हरिष्यामो द्वंद्वीभूय यथायथं १९ तत्र चक्रुः परिवृढौ गोपा रामजनार्दनौ कृष्णसंघट्टिनः केचि
दासन्रामस्य चापरे २० आचेरुर्विविधाः क्रीडा वाह्यवाहकलक्षणाः यत्रारोहंति जेतारो वहंति च
पराजिताः २१ वहंतो वाह्यमानाश्च चारयंतश्च गोधनं भांडीरकं नाम वटं जग्मुः कृष्णपुरोगमाः २२
रामसंघट्टिनो यर्हि श्रीदामवृषभादयः क्रीडायां जयिनस्तांस्तानूहुः कृष्णादयो नृप २३ उवाह कृष्णो
भगवान्श्रीदामानं पराजितः वृषभं भद्रसेनस्तु प्रलंबो रोहिणीसुतं २४

१७ यथायथं वयोबलादनुरूपद्वंद्वीभूय १९ परिवृढौ नायकौ तत्र केचन श्रीकृष्णसंघट्टिनः कृष्णपक्षीयाः २० वाह्य

नानाः वाह्यमानाः २२ २४

रामः
७९

मनुशाद्वलमेव कुतस्त्यं तत्राह अगाधेति अगाधानि तोयानि यासां तासां ह्रदिनीनां तटस्पर्शीभिरूर्मिभिः पुलिनैः द्रवत्पुरीष्यं
पंको यस्याः तस्या भुवो रसं शाद्वलितं शाद्वलरूपतां च विषवदुल्बणा अपि सूर्यरश्मयः न गृह्णंते न हरंतीति ६ तदनंतरं चित्रा

अगाधतोयह्रदिनीतटोर्मिभिर्द्रवत्पुरीष्याः पुलिनैः समंततः नयत्र चंडांशुकरा विषोल्बणा भुवो रसं शाद्वलि
तं च गृह्णते ६ वनं कुसुमितं श्रीमन्नदच्चित्रमृगद्विजं गायन्मयूरभ्रमरं कूजत्कोकिलसारसं ७ क्रीडि
ष्यमानस्तत्कृष्णो भगवान्बलसंयुतः वेणुं विरणयन्गोपैर्गोधनैः संवृतोविशत् ८ प्रवालबर्हस्तबक
स्रग्धातुकृतभूषणाः रामकृष्णादयो गोपा ननृतुर्युयुधुर्जगुः ९ कृष्णस्य नृत्यतः केचिज्जगुः केचिद
वादयन् वेणुपाणितलैः शृंगैः प्रशशंसुरथापरे १० गोपजातिप्रतिच्छन्ना देवा गोपालरूपिणः ई
डिरे कृष्णरामौ च नटा इव नटं नृप ११ भ्रमणैर्लंघनैः क्षेपैरास्फोटनविकर्षणैः चिक्रीडतुर्नियुद्धेन
काकपक्षधरौ क्वचित् १२ क्वचिन्नृत्यत्सु चान्येषु गायकौ वादकौ क्वचित् शशंसतुर्महाराज साधुसा
ध्विति वादिनौ १३ क्वचिद्बिल्वैः क्वचित्कुंभैः क्वचामलकमुष्टिभिः अस्पृश्यनेत्रबंधाद्यैः क्वचिन्मृगखगेह

मृगाद्विजाश्च यस्मिन् गायंतो मयूरा भ्रमराश्च यस्मिन् कूजंतः कोकिलासारसाश्च यस्मिंस्तत् अविशत् ७ काकपक्षाः चूडाक
रणात् प्राक्तनकेशाः भ्रमणादि प्रकारैः नियुद्धेन बाहुयुद्धेन वा चिक्रीडतुः १२ निंबैर्बिल्वफलैः अस्पृश्यत्वं नेत्रबंधश्च त
तदाद्यैर्मृगाणां खगानां चेष्टया १४

भा. द.
८० पू

अपस्मृतो गतस्मृतिः महारवं समीरयन् व्यसुः गतप्राणः मघवत आयुधेन वज्रेण हतः २९ तदर्हणं प्रसंसाद ३१ इतिभावा

-80

स आहतः सपदि विशीर्णमस्तको मुखाद्वमन्रुधिरमपस्मृतो ऽसुरः महारवं व्यसुरपतत् समीरयन् गिरिर्यथा
मघवत आयुधाहतः २९ दृष्ट्वा प्रलंबं निहतं बलेन बलशालिना गोपाः सुविस्मिता आसन्साधु सा
ध्विति वादिनः ३० आशिषो ऽभिगृणंतस्तं प्रशशंसुस्तदर्हणं प्रेत्यागतमिवालिंग्य प्रेमविह्वलचेतसः
३१ पापे प्रलंबे निहते देवाः परमनिर्वृताः अभ्यवर्षन्बलं माल्यैः शशंसुः साधु साध्विति ३२ इति श्री
भागवते महापुराणे दशमे ऽष्टादशो ऽध्यायः १८ शुक उवाच क्रीडासक्तेषु गोपेषु तद्गावो दूरचारिणी
स्वैरं चरंत्यो विविशुस्तृणलोभेन गह्वरं १ अजा गावो महिष्यश्च निर्विशंत्यो वनाद्वनं ईषीकाटवीं
विविशुः क्रंदंत्यो दावतर्षिताः २ ते ऽपश्यंतः पशून्गोपाः कृष्णरामादयस्तदा जातानुतापा न विदुर्विचि
न्वंतो गवां गतिं ३

र्थदीपिकायां दशमे ऽष्टादशः १८ ऊनविंशे निविष्टेषु गोपगोकुलमच्युतः मुंजारण्यमरण्याग्नेरग्रस्तत्त्रिपानलः दूरचा
रिणीः दूरचारिण्यो वनाद्वनं निर्विशंत्यः १ दावेन तर्षिताः तृषिताः क्रंदंत्यः इषीकाटवीमिषुधिस्तंबवनं तत्र विशेषात् रणं प्रनिर्वि रामः
विशुः २ कृष्णरामो आदिर्येषां ते न ततो ३ ८०

कुधम हर्षिवंचनाम अवरुध्यते आस्मिन्निति अवरो हरणं मर्यादा ततः परं दूरमगात् २५ धरणीधरेंद्रवजौरवं यस्तं तंनि
जमासुरं वपुरास्थितः पुरटपरिच्छदः सुवर्णालंकारः तडिद्वान् विद्युद्दीप्तिमान् इत्यनेकाशोपमायदुपतिना उति
शमोपमाउडुपतिं तारागणपतिं वहतीति उडपतिवाइयदि यथोचितस्थानेषु स्थितो नियुतो भवंति उपरिचोडुपतिः त
दासौ वुदो यथाभवति लक्षत्व भावितत्यर्थः २६ अनलमत्तिवेगेन प्रदीप्ते दृशो यस्मिंस्तत् भ्रुकुटितटसंलग्नाउग्रादंष्ट्राय

अविसह्यंमन्यमानो रामं दानवपुंगवः वहद्दूरतरं आगादवरोहणगतः परं २५ तमुद्वहन्धरणि
धरेंद्रगौरवं महासुरो विगतरयो निजं वपुः समास्थितः पुरटपरिच्छदो वभौ तडित्मानुडुपतिवाडि
वांवुदः २६ निरीक्ष्य चलद्वपुरलमंवरे चरत्प्रदीप्तदृग्भ्रुकुटितटोग्रदंष्ट्रकं ज्वलच्छिखं कटक किरीटकुं
डलत्विषाद्भुतंहलधरईषत्त्रसत् २७ अथागतस्मृतिरभयो रिपुं वलो विहायसार्थमिव हरंतमात्मनः
रुषाहनच्छिरसिदृढेन मुष्टिनासुरा धिपो गिरिमिव वज्ररंहसा २८

प.

स्मिंस्तत् प्रदीप्तदृक् भ्रुकुटितटं यस्मिन् उग्रादंष्ट्रा यस्मिन् ज्वलंत्यः शिखाकेशाः यस्मिंस्तत् २७ आगतास्य तिज्ञा
नं यस्य सः अतएवाभयः आत्मनः सार्थंगोपसमूहं विहाय हरंतं रिपुं महनत् जघान यथा विहायसा आकाशमार्गेण
आत्मनः प्राप्तमर्थमिव हरंतंमिति वज्ररंहसा वज्रवेगेन मुष्टिनातस्य प्रलंबस्य मस्तके मुष्टिहननेनजीवितत्त्वयइत्यागत

भा०द०
८१ पू०

श्रीदामादिस्वगोपानां स्वागमाच्छन्नत्वतां स्वैश्वर्यमाविरकरोद्धनवह्नि निपानतः इति श्रीभा
वार्थदीपिकायां दशमे एकोनविंशः ॥ विंशे प्रावृड्वर्णनेनावतोचिताः प्रावृट्क्रीडा निरू
प्यन्ते गोपरामयुजो हरेः हेयोपादेयमानेन प्रावृड्वर्द्धतुश्रियोः वर्णनं त्वद्भुतैश्वर्यकृष्णनी
त्वा विवक्षया तत्र प्रावृड्वर्णनं ततः प्रावर्तते त्या ॥ दिद्वाविपात्या एवैषां प्राणितां समुद्भव

कृष्णस्य योगवीर्यं तद्योगमायानुभावितं दावाग्नेरात्मनः क्षेमं वीक्ष्य ते मेनिरे मरं १४
गावः सन्निवर्त्य सायाह्ने सहरामो जनार्दनः वेणुं विरणयन्गोष्ठमागाद्गोपैरभिष्टुतः १५
गोपीनां परमानंद आसीद्गोविंददर्शने क्षणं युगशतमिव यासां येन विनाभवत् इती १६
श्रीभागवते दशमस्कंधे एकोनविंशोध्यायः १९ श्रीशुक उ० तयोस्तदद्भुतं कर्म दावाग्नेर्मो
क्षमात्मनः गोपाः स्त्रीभ्यः समाचख्युः प्रलंबवधमेव च १ गोपवृद्धाश्च गोप्यश्च तदुपाक
र्ण्य विस्मिताः मेनिरे देवप्रवरौ कृष्णरामौ व्रजं गतौ २ ततः प्रावर्तत प्रावृट् सर्वसत्वसमु
द्भवा विद्योतमानपरिधिर्विस्फूर्जितनभस्तला ३ सांद्रनीलांबुदैर्व्योम सविद्युत्स्तनयि
त्नुभिः अस्पष्टज्योतिराच्छन्नं ब्रह्मेव सगुणं बभौ ४

उत्पत्तितो जीवततश्च यस्यां सा प्रावृट् विद्योतमानाः परिधयः परेणेषाः परितो यस्य परिधिरिति विवु
द्धि । विलसितादि एव यस्यां सा विस्फूर्जितं संस्तुनितं नभस्तलं यस्यां सा द्वैतीविडेरिंद्रति लघते विघकूजतितिस ८१
हितैः अस्पष्टं कनत्सगुणं गुणैरकृष्णं जीवाद्ब्रह्मवीक्षकूजितां बुदातांसससत्वरजस्तमोभिहयमा ४

९७ [illegible]

तासांगवांखुरैर्दच्छिन्नैःतृणैर्गोष्पदैरंकितैश्चभूप्रदेशैःतृणैर्वामार्गमन्वगमन् नष्टाजीविकाआगतजीविकासाधनाः अतएव

तृणैस्तत्खुरदच्छिन्नैर्गोष्पदैरंकितैर्गवां मार्गमन्वगमन्सर्वेनष्टाजीव्याविचेतसः ४ मुंजाटव्यांभ्रष्टमा
र्गंक्रंदमानंस्वगोधनं संप्राप्यतृषिताःश्रांताःततस्तेसन्यवर्तयन् ५ ताआहूताभगवतामेघगंभी
रयागिरा स्वनाम्नांनिनदंश्रुत्वाप्रतिनेदुःप्रहर्षिताः ६ ततःसमंताद्दवधूमकेतुर्यदृच्छयाभूत्क्षय
कृद्वनौकसां समीरितःसारथिनोल्बणोल्मुकैर्विलेलिहानःस्थिरजंगमान्महान् ७ तमापतंतंपरितो
दवाग्निंगोपाश्चगावःप्रसमीक्ष्यभीताः ऊचुश्चकृष्णंसबलंप्रपन्नायथाहरिंमृत्युभयार्दिताजनाः ८
कृष्णकृष्णमहावीर्यहेरामामितविक्रमः दावाग्निनादह्यमानान्प्रपन्नांस्त्रातुमर्हथः ९ नूनंत्व
द्बांधवाःकृष्णनचार्हंत्यवसीदितुं वयंहिसर्वधर्मज्ञात्वन्नाथास्त्वत्परायणाः १० श्रीशुकउवाच व
चोनिशम्यकृपणंबंधूनांभगवान्हरिः निमीलयतमाभैष्टलोचनानीत्यभाषत ११ तथेति
मीलिताक्षेषुभगवानग्निमुल्बणं पीत्वामुखेनतान्कृच्छ्राद्योगाधीशोव्यमोचयत् १२ ततश्चतेऽक्षी
ण्युन्मील्यपुनर्भांडीरमापिताः निशाम्यविस्मिताआसन्नात्मानंगाश्चमोचिताः १३

विचेतसः ४ मुंजाटव्यामितिसैवगोपानांनाशहेतुः ५ गोपानांनाशहेतुर्वनवन्हिःसर्वतःप्रादुरभूत् सारथिनावायुना ७

तेक्षीणकृच्छ्रप्रदेशात्तमांगोक्षितातत्सुलभामेवभांडीरे
मीलितानामीषपदृश्यमः १२ तत्रैवभांडीरेआपिताः तत ८

भा॰ द॰ हरिभिर्नीलैः शष्पैः बालतृणैर्नीलवर्णा क्वचित् क्वचिदिंद्रगोपैः कीटविशेषैर्लोहितातत्र तत्र उच्छिलींध्रैः छत्राकारैरुद्भिज्जैः कृतछा

८२ पू॰ यानृणां राज्ञां श्रीः सेनासंपदिव ११ क्षेत्राणीति तत्र हि पृथ्वीरविच्छेद्येनसंततः श्रियं वादयो मुदं ददुः विच्छेदे पुष्यतानुतापं चेति

१२ अविभ्रन् अबिभरुः यथा हरिविषेवयेति हरिसेवायां प्रवृत्तादिः सद्य एव सर्वे सश्रीका भवंति तस्मात् परमधर्मेत्वा

२

हरिता हरिभिः शष्पैरिंद्रगोपैश्च लोहिता उच्छिलींध्रकृतछाया नृणां श्रीरिव भूरभूत् ११ क्षेत्राणि सस्यसंपद्भिः कर्षकाणां मुदं ददुः धनिनामुपतापं च दैवाधीनमजानतां १२ जलस्थलौकसः सर्वे नववारिनिषेवया अविभ्रन् रुचिरं रूपं यथा हरिनिषेवया १३ सरिद्भिः संगतः सिंधुश्चुक्षोभ श्वसनोर्मिमान् अपक्वयोगिनश्चित्तं कामाक्तं गुणयुग्यथा १४ गिरयो वर्षधाराभिर्हन्यमाना न विव्यथुः अभिभूयमाना व्यसनैर्यथाधोक्षजचेतसः १५ मार्गा बभूवुः संदिग्धास्तृणैश्छन्ना ह्यसंस्कृताः नाभ्यस्यमानाः श्रुतयो द्विजैः कालहता इव १६ लोकबंधुषु मेघेषु विद्युतश्चलसौहृदः स्थैर्यं न चक्रुः कामिन्यः पुरुषेषु गुणिष्विव १७

स्वरमसुखत्वाच्छेतितत्वादिति १३ कामाक्तं कामवासनायुक्तमिति श्वसनोर्मिसाम्यंश्च गुणैर्विषयैर्युज्यत इति ध्येति सरि रामः

त्संगतिसाम्यं १४ अधोक्षज एव चेतो येषां ते १५ असंस्कृताः अक्षुण्णाः नाभ्यस्यमानाः इत्यसंस्कृतसाम्यं कालेन चा ८२

रुत्वालग्णाछादनस्य साम्यं १६ यथा कामिन्यः पुंश्चल्यः १७

पर्जन्यो मेघसूर्ययोः पर्जन्यः सूर्यः स्वगोभिः स्वैः कालेयथोचितसमये अत्रराजोपमश्चादानानात्समये पुनर्दानताचसूचिता ५
अस्य विश्वस्यप्राणानं आप्यायनकरंजीवनमुदकं मुमुचुः कृपालवो यथाजननतत्रनिरीक्ष्यवायुभिर्वेपिताः अनुकंपितमार्गाः तद्दो
प्यायानां यस्वजीवनमपित्यजंति तद्वन्महांतो मेघाः तडिन्नेत्रैः तद्दुःविश्वं निरीक्ष्य वेपिताः जीवनंमुमुचुरिति ६ तपसा पीडितेन

अष्टौमासान्निपीतंयद्भूम्याउदमयंवसु स्वगोभिर्मोक्तुमारेभे पर्जन्यः कालआगते ५ तडित्वंतोम
हामेघाःचंडश्वसनवेपिताः प्रीणनंजीवनंह्यस्यमुमुचुःकरुणाइव ६ तपःकृशादेवमीढाआसीद्वर्षी
यसीमही यथैवकाम्यतपसस्तनुःसंप्राप्यतत्फलं ७ निशामुखेषुखद्योतास्तमसाभांतिनग्रहाः यथा
पापेनपाषंडानहिवेदाःकलौयुगे ८ श्रुत्वापर्जन्यनिनदंमंडूकाअसृजन्गिरः तूष्णींशयानाःप्राग्यद्वद्ब्राह्मणा
नियमात्यये ९ आसन्नुत्पथवाहिन्यःक्षुद्रनद्योनुशुष्यतीः पुंसोयथास्वतंत्रस्यदेहद्रविणसंपदः १०

कृशादेवमीढा पर्जन्यसिक्ता मिहसेचनेधातुः वर्षीयसीउद्भूतापुष्टा काम्यंतपो यस्य तस्यतनुः कामान्संप्राप्य यथेति ७ नित्यकर्मा
वसाने आचार्याणां निनदंश्रुत्वा तद्विश्या यथाधीयंते तद्वदिति ९ अनुशुष्यती अनुशुष्यंत्यः अस्वतंत्रस्य इंद्रियपरतंत्रस्य स्वतंत्र

स्यमंतकाख्यटीका ८०

भा॰ द॰ प्रावृसीकृतां क्रीडां वर्णयति एवं वनमिति सप्तभिः वर्षिष्ठः समृद्धः २५ वनौकसः पुलिंदीः प्रमुदिताः भगवान्ददृशे तथा वनराजिभिर्मधुच्युतः मधु
८३ पू॰ स्रावाः ददृशे गिरेः सकाशाज्जलधाराः तासां नादान् आसन्नानि कटवर्त्तीनि गुहाश्च यद्वा वनौकसः प्रमुदिता आसन् तथा वनराजिर्वनरा

83

एवं वनं तद्वर्षिष्ठं पक्वखर्जूरजंबुमत् गोगोपालैर्वृतो रंतुं सबलः प्राविशद्धरिः २५ धेनवो मंदगामिन्य ऊधोभारे
ण भूयसा ययुर्भगवताहूता द्रुतं प्रीत्या स्नुतस्तनीः २६ वनौकसः प्रमुदिता वनराजीर्मधुच्युतः जलधारा गिरेर्ना
दानासन्ना ददृशे गुहाः २७ क्वचिद्वनस्पतिक्रोडे गुहायां चाभिवर्षति निर्विश्य भगवान्रेमे कंदमूलफलाशनः २८
दध्योदनं समुपानीतं शिलायां सलिलांतिके संभोजनीयैर्बुभुजे गोपैः संकर्षणान्वितः २९ शाद्वलोपरि संविश्य
चर्वतो मीलितेक्षणान् तृप्तान्वृषान्वत्सतरान् गाश्च स्वोधोभरश्रमाः ३० प्रावृट्श्रियं च तां वीक्ष्य सर्वभूतमुदावहां
भगवान्पूजयांचक्रे आत्मशक्त्युपबृंहितां ३१ एवं निवसतोस्तस्मिन् रामकेशवयोर्व्रजे शरत्समभवद्व्यभ्रा स्वच्छांबुपरुषा

जयः मधुच्युतो आसन् गिरेर्जलधारा आसन् तानेवंभूतान् ददृशे सर्वतो ददर्श भगवान् तथा धाराणां नादान् गुहाश्चेति २७ अथ शारदं व राम॰
र्णयति एवं निवसतोरित्यष्टादशभिः ३१ विगतानि अभ्राणि यस्यां सा स्वच्छान्यंबूनि यस्यां सा अपरुषः शांतो निलो यस्यां सा सा च सा च ३२ ८३

निर्गुणं ज्यारहितमपि गुणिनं निर्गर्जितशब्दवति अभात् असौ भलगुणव्यतिकरात्मके व्यक्ते प्रपंचे अगुण एवात्मा निर्गुणः पुरुषो
यथेति १८ स्वभासा भाषितया अहंमन्येति स्वचैतन्ये नैव प्रकासिते गाहंकारेण छन्नो जीवो यथा मृषा अहं विद्वान् इत्तावे
ना भ्रूर इति भ्रखस्रती स्वैवारोपितयेति १९ मेघागमे नोत्सवो येषां मतो हृष्टाः नानात्ममर्त्त्यः अनेकरूपदेहः २१ अशां

धनुर्वियति माहेंद्रं निर्गुणं च गुणिन्यभात् व्यक्ते गुणव्यतिकरे गुणवान्पुरुषो यथा १८ नरराजोडुपच्छन्नः
स्वज्योत्स्ना राजितैर्घनैः अहंमत्या भासितया स्वभासा पुरुषो यथा १९ मेघागमोत्सवा हृष्टाः प्रत्यनंदन्शिखं
डिनः गृहेषु तप्ता निर्विण्णा यथा च्युतजनागमे २० पीत्वापः पादपाः पद्भिः रासन्नानात्ममूर्त्तयः प्राक्क्षामाः तपसा पा:३
ता श्रांता यथा कामानुसेवया २१ सरस्स्वशांतरोधस्सु न्यूषुरंगापि सारसाः गृहेष्वशांतकृत्येषु ग्राम्या इव दुराशयाः २२
जलौघैर्निरभिद्यंत सेतवो वर्षतीश्वरे पाखंडिनामसद्वादैर्वेदमार्गाः कलौ युगे २३ व्यमुंचन्वायुभिर्नुन्ना भूतेभ्यो ह्य
मृतं घनाः यथाशिषो विट्पतयः काले काले द्विजेरिताः २४

ष
तानि पंककर्दमकुत्कानि रोधांसि तटानि येषां ते न्यूषुः निवसन् सारसाश्चक्रवाकाश्च अशांतानि घोराणि अनुपरतानि वा
कृत्यानि येषु तेषु गृहेषु २२ ईश्वरे इंद्रे २३ नुन्नाः प्रेरिताः आशिषः कामान् विट्पतयो राजानः वनजांपतयो वा द्विजेरिताः पुरोहि
तैरुक्ताः २४॥ ॥

भा० द०
८४ पू०

गाधेल्पेजलेचरंतीति तथातेमीनादयः नैवाविंदन्नैवलेभिरे ३७ शनैः शनैरिति तत्रममतामिवपंकं अहंतामिवामतां अपक्वतां जडु
रिति ३९ आत्मनिजीवात्मन्युपरतेसम्यक् त्यक्तक्रियो मुनिरिवनिश्चलांबुः बभूव स एव उपरतागमाः निवृत्तवेदघोषः समुनिरिव

नैवाविदन्क्षीयमाणंजलंगाधजलेचराः यथायुरन्वहंक्षय्यंनरामूढाःकुटुंबिनः ३७ गाधवारिचरास्तापमविं
दन्शरदर्कजं यथादरिद्रःकृपणःकुटुंब्यविजितेंद्रियः ३८ शनैःशनैर्जहुःपंकंस्थलान्यामंचवीरुधः यथाहं
ममतांधीराःशरीरादिष्वनात्मसु ३९ निश्चलांबुरभूत्तूष्णींसमुद्रःशरदागमे आत्मन्युपरतेसम्यङ्मुनि
र्व्युपरतागमः ४० केदारेभ्यस्त्वपोगृह्णन्कर्षकादृढसेतुभिः यथाप्राणैःस्रवज्ज्ञानंतन्निरोधेनयोगिनः
४१ शरदर्कांशुजांस्तापान्भूतानामुडुपोहरत् देहाभिमानजंबोधंमुकुंदोव्रजयोषितां ४२ खमशोभतनिर्मेघं
शरद्विमलतारकं सत्वयुक्तंयथाचित्तंशब्दब्रह्मार्थदर्शनं ४३ अखंडमंडलोव्योम्निरराजोडुगणैः
शशी यथायदुपतिःकृष्णोवृष्णिचक्रावृतोभुवि ४४

तूष्णींबभूवसमुद्रइति ४० केदारेभ्योवप्रसेतुशालिक्षेत्रेभ्योदृढैःसेतुभिरपः अगृह्णन् ततःपरंदृष्ट्याभावात् प्राणैरिंद्रियैःसंतन्निरोधेन
इंद्रियप्रत्याहारेण ४१ देहाभिमानजंबोधं भिवव्रजयोषितां मुकुंदइवेत्यर्थः ४२ शरदाविमलाः तारकायस्मिंस्तत् शब्दब्रह्मणोवेदस्यार्थो

न् पूर्वोत्तरमीमांसानि तानि दर्शयतीति तथ्यानदिव ४३ ४४

रास:
८४

84

नीरजानामुत्पत्तिर्यस्यां तया शरदा उत्पलानी रजानामुत्पत्त्या वा ३३ व्योम्न इति व्योमादीनां चतुर्णां चतुरो मलान् शरदहरत् आश्रमिणां चतु
र्णां कृष्णे जाता भक्तिर्यथाशुभमसुखं हरति तथाहि ब्रह्मचारिणो गुर्वर्थं दिकाहरणं कुंभकर्म यथा भक्तिर्हरति तथापुराणश्रवणेनानुपयोगात् गु
रुभिरपि कन्यायां स्पतस्याभियोगात् एवं व्योम्नोऽभ्रं शरज्जहार यथा गृहस्थस्य चं प्रपत्यादि शांकार्यं भक्तिः हि रति विविक्तवासरूपत्वेः यथाभ्रे

शरदानीरजोत्पत्त्यानीराणिप्रकृतिंययुः भ्रष्टानामिवचेतांसिपुनर्योगनिषेवया ३३ व्योम्नोब्भ्रंभूतशा
बल्यंभुवःपंकमपांमलं शरज्जहाराश्रमिणांकृष्णेभक्तिर्यथाशुभं ३४ सर्वस्वंजलदाहित्वाविरेजुःशुभ्र
वर्चसः यथात्यक्तैषणाःशांतामुनयोमुक्तकिल्बिषाः ३५ गिरयोमुमुचुस्तोयंक्वचिन्नमुमुचुःशिवं यथा
ज्ञानामृतंकालेज्ञानिनोददतेनवा ३६

तानांसावद्येसांकर्यं शरत् वर्षासु द्विरद्विभियासंकुलानिवसंति यथा च वानप्रस्थस्य मल धारणक्लेशं भक्तिर्हरति एवं भुवः पंकं शरत्
वर्षासु यतीनां यथा च यतीनां कामादिवासनामलं श्रीकृष्णभक्तिर्हरति एवमपांमलं शरदिति ३४ त्यक्तैषणाः त्यक्ताः पुत्र वित्त लोकेष
णाद्यैः तैः ३५ अयंभावः न क्षुपाध्यायाः कर्मविद्यामिव ज्ञानिनो ज्ञानामृतं सर्वतो वितरंति अपितु क्वचिदेव कृपया एवं गिरयः शिवं निर्मलं
तोयं क्वचित्मुमुचुः क्वचिन्न पुनः प्रावृषीव सर्वत इति ३६

भा. द. एकविंशे सरद्रम्यवृंदावनगते हरौ तद्वेणुस्वनमाकर्ण्य गोपीभिर्गीतमीर्यते इत्थमेवंभूतं तदेवाह शरदा स्वच्छानि जलानि यस्मिं
८५ पू. स्मिंस्तत् वायुना वातमनुगतं पद्मकव्याप्तमित्यर्थः १ ततः कुसुमितवनराजिषु शुष्मिणो मत्ता भृंगा द्विजाश्च तेषां कुला
नि तैर्घुष्टानि सरांसि सरितो महीध्राश्च यस्मिंस्तद्वनं तत्सोऽवगाह्य प्रविश्य वेणुमवादयत् २ तत्कृष्णस्य वेणुगीतं स्मरस्य
उदयो यस्मात् तत् श्रुत्वा परोक्षं यथा भवति कृष्णे स्थितत्वात् ३ विक्षिप्तमनसो व्याकुलचित्ता भीयत्कृ कृष्णस्मरणं तासाम

श्रीशुक उवाच इत्थं शरत्स्वच्छजलं पद्माकरसुगंधिना न्यविशद्वायुना वातं सगोगोपालकोऽच्युतः १ कुसु
मितवनराजिशुष्मिभृंगकुलघुष्टसरस्सरिन्महीध्रं मधुपतिरवगाह्य चारयन्गाः सहपशुपालब
कूजतवेणुं २ तद्व्रजस्त्रिय आकर्ण्य वेणुगीतं स्मरोदयं काश्चित्परोक्षं कृष्णस्य स्वसखीभ्योऽन्ववर्ण व
यन् ३ तद्वर्णयितुमारब्धाः स्मरंत्यः कृष्णचेष्टितं नाशकन्स्मरयोगे विक्षिप्तमनसो नृप ४ बर्हापीडं नट
वरवपुः कर्णयोः कर्णिकारं बिभ्रद्वासः कनककपिशं वैजयंतीं च मालां रंध्रान्वेणोरधरसुधयापू
रयन्गोपवृंदैर्वृंदारण्यं स्वपदरमणं प्राविशद्गीतकीर्तिः ५

नसः क्षोभकं जातं तदाह बर्हापीडमिति ५ नटवद्वरं वपुर्बिभ्रत् वृंदावनं प्राविशत् कथंभूतं वनं स्वपदैरंकितैः रमणं रतिज
नकं गोपवृंदैर्गीतकीर्तिः तथा बर्हं मयूरपत्रमापीडं शिरोविभूषणं बिभ्रत् बर्हमापीडो यस्मिन् हरिवपुषो भूषणं चावेणुव रासः
नं मुखे स्थापितौ रंध्रान्वेणुरिति अतोऽन्नमधरस्वधेव पूर्णो वीणागेरु च नंतोगीतवत्स्वसर्वं तु महतीति भावः ५ ॥ ॥ ८५

स॒ नूनाधिकः शीतंचो भ्रंचक्रतं अफुल्लत्कुसुमसंयुक्तमारुतमाघ्निघ्यजनाः तापंजहुः ननु गोप्यः यतः कृष्णस्यापहृतचेतसः
तेनकारणेनत्वासांदुस्सइति यद्वानकारउपमार्थः गोप्यइव कृष्णस्यगतचेतसइति चेतसाकृष्णमाप्तिंग्ययथागोप्यः तापंजहुरि
त्यर्थः ४५ पुष्पिण्यागभिरेप्यः अन्वीयमानः स्वरुधेः स्वपतिभिः अनिच्छंत्योपितुत्सादनुगम्यमाना ईश्वराराधनार्थः क्रियाफला
त्फलैरनुगम्यमानः समस्तभोगगभीयपीति ४६ कुसुकुमुदं कुत्सितोमुत यस्येति दस्युसाम्यं ४७ भाग्यायशैर्नवान्नप्रास

अघ्निघ्यसमसीतोसंयस्खवनमारुतं जनास्तापंजहुर्गोप्योन्कृष्णहृतचेतसः ४५ गावोमृगाःखगानार्यः
पुष्पिण्यःसरद्याभवन् अन्वीयमाणःस्ववृधेः फलैर्नरी क्रियाइव ४५ उदहृष्यन्वारिजानिस्रर्योत्थानेकुमु
दिना राज्ञातुनिर्भयालोकायथादस्यून्विनानृप ४७ पुरग्रामेष्वाग्रयणैरिंद्रियैश्चमहोत्सवैः वभौभूः
पक्कसस्याढ्या कलाभ्यां नितरांहरेः ४८ वणिङ्मुनिनृपस्नातानिर्गम्यार्थान्प्रपेदिरे वर्षरुद्धायथा
सिद्धाःस्वपिंडान्कालआगते ४९ इतिश्रीभागवतेमहापुराणेदशमस्कंधे विंशतितमोध्यायः २०

नार्थैर्वैदिकैः ऐंद्रियैःरिंद्रियार्थैः लौकिकैश्चमहोत्सवैः कलाभ्यारामकृष्णाभ्यां दर्शनादिमहोत्सवाभ्यां ४८ वणि
जोयतयोनृपाः आत्मकाम्यस्वास्वार्थाभ्यां वर्षरुद्धाः सिद्धाः संतः ततोनिर्गम्यार्थान् वाणिज्यलाभंयागादिदिग्विजयविधा
दीन् प्रपेदिरे प्रापधंतयथासंतयोगादिसिद्धाः आयुवारुद्धाः कालेआगते स्वपिंडान्योगादिप्राप्यान्देवादिदेहानिति ४९

[illegible] स्कं: १०

भा० द० हे गोप्यः अयं वेणुः किं सुकृतमाचरत् कृतवान् कथंयद्यस्मात् गोपिकानामेव भोग्यां सतीमधरामोदरसस्य सुधां स्वयं
प॰ ६पू॰ नि यासां ताः ४ श्रीकृष्णस्य चक्षुःश्रवणेन तच्छ्रवणाञ्चितानां तत्क्षणमेव त्रैवर्गिकं कर्मनिवृत्तिं द्योतयन् स्वाधीनवासितं तत्कर्म
विहाय ययुरित्याह दुहंत्य इति पयः स्थालीस्थं चुल्लीमधिश्रित्य तत्क्वाथमप्रतीक्षमाणाः काश्चिद्ययुः संयावं गोधूमकरणान्नेप
कं अनुद्वास्यानवतार्य ५ अन्याः प्रमृजंत्यः अंगोद्वर्तनादि कुर्वंत्यः काश्चित् कृष्णतुष्टये मुत्पथाक्रमपि वामेतद्दासत्कं

106

निशम्य गीतं तदनंगवर्द्धनं व्रजस्त्रियः कृष्णगृहीतमानसाः आजग्मुरन्योन्यमलक्षितोद्यमाः स यत्र कांतो
जवलोलकुंडलाः ४ दुहंत्योभिययुः काश्चिद्दोहं हित्वा समुत्सुकाः पयोधिश्रित्य संयावमनुद्वास्यापरा ययुः
५ परिवेषयंत्यस्तद्धित्वा पाययंत्यः शिशून्पयः शुश्रूषंत्यः पतीन्काश्चिदश्नंत्योपास्य भोजनं ६ लिंपंत्यः
प्रमृजंत्योन्या अंजंत्यः काश्च लोचने ७ व्यत्यस्तवस्त्राभरणाः काश्चित्कृष्णांतिकं ययुः ता वार्यमाणाः पति
भिः पितृभिर्भ्रातृबंधुभिः गोविंदापहृतात्मानो न न्यवर्तंत मोहिताः ९ अंतर्गृहगताः काश्चिद्गोप्यो
लब्धविनिर्गमाः कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः १०

मनसां फलत्ये चेति द्योतयन्नाह व्यत्यस्तेति ७ स्थानतः स्वरूपतश्च अन्यथा धोधारणेन विपर्ययेण आभानि वस्त्राभरणा
नि यासां ताः चरणाभरणं कर्णे कर्णाभरणं चरणे कृत्वा ययुरिति ८ न च कृष्णमनसां विघ्नाः प्रभवंतीत्याह ता रामः
वार्यमाणा इति ९ न लब्धो विनिर्गमो याभिस्ताः प्रागपि तद्भावनायुक्ता तदानीं तत् दध्युरित्यर्थः १० १०६

तत्र तस्मिन् ह्रदे कृष्णं छंदोभिर्वेदैः स्तूयमानं दृष्ट्वा विस्मिता बभूवुः १७ इति श्रीभावार्थदीपिकायां अष्टाविंशः २८ ऊनत्रिंशे तु रासार्थं मुक्तिप्रलुब्धयोत्सरैः गोपीभिः रासरंभेन तस्य चांतर्धिकौतुकं ब्रह्मादिजयसंरूढो दर्पकंदर्पदर्पहा जयति श्रीपतिर्गोपी रासमंडलमंडिताः ननु विपरीतमिदं परदार विनोदेन कंदर्पविजेतृत्वाप्रतीतेः भैवं योगमायामुपाश्रितः आत्मारामोप्यरीरमत् साक्षान्मन्मथमन्मथः आत्मन्यवरुद्धसौरत इत्यादिषु स्वातंत्र्याभिधानात् तस्माद्रासक्रीडाविडंबनकामजयख्यापनायेत्येव तत्वं किंच शृंगारकथापदेशेन विशेषतो निवृत्तिपरेयं पंचाध्यायीति व्यक्तीकरिष्यामः ताराक्षिरिति याताः तावत्तत्र उंसिद्धम् येमारंस्यथ क्षपा इति च प्रतिश्रुतोऽस्त्यर्थः १ तदा तस्मिन्नेव क्षणे तत्प्रीतये उडुराजः चंद्रः उदगा उदितः किं कुर्वन् दीर्घकालेन दर्श

नंदादयस्तु तं दृष्ट्वा परमानंदनिर्वृताः कृष्णं च तत्र छंदोभिः स्तूयमानं सुविस्मिताः १७ इति श्रीभागवते दशमे अष्टाविंशोऽध्यायः २८ श्रीशुक उ० भगवानपि ता रात्रीः शरदोत्फुल्लमल्लिकाः वीक्ष्य रंतुं मनश्चक्रे योगमायामुपाश्रितः १ तदोडुराजः ककुभः करैर्मुखं प्राच्या विलिंपन्नरुणेन शंतमैः स चर्षणीनामुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः २ दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं वनं च तत्कोमलगोभिरंजितं जगौ कलं वामदृशां मनोहरं ३

नंपस्यसः स्वप्रियायाः मुखं अरुणेन कुंकुमेन यथा विलिंपति तथा प्राच्याः ककुभो दिशः मुखं संतमैः सुखतमैः करैः रश्मिभिः अरुणेनोदयरागेण विलिंपन् अरुणं कुर्वन् चर्षणीः स प्रसिद्ध उडुराजः तथा चर्षणीनां जनानां शुचः तापग्लानीः मृजन् २ कुमुद्वत् कुमुदं विकसनीयं विद्यते यस्य तं कुमुदंतं वनं च तत्कोमलैर्गोभिरंजितं तस्य चंद्रस्य कोमलैः गोभिः रश्मिभिः रंजितं दृष्ट्वा कलं मधुरं जगौ अगायत अखंडमंडलं यस्य तं रमाया आननस्य आभेव आभा यस्य तं नवकुंकुममिवारुणं एवंविधं चंद्रं दृष्ट्वा कपंज

गोपानां [illegible] ३

भा॰ द॰ ननुदेही कथंकृष्णभगवान्तः स्यादत आह नृणामिति गुणात्मनो गुणनियंतुः भगवतस्वैवं रूपाभिव्यक्तिः अतो न देही
१०७ पू॰ सादृश्यमत्रवक्तुं युज्यते इति भावः १५ अतो यथाकथंचिदाशक्तिः तस्य मुक्तिकारणमित्याह कामभिति ऐक्यं संबं
धसौहृदं भक्तिः १६ नचभगवत्तोयमितिभ्रमस्त्याह नचैवमिति यतः श्रीकृष्णादेतत् स्थावरादिकमपिमुच्यते १७
अस्तुतमाहता दृष्ट्वेति वाचः पेशैः वाग्विलासैः १८ किंचमानसइति २० विचिन्वंति मृगयंते बंधुसाध्वसं भयं मा कृढ्वं

नृणांनिःश्रेयसार्थायव्यक्तिर्भगवतोनृप अव्ययस्याप्रमेयस्यनिर्गुणस्यगुणात्मनः १५ कामंक्रो
धंभयंस्नेहमैक्यंसौहृदमेवच नित्यंहरौविदधतोयांतितन्मयतांहिते १६ नचैवंविस्मयःकार्योभ
वताभगवत्यजे योगेश्वरेश्वरेकृष्णेयतएतद्विमुच्यते १७ तांदृष्ट्वांतिकमायाताभगवान्व्रजयोषितः
अवदद्वदतांश्रेष्ठोवाचःपेशैर्विमोहयन् १८ श्रीभगवानुवाच स्वागतंवोमहाभागाःप्रियंकिंकरवाणि
वः व्रजस्यानामयंकच्चिद्ब्रूतागमनकारणं १९ रजन्येषाघोररूपाघोरसत्वनिषेविता प्रतियातव्रजं
नेहस्थेयंस्त्रीभिःसुमध्यमाः २० मातरःपितरःपुत्राभ्रातरःपतयश्चवः विचिन्वंतिह्यपश्यंतोमाकृ
ढ्वंबंधुसाध्वसं २१ दृष्टंवनंकुसुमितंराकेशकररंजितं यमुनानिललीलैजत्तरुपल्लवशोभितं २२
तद्यातमाचिरंगोष्ठंशुश्रूषध्वंपतीन्सतीः क्रंदंतिवत्सावालाश्चतान्पाययतदुह्यत २३

स्पर्धः २१ ईषत्प्रणयकोपेनाप्यत्तो विलोकयंतीः प्रत्याह दृष्टमिति राकेशस्य पूर्णचंद्रस्य करै रंजितं यमुनायाः स्पर्शिनो राम:
नोनिलस्यलीलामंदगतिस्तया एजंतः कंपमानाः तरूणां पल्लवाः तैः शोभितं २२ सतीः हे सत्यः १३ १०७

किंचतदानीमेवतंपरमात्मानंश्रीकृष्णंध्यानतःप्राप्ताः सद्योगुणमयंदेहंजहुरितिश्लोकद्वयेनाह दुःसहेति ११ ननुकथंजहुः
परमात्मेतिज्ञानाभावादित्याशंक्याह जारबुद्ध्यापीतिनहिवस्तुशक्तिर्बुद्धिमपेक्षते अन्यथाअमत्योपिपीतामृतवदिति
भावः ननुतदापिआरब्धकर्मबंधनेसति कथंजहुः तत्राह सद्यः प्रक्षीणबंधना इतिननुकथंभोगमंतरेण आरब्धक
र्मक्षीणं भोगेनैवसद्यः क्षीणमित्याह दुःसहेति दुःसहोयः प्रेष्ठविरहः तेनतीव्रस्तापः तेनधुतानिगतान्यशुभानियासां
ताः तदप्राप्तिपरमदुःखभोगेन पापक्षीणमित्यर्थः तथाध्यानप्राप्ता अच्युतस्याश्लेषेणयानंदतिः परमसुखभो

दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ध्यानप्राप्ताच्युताश्लेषनिर्वृत्याक्षीणमंगलाः ११ तमेवप
रमात्मानंजारबुद्ध्यापिसंगताः जहुर्गुणमयंदेहंसद्यःप्रक्षीणबंधनाः १२ राजोवाच कृष्णंविदुः
परंकांतंनतुब्रह्मतयामुने गुणप्रवाहोपरमःतासांगुणधियांकथं १३ शुकउ० उक्तंपुरस्तादेतत्ते
चैद्यःसिद्धिंयथागतः द्विषन्नपिहृषीकेशंकिमुताधोक्षजप्रियाः १४ ॥॥

गः तयाक्षीणंमंगलंपुण्यबंधनंयासांताः अतोध्यानेनपरमात्मप्राप्तेः तत्कालसुखदुःखाभ्यांनिःशेषकर्मक्षयाद्गुणमयं
देहंजहुरिति १२ ननुतथापतिपुत्रादीनांवस्तुतोब्रह्मत्वेपिनतद्ज्ञानान्मोक्षः तथाबुद्ध्यभावात् एवंकृष्णेपिब्रह्मबुद्ध्य
भावेनतत्संगतिः कथंमोक्षहेतुरितिशंकते कृष्णंविदुरिति परंकेवलंकांतंकमनीयं १३ परिहरति उक्तमित्यादिना अयंभा
वः जीवेष्वावृतंब्रह्मत्वंकृष्णस्यहृषीकेशत्वादनावृतं अतोनतद्बुद्ध्यापेक्षेतिभावः १४

श्री द॰ किंचप्रेष्ठमिति किंचित्संरंभेण कोपावेशेन गद्गदागिरोयासांताः अब्रुवतस्मसंरंभेकारणंप्रेष्ठमित्यादि प्रियेतरमिव प्रतिभाषमाणम

१०८पू० स्याचक्षाणं ३१ नृशंसंक्रूरंहेदुरवग्रहस्वछंदयादमूलंभक्ताः सेवितवतीः अस्मान्भजस्वमात्यजेति ३२ अपिचयदुक्तं भर्तुःशुश्र

षणंस्त्रीणामित्यादिनातत्राहुः यत्पत्यपत्येत्यादित्वयाधर्मविदेति सोपहासंएवमेतदुपदेशानांपदे विषयेत्वय्येवास्तु उपदेश

पदत्वेहेतुः ईशईति विवदेधावाकेन सर्वोपदेशानामीशपरत्वावगत्यावगमादितिभावः ईशत्वेहेतुः आत्माकेवलभवा

निति भोगपत्यहि सर्वस्यभोक्ताआत्मेवेशइति अतःप्रेष्ठोवंधुश्चभावोनेवेति सर्वेवंधुषु कारणीयंयत्वेवास्तित्यर्थः अथ

प्रेष्ठंप्रियेतरमिवप्रतिभाषमाणं कृष्णंतदर्थविनिवर्तितसर्वकामाः नेत्रेविमृज्यरुदितोपहतेस्म किंचित्

संरंभगद्गदगिरोब्रुवतानुरक्ताः ३१ गोप्यऊचुः मैवंविभोर्हतिभवान्गदितुंनृशंसं संत्यज्यसर्व

विषयांस्तवपादमूलं भक्ताभजस्वदुरवग्रहमात्यजास्मान्देवोयथादिपुरुषोभजतेमुमुक्षून् ३२

१ यत्पत्यपत्यसुहृदामनुवृत्तिरंग स्त्रीणांस्वधर्मइति धर्मविदात्वयोक्तं अस्त्वेवमेतदुपदेशप

देत्वयीशे प्रेष्ठोभवांस्तनुभृतांकिलवंधुरात्मा ३३

वाधर्मोपदेशानांपदेस्थानेधर्मोपदेष्टरित्वयिसति अस्मासुचधर्मविजिज्ञासमाना सुसतीतुल्ययाधर्मविदायदुक्तं एवमे

तदस्तुतत्त्वत्वे धर्मोपदेष्टा किंतुभवानात्मेति अथवायदुक्तं एतदुपदेशपदेतत्रोचरं पुरुषेस्तुनामुत्वयितुईशे स्वामि

नसति एवंकांक्षानेवमित्यर्थः यतःतनुभृतांत्वमात्मा फलरूपइतियद्वा यदुक्तं भर्तुःशुश्रूषणं इति धर्मसति ए

वंकांक्षानेवमित्यर्थः यतःमेतत्त्वयोवास्तुकुतः उपदेशपदेशुश्रूषणंयत्वंनउपदेशमानानांपत्यादीनांपदेअधि राम:

ष्ठानेकुतईशनहीश्वरमधिष्ठानेविनाकाअपिपतिपुत्रादिनामस्तीति अन्यत्समाने अलमिति विस्तरेण ३३ १०८

संरंभस्तंभितदृष्टीः प्रत्याह अथवेति यंत्रिताशयाः वशीकृतचित्ताः हे सत्यः उपपन्नं युक्तं प्रीयंते प्रीताभवंती २४ दृष्टा दृष्टस्य प्रदर्शनेन निवर्त्तयति भर्त्तुरित्यादिभिर्लोकत्रयेण २५ हे कल्याण्यः फल्गु तुच्छं दुःखं दुःसंपादं औपपत्यं जारसौरव्यं अतःकु लस्त्रियासर्वथात्याज्यं हे सुंदरत्वमेवास्माकं भावः त्वमेव प्राप्यो नीयो नान्यः चेत्तत्राह २८ यथाश्रवणादिभिः दूरस्थं मेमयिप्रभवति सन्निकर्षेण समीपस्थेन तथानततो गृहान्प्रतियात २९ किं चश्रवणादर्शनादित्यादिनोत्तरेणाचं

अथवामदभिस्नेहाद्भवंत्यो यंत्रिताशयाः आगताह्युपपन्नंवः प्रीयंते मयिजंतवः २४ भर्त्तुःशुश्रूषणं स्त्रीणांपरोधर्मोह्यमायया तद्बंधूनांचकल्याण्यः प्रजानांचानुपोषणं २५ दुःशीलो दुर्भगो वृद्धोज डोरोग्यधनोपिवा पतिःस्त्रीभिर्नहातव्यो लोकेप्सुभिरपातकी २६ अस्वर्ग्यमयशस्यंच फल्गुकृच्छ्र भयावहं जुगुप्सितंच सर्वत्र औपपत्यं कुलस्त्रियः २७ श्रवणाद्दर्शनाद्ध्यानान्मयिभावोनुकीर्त्तनात् नतथासन्निकर्षेण प्रतियाततत्तोगृहान् २८ शुकउवाच॰ इतिविप्रियमाकर्ण्य गोप्योगोविंदभाषितं विषण्णाभग्नसंकल्पाश्चिंतामापुर्दुरत्ययां २९ कृत्वामुखान्यवशुचःश्वसनेनशुष्यद्बिंबाधराणिचरणे नभुवंलिखंत्यः अस्त्रैरुपात्तमषिभिःकुचकुंकुमानि तस्थुर्मृजंत्यउरुदुःखभराःस्मतूष्णीं ३०

कोशाधानांस्थितिमाह कृत्वेति शुचःशोकादुःजातेनश्वसनेन शुष्यंती विंबफलवत्शारक्ताअधरायेषु मुखेषु तानि अवशा वांलिखंत्यतर्णागुष्टेन मेदिनीं लिखंत्यः तथागृहीतकज्जलैरस्त्रुभिः कुचकुंकुमानि क्षालयंत्यः तूष्णीं स्थिताः पतंतउरुदुःख

भा० द०

१०९ पू०

109

त्वत्प्रसादसौभाग्यं त्वत्ति चित्रमित्याहुः श्रीरिति वक्षसि प्रसाधितं यस्यां लब्ध्वापि तुलस्याः सपत्न्या सह तव पदाम्बुजरजः कामयते स्म भक्तैः सर्वैर्जु
ष्टं इति सौभाग्यातिरेकोक्तिः यस्याः स्ववीक्षणे श्रीरात्मनो विलोकयितुं तदर्थमन्येषां ब्रह्मादीनां तपोभिः प्रयासः सा तद्रजः तद्वय
मपि प्रपन्नाः इति ३७ हे वृजिनार्दन दुःखहन्तः त्वदुपासने लब्धजनरेव आसा यासां ताः वयं वसतीर्गृहान् विसृज्य योगिन इव प्राप्ताः तवसु
न्दरस्मितविलसितनिरीक्षणेन यस्तीव्रकामस्तेन सन्तप्तचित्तानां नः हे पुरुषरत्न दास्यं देहि ३८ ननु गृहस्वामिनं विहाय मद्दास्यं किमिति प्रार्थ्यते
अत आहुः वीक्ष्येति अलकावृतं मुखं केशान्तैः आवृतं मुखं तथा कुण्डलयोः श्रीर्ययोः तौ गण्डस्थले यस्मिन् अधरे सुधा यस्मिन् तच्च तथा

श्रीर्यत्पदाम्बुजरजश्चकमे तुलस्या लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टं यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वयं च
तव पादरजः प्रपन्नाः ३७ तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशाः त्वत्सुन्दरस्मितनि
रीक्षणतीव्रकामतप्तात्मनां पुरुषभूषण देहि दास्यं ३८ वीक्ष्यालकावृतमुखं तव कुण्डलश्रीगण्डस्थलाधरसुधं ह
सितावलोकं दत्ताभयं च भुजदण्डयुगं विलोक्य वक्षः श्रियैकरमणं च भवाम दास्यः ३९ का स्त्र्यङ्ग ते कलपदामृतवेणुगी
त संमोहितार्यचरितान्न चलेत्त्रिलोक्यां त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ४०

मुखं वीक्ष्य दत्ताभयं भुजदण्डयुग्मं च वक्षश्च श्रिया एकमेव रमणं रतिजनकं वीक्ष्य दास्य एव भवामेति ३९ ननु जुगुप्सितमौपपत्य
मित्युक्तं तत्राहुः कास्त्रीति अङ्ग हे कलानि पदानि यस्मिन् तत् आयतं दीर्घं मूर्छितं स्वरालापभेदस्तेन पाठान्तरे कलामृतम
यं वेणुगीतं तेन संमोहिता का वा स्त्री आर्यचरितान्निजधर्मान्न चलेत् यन्मोहिताः पुरुषा अपि चलिताः किं च त्रैलोक्यसौभग राम
मिति यत् यतः अबिभ्रन् अबिभरुः तद्योतकं शारदश्रवणमात्रेणापि तावन्निजधर्मत्यागो युक्तः किं पुनः तदनुभावेनेति भावः ४० १०९

एतदाचरणेनहृष्यंतः आर्च्येयंतः कुर्वंतिहि इतिकुशलाः शास्त्रनिपुणा तथाशास्त्रं किंअजयाकरिष्यामो येषां नोपमात्म
लोकइत्यादि ३३ किंच प्रतियालेति यदुक्तं तदस्मुक्तं त्वयैवचित्रादीनामपहृतत्वादित्याहुः चित्तमिति यदस्माकं चित्तमेतता
वंतं कालं सुखे नगृहेषुनिर्विशतिलत्वयाऽपहृतं करावपियोगहकृत्ये निर्विशतः तावपिसुखात्मत्वयेतिवा ३४
अतः अंगहेकृष्णमोअस्माकं तवाधराभृतपूरेण तवैवहासरसहितेनावलोकेनकलगीतेनचजातो यो हृच्छयाग्निः कामाग्निः

कुर्वंतिहि त्वयिरतिं कुशलाः स्वआत्मन्नित्यप्रियेपतिसुतादिभिरार्त्तिदैः किं तन्नः प्रसीदपरमेश्वरमास्मछिंं
द्याआशांधृतांत्वयिचिरादरविंदनेत्र ३३ चित्तंसुखेनभवतापहृतंगृहेषुयन्निर्विशत्युतकरावपिगृह्यकृत्ये पादौ
पदंनचलतस्तवपादमूलाद्यामः कथंव्रजमथोकरवामकिंवा ३४ सिंचांगनस्त्वदधरामृतपूरकेणहासाव
लोककलगीतजहृच्छयाग्निं नोचेद्वयंविरहजाग्न्युपयुक्तदेहा ध्यानेनयामपदयोःपदवींसखेते ३५ यर्ह्यंबुजा
क्षतवपादतलंरमायादत्तक्षणंक्वचिदरण्यजनप्रियस्य अस्प्राक्ष्मतत्प्रभृतिनान्यसमक्षमंगस्थातुंत्वयाभिरमि
ताःवतपारयामः ३६

न
तंसिंचनोचेद्वयंतावदेकोऽग्निस्तथाविरहाग्निरुत्पद्यते योऽग्निस्तेन उपयुक्तदेहा दग्धशरीराः योगिन इवतेपदवीं अंतिकं ध्या
नेनयामः प्राप्नुयामः ३५ ननुस्वपतीनेवोपगच्छततत्रैवेनमर्षिताः इत्यचेद्युरितित त्राह यर्हीतिरमायाः लक्ष्म्याः दत्तक्षणं
दत्तोत्सवंदत्तावसरंवातदपिक्वचिदेवनसर्वदा अरण्येजनाः प्रियाः यस्यतस्यतव अरण्यजनप्रियत्वादरण्ये क्वचित् यर्हि
अस्प्राक्ष्मस्पृष्टवंत्यो तत्रत्वयाभिरमिताः आनंदिताः सत्यः तत्प्रभृत्य अन्यसमक्षं स्थातुंनपारयामः तुष्टास्तेनरोचंत इत्यर्थः
३६

भा॰ द॰ त्रिंशे विरहसंतप्त गोपीभिः कृष्णमार्गणं उन्मत्तवन्नियतां भ्रमंतीभिर्वने वने १ अचक्षमाणाः अपश्यंत्यः गत्या च अनुरागस्मिताभ्यां

११॰ पू॰ विभ्रमेक्षितानि सविलासनिरीक्षितानि तैश्च मनोरमा आलापाश्च विहाराः क्रीडाश्च विभ्रमा अन्ये च विलासाः तैश्च रमायतेर्ग

तादिभिरेतैराक्षिप्तानि आकृष्टानि चित्तानि यासां ताः अतस्तस्मिन्नेव आत्मा मनो यासां ताः तस्य विविधाश्चेष्टाः जगृहुः तद

110

श्रीशुक उवाच अंतर्हिते भगवति सहसैव व्रजांगनाः अतप्यंस्तमचक्षाणाः करिण्य इव यूथपं १ गत्या

नुरागस्मितविभ्रमेक्षितैर्मनोरमालापविहारविभ्रमैः आक्षिप्तचित्ताः प्रमदाः रमापतेस्तास्ता विचेष्टा ज

गृहुस्तदात्मिकाः २ गतिस्मितप्रेक्षणभाषणादिषु प्रियाः प्रियस्य प्रतिरूढमूर्तयः असावहं त्वित्यबला

स्तदात्मिकाः न्यवेदिषुः कृष्णविहारविभ्रमाः ३ गायंत्य उच्चैरमुमेव संहिता विचिक्युरुन्मत्तकवद्वनाद्वनं

पप्रच्छुराकाशवदंतरं बहिर्भूतेषु संतं पुरुषं वनस्पतीन् ४ दृष्टो वः कच्चिदश्वत्थ प्लक्ष न्यग्रोध नो मनः नं

दसूनुर्गतो हृत्वा प्रेमहासावलोकनैः ५

नुकरणेनाक्रीडन् २ अपि च गतिस्मितेति प्रियस्य गत्यादिषु प्रतिरूढा आविष्टा मूर्तयो यासां ताः अतः कृष्णस्येव विहारविभ्रमाः

क्रीडाविलासाः यासां ताः अतः अहमेव कृष्ण इति परस्परं निवेदितवंत्यः ३ किंच गायंत्य इति वनाद्वनांतरं गच्छंत्यो विचिक्युः अन्व

षयन् उन्मत्ततुल्यत्वमाह वनस्पतीन् पप्रच्छुः भूतेषु अंतरं मध्ये संतं पुरुषं बहिश्च संतं मिलितत्वप्रपंच यतिर्नवभिः तत्र महत्त्वादे

ते पप्रच्छुरिमा आशया अश्वत्थादीन् पृच्छंति हे दृष्ट इति प्रेमहासखिलसिते रवलोकनैरस्माकं मनो हृत्वा चोरइव गतः वो युष्मा

रामः

११०

व्यक्तंनिश्चितं ४१ विक्लवितंपारवश्यप्रलपितं गोपीररीरमत् रमयामास ४२ प्रियस्येक्षणेन उत्फुल्लानियासांताभिः उदारहासस्यद्वि
जाश्रतेषु कुंदकुसुमवद्दीधितिर्यस्यसः एणांकश्चंद्रः ४३ ४४ ४५ बाहुप्रसारश्चपरिरंभश्चकरादीनांआलंभनंस्पर्शश्चनर्मपरिहास

व्यक्तंभवान्व्रजभयार्त्तिहरोभिजातो देवोयथादिपुरुषःसुरलोकगोप्ता तन्नोनिधेहिकरपंकजमार्त्तबंधो तप्तस्तने
षुचसिरस्सुचकिंकरीणां ४१ श्रीशुकउवाच इतिविक्लवितंतासांश्रुत्वायोगेश्वरेश्वरः प्रहस्यसदयंगोपीरात्मा
रामोप्यरीरमत् ताभिःसमेताभिरुदारचेष्टितः प्रियेक्षणोत्फुल्लमुखीभिरच्युतः उदारहासद्विजकुंददीधिति
र्व्यरोचतैणांकइवोडुभिर्वृतः ४३ उपगीयमानउद्गायन्वनिताशतयूथपः मालांबिभ्रद्वैजयंतींव्यचरन्मंडय
न्वनं ४४ नद्याःपुलिनमाविश्यगोपीभिर्हिमवालुकं रेमेतत्तरलानंदिकुमुदामोदवायुना ४५ बाहुप्रसारपरि
रंभकरालकोरुनीवीस्तनालभननर्मनखाग्रपातैः क्ष्वेल्यावलोकहसितैर्व्रजसुंदरीणामुत्तंभयन्रतिपतिं
रमयांचकार ४६ एवंभगवतःकृष्णाल्लब्धमानामहात्मनः आत्मानंमेनिरेस्त्रीणांमानिन्योभ्यधिकंभुवि
४७ तासांतत्सौभगमदंवीक्ष्यमानंचकेशवः प्रशमायप्रसादायतत्रैवांतरधीयत ४८ इतिश्रीभागवतेमहापु
राणेदशमस्कंधेरासक्रीडायांएकोनत्रिंशोध्यायः २९

श्चनखाग्रपातश्चतैः क्ष्वेल्याक्रीडयाच अवलोकैश्चसहितैश्च कामंतासामुद्दीपयन् तारमयामास ४६ महात्मनोविमुक्तचित्तान्
४७ तत्सौभगमदं प्रस्वाधीनतां मानंगर्वं केशवः कश्चईशश्चतौ वशयत इतितथासः ४८ इतिभागवते दशमे एकोनत्रिंशः २९

भा॰ द॰ हरिण्याः कृष्णस्पर्शनं संभाव्याहुः अपीति हे सखि एणपत्नि अपि किं उपगतः समीपं गतः गात्रैः सुंदरैः मुखबाह्वादिभिः प्रि
१११ पू॰ यया सहेति यदुक्तं तत्र चोक्तं कांताया अंगसंगस्तत्कुचकुंकुमेन रंजितायाः कुंदकुसुमस्रजो गंधः कुलपतेः कृष्णस्य वातीत्या
गच्छति ११ फलभारेण नम्रास्तान्तरून्दृष्ट्वा प्रणतेति मत्वा प्रियया सहितस्य गतिविलासं संभावयंत्यः पृच्छंति बाहु
मिति तुलसिकाया अलिकुलैः अतस्तदामोदगंधैः अन्वीयमानाः अनुगम्यमानाः इतश्चरन्निति १२ कांश्चिदाहुः हे स

अप्येणपत्न्युपगतः प्रियये ह गात्रैस्तन्वन्दृशां सखि सुनिर्वृतिमच्युतो वः कांतांगसंगकुचकुंकुमरंजितायाः
कुंदस्रजः कुलपतेरिह वाति गंधः ११ बाहुं प्रियांस उपधाय गृहीतपद्मो रामानुजस्तुलसिकालिकुलैर्मदां
धैः अन्वीयमान इह वस्तरवः प्रणामं किं वाभिनंदति चरन्प्रणयावलोकैः १२ पृच्छतेमा लता बाहूनप्या
श्लिष्टा वनस्पतेः नूनं तत्करजस्पृष्टा बिभ्रत्युत्पुलकान्यहो १३ इत्युन्मत्तवचो गोप्यः कृष्णान्वेषणकातराः
लीला भगवतस्तास्ता ह्यनुचक्रुस्तदात्मिकाः १४

ख्यः इमाः लताः कृष्णेन संगताः इत्यनेनैवेति इमाः पृच्छत ननु स्वपतिसंगतास्तत्संगतिर्दुर्घटेत्यत्र वनस्पतेः पत्युर्बाहूनाश्लिष्टा
अपि अहो भाग्यं नूनं तन्नखैः स्पृष्टाः यत् उत्पुलकानि बिभ्रति न स्वपतिसंगता वीरुधः पुलकसंभव इति भावः उ
न्मत्तकवत्स्वप्रश्नपूर्वकमेतत्प्रपंचितं इदानीं रमापतेः तास्ता विचेष्टा जगृहुस्तदात्मिका इति यदुक्तं तत्प्रपंचयति इतीति उ
न्मत्तवद्वचो गोप्यः उन्मत्तवचसः सत्यः गोप्यः कृष्णान्वेषणेन कातराः अतिविह्वलाः चक्रुः अनुकृतवत्यः १४ राम॰
१११

गहांतः स्वपुष्पैर्येऽपकारिणस्त इति कुरवकादीन् पृच्छति कच्चिदिति हे कुरवकादयः दर्पहरं स्मितं यस्य सः इतो गतः ६ कच्चिदि
ति अलिकुलैः सह त्वां बिभ्रत् तवातिप्रियस्त्वया किं दृष्ट इति ७ गुणातिरेकोपि नम्रत्वादिमाः पृच्छ्या इति पृच्छंति मालतीति हे
मालति मल्लिके जातियूथिके वः युष्माभिः किमदर्शि दृष्टः करस्पर्शेन वः प्रीतिं जनयन् यातः किं जानंति अत्र मालतीजात्योर्वा
तरविशेषो द्रष्टव्यः ८ फलादिभिः सर्वप्राणिसंतर्पकाः एते पृष्टे पुरेति पृच्छति चूतेति चूतादयो ग्यातांतरजातिभेदः क
दंबनीपयोः हे चूतादयः हे योऽन्ये च परार्थभविकाः परार्थमेव भवो जन्म येषां ते यमुनोपकूलाः तस्याः कूलसमीपे व

कच्चित्कुरवकाशोकनागपुन्नागचंपकाः रामानुजो मानिनीनामितो दर्पहरस्मितः ६ कच्चित्तुलसि कल्याणि
गोविंदचरणप्रिये सह त्वालिकुलैर्बिभ्रद्दृष्टस्तेतिप्रियोच्युतः मालत्यदर्शि वः कच्चिन्मल्लिके जातियूथिके प्रीतिं
वो जनयन्यातः करस्पर्शेन माधवः चूतप्रियालपनसासनकोविदारजंब्वर्कबिल्वबकुलाम्रकदंबनीपाः येऽन्ये प
रार्थभविकाः यमुनोपकूलाः शंसंतु कृष्णपदवीं रहितात्मनां नः ९ किं ते कृतं क्षिति तपो बत केशवांघ्रिस्पर्शोत्स
वोत्पुलकितांगरुहैर्विभासि अप्यंघ्रिसंभव उरुक्रमविक्रमाद्वा आहो वराहवपुषः परिरंभणेन १०

र्त्तमानाः तीरवासिन इत्यर्थः ते भवंतः रहितात्मनां शून्यचेतसां नः कृष्णपदवीं कृष्णमार्गं शंसंतु कथयंतु ९ हे क्षिति क्षिते
त्वया किं तपः कृतं या त्वं केशवांघ्रिस्पर्शोत्सवा केशवचरणोत्थः स्पर्शोत्सवो यस्याः सा कुतः अंगरुहैरुत्पुलकिता रोमांचि
ता विभासि शोभसे तत्र विशेषं पृच्छति अपि किं अयमुत्सवः अंघ्रिसंभवः अधुना तस्यैकदेशांघ्रिस्पर्शसंभवः यद्वा नैता
वता किंतु उरुक्रमस्य विक्रमात् पूर्वमेव त्रिविक्रमस्य पदा सर्वाक्रमणात् अहो अप्यवा नैतावदेव अपितु ततोपि पूर्वं वराहस्य
वपुषः परिरंभणेनेति अतस्त्वया नूनं पश्येति १०

संपृक्तानि संमिश्राणि २६ तेन अंसे न्यस्तः प्रकोष्ठो यस्याः करेणोः हस्तिन्याः २७ रहः एकांतं तस्या नूनं २८ हे आल्यः हे सख्यः अहो
धन्याः अति पुण्याः गोविंदांघ्र्यब्जरेणवः तत्र हेतुः यानिति अस्माभिरप्येत एव मिषेकेण तत्पदवत्तस्याः भाग्यं शक्यत इति भा

तैस्तैः पदैस्तत्पदवीमन्विच्छंत्योग्रतोवलाः वध्वाः पदैः सुपृक्तानि विलोक्यार्ताः समब्रुवन् २६ कस्याः पदानि चै
तानि याताया नंदसूनुना अंसन्यस्तप्रकोष्ठायाः करेणोः करिणा यथा २७ अनयाराधितो नूनं भगवान्ह
रिरीश्वरः यन्नो विहाय गोविंदः प्रीतो यामनयद्रहः २८ धन्या अहो अमी आल्यो गोविंदांघ्र्यब्जरेणवः या
112 न्ब्रह्मेशो रमादेवी दधुर्मूर्ध्न्यघनुत्तये २९ धन्या अहो अमी आल्यो तस्या अमूनि नः क्षोभं कुर्वंत्युच्चैः पदानि य
त् यैकापहृत्य गोपीनां रहो भुंक्तेऽच्युताधरं ३० न लक्ष्यंते पदान्यत्र तस्या नूनं तृणांकुरैः खिद्यत्सुजातांघ्रि
तलामुन्निन्ये प्रेयसीं प्रियः ३१ अत्र प्रसूनावचयः प्रियार्थे प्रेयसा कृतः प्रपदाक्रमण एते पश्यतासक
ले पदे ३२ केशप्रसाधनं त्वत्र कामिन्याः कामिना कृतं तानि चूडयता कांतामुपविष्टमिह ध्रुवं ३३

वः २८ अर्थाद्धुः तस्या इति गोपीनां सर्वस्वमयं भावः भवेदेवं तस्याः पदानि संपृक्तानि न भवेयुः तानि तु नो दुःखं कुर्वंतीति २९
तदसंपृक्तान् केवलस्य पादरेणून् एव विचिन्वंत्यस्तान् दृष्ट्वा पुनः स्वगतं समतपन तदाह श्लोकत्रयेण न लक्ष्यंत इति
खिद्यंति सुजाते सुकुमारे अंघ्रितले यस्यास्तां उन्निन्ये स्कंधमारोपितवान् ३० प्रपदाः प्राक्रमणं तेनाणी संमर्देन ययोः अ
त एव असकले पदे पश्यतेति ३१ तस्याः स्वमज्जान्वंतरुपविष्टायाः केशं दृष्ट्वा आहुः केशप्रसाधनमिति कांतामधि रास०
कस्य तानि प्रसूनानि चूडयता चूडानुकारेण वध्नता इह ध्रुवमुपविष्टं ३२ ११२

[illegible]

कस्याश्चित्पूतनायन्त्या इत्यादिभिश्चतुर्भिरनुकरणं प्रपंच्यते तत्र चतुर्भिस्तन्मयत्वं वर्ण्यते पुनरेकेनानुकरणमिति विवेकः पूतनायंत्याः
पूतनावदाचरंत्याः कृष्णवदाचरंती स्तनमपिबत् तोकयित्वा तोकवदात्मानं कृत्वा १५ दैत्यायित्वा दैत्यवदात्मानं कृत्वा ए
का कृष्णार्भभावनां कृष्णस्यार्भं बाल्यं भावयतीं यां तां अन्यां जहार १६ दूरगाः दूरे वर्त्तमानाः गाः यद्वत् यथा कृष्णस्तथा आहू

कस्याश्चित्पूतनायंत्याः कृष्णायंत्यपिबत्स्तनं तोकयित्वा रुदत्यन्या पदाहन् शकटायतीं १५ दैत्यायित्वा जहारा
न्यामेका कृष्णार्भभावनां रिंगयामास काप्यंघ्री कर्षंती घोषनिःस्वनैः १६ कृष्णरामायिते द्वे तु गोपायंत्यश्च
काश्चन वत्सायंतीं हंति चान्या तत्रैका तु बकायतीं आहूय दूरगाः यद्वत् कृष्णस्तमनुकुर्वतीं वेणुं क्वणंतीं क्री
डंतीमन्याः शंसंति साध्विति १८ कस्यांचित्स्वभुजं न्यस्य चलंत्याहापरा ननु कृष्णोहं पश्यत गतिं ललितामि
ति तन्मनाः १९ माभैष्ट वातवर्षाभ्यां तत्त्राणं विहितं मया इत्युक्त्वैकेन हस्तेन यतंत्युन्निदधेंबरं २० आरुह्यैकाप
दाक्रम्य शिरस्याहापरां नृप दुष्टाहे गच्छ जातोहं खलानां ननु दंडधृक् २१ तत्रैकोवाच हे गोपा दावाग्निं पश्यतो
ल्बणं चक्षूंष्याश्वपिदध्वं वो विधास्ये क्षेममंजसा २२ बद्धान्यया स्रजा काचित्तन्वी तत्र उलूखले भीता सुदृक्पि
धायास्यं भेजे भीतिविडंबनं एवं कृष्णं पृच्छमानाः वृंदावनलतास्तरून् व्यचक्षत वनोद्देशे पदानि परमात्मनः २४
पदानि व्यक्तमेतानि नंदसूनोर्महात्मनः लक्ष्यंते हि ध्वजांभोजवज्रांकुशयवादिभिः २५

यतंतं कृष्णं अनुवर्त्ततीं अनुवर्त्तमानां अनुकुर्वतीमिति वा पाठः १८ १९ यतंती प्रयत्नं कुर्वंती अंबरं उत्तरीयं वस्त्रं उन्निदधे ऊ
र्ध्वं धृतवती २० २१ अपिदध्वं निमीलयत २२ सुदृक् सुनयनं आस्यं पिधाय सुदृक् वराकी तद्वा भीतिविडंबनं भयानुकरणं २३

एवं पुनरपि वृंदावने लतातरून् कृष्णं पृच्छंत्यः वनोद्देशे वन

भा०द०
१२७
पृ०

अपविद्धः अपहितः अपतत् आप्लवत् स्विन्नानि स्वेदयुक्तानि सर्वाङ्गानि यस्य सः क्रोधमूर्छितः क्रोधेन व्याप्तः १२ कृत्वा विषाणा
मुत्पाट्य तेनैव जघान स अपतत् १३ मूत्रं च सकृच्च मूत्रशकृत् एकवद्भावः तदुभयमुत्सृजन् क्षिपन् पादौ क्षिपन् इतस्ततश्चा
लयन् अनवस्थिते ईक्षणे प्रचलितनेत्रः कृच्छ्रं कष्टं जगाम लब्धं यथा भवति तथा मृत इति इति वा १४ नयनोत्सवो पञ्चानां मूर्ति
मान्नुत्सवः १५ कामं व्रजे वसन्तं तं कंसस्यान्तिके गतिं स्मृतिं नारदः स्मारयामास कंस दूत गिरैव तु १५ तदाह अरिष्टे इति देवदर्शनः दे

113

[illegible] १। सोऽपि विद्धो भगवता पुनरु
त्थाय सत्वरः अपतत् स्विन्नसर्वाङ्गो निःश्वसन् क्रोधमूर्छितः १२ तमापतन्तं स निगृह्य शृङ्गयोः पदा समाक्रम्य
निपात्य भूतले निःपीडयामास यथार्द्रमम्बरं कृत्वा विषाणेन जघान सोऽपतत् १३ असृग्वमन् मूत्रसकृत्स
मुत्सृजन् क्षिपंश्च पादाननवस्थितेक्षणः जगाम कृच्छ्रं निरृतेरथ क्षयं पुष्पैः किरन्तो हरिमीडिरे सुराः १४ एवं कक
द्मिनं हत्वा स्तूयमानः द्विजातिभिः विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः १५ अरिष्टे निहते गोष्ठे कृष्णेनाद्भुत
कर्मणा कंसायाथाह भगवान्नारदो देवदर्शनः १६ यशोदायाः सुतां कन्यां देवक्याः कृष्णमेव च रामं च रोहि
णीपुत्रं वसुदेवेन बिभ्यता १७

वर्षिः यद्वा एवं कापि लोए एवं भविष्यतीति साक्षाद्देवदर्शनं यस्य सः १६ आदौ नैव नारदोक्तमाह यशोदाया इति देवक्या अष्टम
गर्भत्वेन प्रसिद्धां कन्यां यशोदासुतामाह यशोदायाः सुतत्वेन प्रसिद्धं कृष्णं देवक्याः सुतमाह रोहिणीपुत्रं रामं च देवक्याः सप्त
मं सुतमाह यद्वा नन्दसुतत्वेन प्रसिद्धं रामं च वसुदेवभार्याया रोहिण्याः पुत्रमाह वसुदेवसुतौ चेत्तत्कथं व्रजं गतौ तत्राह वसु रामः
१२७

रंभमाणः वृषभजातिशब्दं कुर्वन् विलिखन् विदारयन् उद्यम्य ऊर्द्ध्वं कृत्वा वप्राणि तटानि उल्लिखन् २ किंचित् किंचित् शकृत् मध्ये मध्ये ईषदीषत् पुरीषं मुंचन् तथा मूत्रं मुत्सृजन् स्तब्धलोचनः यस्य ध्वनिना गवां नारीणां च तत्र अपत्यं गर्भा अकाले स्रावः पातः पंच

रंभमाणः खरतरं पदा च विलिखन् महीं उद्यम्य पुच्छं वप्राणि विषाणाग्रेण चोद्धरन् २ किंचित् किंचित् शकृन्मुंचन् मूत्रयं स्तब्धलोचनः यस्य निर्ह्रादितेनांग निष्ठुरेण गवां नृणां ३ पतंत्यकालतो गर्भाः स्रवंति स्म भयेन वै निर्विशंति घना यस्य ककुद्यचल शंकया ४ तं तीक्ष्णशृंगमुद्वीक्ष्य गोप्यो गोपाश्च तत्रसुः पशवो दुद्रुवुर्भीताः राजन् संत्यज्य गोकुलं ५ कृष्ण कृष्णेति ते सर्वे गोविंदं शरणं ययुः भगवानपि तद्वीक्ष्य गोकुलं भयविद्रुतं ६॥ मा भैष्टेति गिराश्वास्य वृषासुरमुपाह्वयत् गोपालैः पशुभिर्मंद त्रासितैः किमसत्तम ७ वन्न दर्प्पहाहं दुष्टानां त्वद्विधानां दुरात्मनां इत्यास्फोट्याच्युतोरिष्टं तलशब्देन कोपयन् ८ सख्युरंसे भुजाभोगं प्रसार्यावस्थितो हरिः सोप्येवं कोपितोरिष्टः खुरेणावनिमुल्लिखन् ९ उद्यत्पुच्छभ्रमन्मेघः क्रुद्धः कृष्णमुपाद्रवत् अग्रन्यस्तविषाणाग्रः स्तब्धासृक्लोचनोच्युतं १० कटाक्षिप्याद्रवत्तूर्णमिंद्रमुक्तोशनिर्यथा गृहीत्वा शृंगयोस्तं वा अष्टादश पदानि सः प्रत्यपोवाह भगवान् गजः प्रतिगजं यथा ११॥

मध्ये मध्ये ईषदीषत् प्रसृतिः स्यात् इति विभागः ३ ककुदि गलपृष्ठशृंगे कृष्ण कृष्णेति रक्षेति एवं वदन् आस्फोट्य करतलेन तलशब्देन कोपयन् भुजाभोगं भुजाभुजः स एव भोगः सर्प्पदेहः तं सर्प्पदेहकारं भुजमित्यर्थः स्वयमच्युतः अन्यान् हरति संहरतीति हरिः उद्यता ऊर्द्ध्वंगता पुच्छेन भ्रमंतो मेघाः यस्मात्सः अग्रेन्यस्ते विषाणाग्रे येन सः स्तब्धे अस्रक् लोचने यस्य सः कटाक्षेण तिर्यग् निरीक्ष्य १० प्रत्यपोवाह प्रतिलोमं व्यनुदत् ११

तौ मे मृत्युर्निसृष्टः वैकुंठसंश्रयैः देवैः किं ततस्तत्राह ३१ घातयिष्य इति कालकल्पेन मृत्युतुल्येन वैद्युतोपमैः अशनितुल्यैः
३२ नष्टकंटकाः नष्टशत्रुः ३५ ३६ ततु कतिपयसुहृद्वधेन नष्टकंटकता कथं स्यादिति तत्राह जरासंध इति द्रष्टुं चेति तत्रस्वति

निसृष्टः किल मे मृत्युर्देवैर्वैकुंठसंश्रयैः तावानय सम्गोपैर्नंदाद्यैः साभ्युपायनैः ३१ घातयिष्य इहानीतौ कालकल्पेन हस्तिना यदि मुक्तौ ततो मल्लैर्घातये वैद्युतोपमैः ३२ तयोर्निहतयोस्तप्तान् वसुदेवपुरोगमान् तद्बंधून्निहनिष्यामि वृष्णिभोजदशार्हकान् ३३ उग्रसेनं च पितरं स्थविरं राज्यकामुकं तद्भ्रातरं देवकं च ये चान्ये विद्विषो मम ३४ ततश्चैषा मही मित्र भवित्री नष्टकंटका जरासंधो मम गुरुर्द्विविदो दयितः सखा ३५ शंबरो नरको बाणो मय्येव कृतसौहृदाः तैरहं सुरपक्षीयान् हत्वा भोक्ष्ये महीं नृपान् ३६ एतत् ज्ञात्वानय क्षिप्रं रामकृष्णाविहार्भकौ धनुर्मखनिरीक्षार्थं द्रष्टुं यदुपुरश्रियं ३७ अक्रूर उवाच राजन् मनीषितं सध्र्यक् तव स्वावद्यमार्जनं सिद्ध्यसिद्ध्योः समं कुर्याद्दैवं हि फलभावनं ३८ मनोरथान् करोत्युच्चैर्जनो दैवहतानपि युज्यते हर्षशोकाभ्यां तथाप्याज्ञां करोमि ते ३९ एवमादिश्य चाक्रूरं मंत्रिणश्च विसृज्य सः प्रविवेश गृहं कंसस्तथाक्रूरः स्वमालयं ४० इति दशमस्कंधे षड्त्रिंशोध्यायः ३६

मनीषितं विवादिदं सध्र्यक् सम्यक् स्वावद्यमरणे तन्मार्जनं तथाप्येतावानभिनिवेशो न कार्य्यो इति भविष्यत्सूचयन्नाह सिद्ध्यसिद्ध्योरिति ३८ पुरुषकारस्य सव्यभिचारतामाह मनोरथानिति ४० इति श्रीमद्भागवते पुराणे दशमस्कंधे टीकायां षड्त्रिंशोध्यायः ३६

निवारितश्चलि ह तेव सुदेवेनोपलायेतां ग्रतोवध्यतामिति मंत्रवस्तानारदेननिवारित इति मह्यंममनिदर्शितः विधाजानारदेनवाक्यंगंवु
मुघतौ तावाह भवद्भ्यामिति मंचाउच्चुणस्तंभादि रचितस्थानानि २७ ग्रादितोशद्भ्रीकुष्णेवरदाय ग्रर्पीतंत्रशः ग्रथै

८२

ग्यस्तोस्वमित्रेनंदेवेयाभ्यांतेपुरुषाःहताः निशाम्यतत्भोजपतिःकोपात्प्रचलितेंद्रियः १८ निशान्तमसिमादभ्ने
वसुदेवजिघांया निवारितोनारदेनतत्सुतोमृत्युमात्मनः ज्ञात्वातोहमयैःपाशेः ववंधसहभार्य्यया प्रतियातेतुदेव
द द्वौकिंसग्राभाष्यकेशिनं २० प्रेषयामाहन्येतां भवता राममाधवो ततोमुष्टिकचाणूरचानतोशलकादिकान् २१
ग्रामात्यान् हस्तिपांश्चैवसभाद्रूपाह भोजराट् भोभोगेसम्यतामेतद्दीरचाणूरमुष्टिकाः नंदव्रजेकिलासातेसुतो
वानकदुंदुभेः रामकृष्णौततोमह्यं मृत्युःकिलनिदर्शिताः भवद्भ्यामिहसंप्राप्तौ हन्येतां मल्ललीलया मंचाःक्रि
यंतांविविधाःमल्लरंगपरिश्रिताः २४ पौराःजनपदाःसर्वेपश्यंतुस्वैरसंयुगं मत्तमात्रस्त्वयाभद्ररंगद्वार्युप
नीयतां २५ द्विपःकुवलयापीडोजहितेनमभादितो ग्रारभ्यतांधनुर्यागश्चतुर्दश्यांयथाविधि २६ विप्रसंतु
पश्यन्मेध्यान्भूतराजायमीकृष्णे इत्याज्ञाप्यापितंचक्र ग्राहूययदुपुंगवं २७ गृहीत्वापाणिनापाणिंततो
पश्यन्मेध्यान् भूतराजायमीकृष्णे ... ततो हितलमो विधत्ते भोजवृष्णिषु ग्रत
क्रूरमुवाचह भोभोदानपतेमह्यं क्रियतां मैत्रमादृतः २८ नान्यस्त्वत्तो हिततमो विद्यते भोजवृष्णिषु ग्रत
स्त्वामाश्रितःसौम्यकार्य्यगौरवसाधने २९ यथेंद्रोविष्णुमाश्रित्यस्वार्थमध्यगमद्विभुः गच्छनंदव्रजंतत्रसुता
वानकदुंदुभिः ग्रासन्नाविहानेनरथेनानयमाचिरं ३१

सिद्धांतमेवजानातीति ३१ दानपते ग्रक्रूरमैत्रंभिक्षुःत्वयाक्रियतां ... ग्रादृतःसादरोहिततमम्म्रनविद्यतइति २८ ३०३

भा॰ द॰ १२५ पू॰ व्यादाय मुखं प्रसार्य वेगेन हरिं प्रत्याद्रवत् सोपि हरिः हसन् सव्यं भुजं निर्भयेनेह दृष्टांतः यथोरगं बिल इति ततः किं तदाह दंता इति पंचभिः ग
य भगवद्भुजं स्पृशंती ति तथा तेव्यादानेन येन्विद्ध्वाः अयोतो हि स्पृशंतीति श्च्युता यद्वा तप्त मयं आतितोत्यादि स्पृशंतो यथेति ग्राम योज
तोदरं ७ लेंडं पुरीषं उत्सृजन् ८ वाकुटिका फलं हि पक्वं सायंतं विदीर्णं भवति तद्वदीर्णात्तस्य देहात् विगत प्राणात् अविस्मित गर्वैरहितः
अयत्नेन हतो रिपुर्येन सः कंसाय कृष्णमादिश्य तद्रहस्यादिर्ये मुनेः कंसघातादि कृष्णस्य कार्यं मावेदयन् मुनिः तदाह देवर्षिरित्यादि

115 सलब्धसंज्ञः पुनरुत्थितो रुषा व्यादाय केशी तरसापतद्धरिं सोप्यस्य वक्त्रे भुजमुत्तरं स्मयन् प्रवेशयामास यथोरगं बिले ६
दंता निपेतुर्भगवद्भुजस्पृशस्ते केशिनस्तप्तमयस्पृशो यथा बाहुश्च तद्देहगतो महात्मनो यथामयः संववृधे उपेक्षितः ७
समेधमानेन स कृष्णबाहुना निरुद्धवायुश्चरणांश्च विक्षिपन् प्रस्विन्नगात्रः परिवृत्तलोचनः पपात लेंडं विसृजन्
क्षितौ व्यसुः ८ तद्देहतः कर्कटिकाफलोपमाद्व्यसोरपाकृष्य भुजं महाभुजः अविस्मितोयत्नहतारिरुत्स्मयैः प्र
सून वर्षैर्वर्षद्भिरीडितः ९ देवर्षिरुपसंगम्य भागवत प्रवरो नृप कृष्णमक्लिष्टकर्माणं रहस्येतदभाषत १०
कृष्ण कृष्णाप्रमेयात्मन् योगेश जगदीश्वर वासुदेवाखिलावास सात्वतां प्रवर प्रभो ११

वाणव्यायं स्तावकः किंतु सर्वसुहृदित्याह भागवतप्रवर इति १० अस्मद्रहस्यं वैरिरणे कंसे सत्यवानिति मा संकीरित्याह कृष्णकृष्णेत्या
दिना अयं भावः त्वमीश्वरो भूभार दैत्य संहाराय अवतीर्णोसि अतस्तदनुरूपाचरणेन विश्वं परिपालयेति तत्र त्वयि तावद्भयशंकैव ना
स्तीत्याह अप्रमेयात्मन् अपरिच्छिन्न स्वरूप योगेश अचिंत्य प्रभाव जगदीश्वर विश्वनियंतः वासुदेव सर्वभूतेषु वर्त्तमान अखिला राम:
वास सर्वस्याश्रय संप्रति सात्वतानां प्रवर श्रेष्ठ प्रभो शर्वशक्ति ११ १२५

ह्नो१

सप्तत्रिंशे केशिव्योमसुतोऽनादिकर्मभिः नारदेन स्तुतः क्रीडन् व्योमासुरमथावधीत् १ वृषवेषासुरं यद्वत् केशिनं हयवेषिनं कंस
प्राणसखं हत्वा कंसस्य सुखमिवाकरोत् २ केशीत्विति प्रथमश्लोकेन य एवंभूतः केशी सतु यतो भगवानुपहृयादिति द्वितीये चान्वयः
महाहयः सन् महीं निर्जरयन् कम्पयन् विदारयन्निति सचयी: सटाभिः केशरैः अवधूतानि इतस्ततः क्षिप्तानि अभ्राणि विमानानि
तैः संकीर्णमभः कुर्वन् हेषितैः रवजातिशब्दैः भाषितमभरवितं विश्वं येन सः तद्धेषितैः स्तैरतिनिष्ठुरैः हेषितैः वालैः पुच्छलोमभिः

श्रीशुक उवाच केशी तु कंसप्रहितः खुरैर्महीं महाहयो निर्जरयन् मनोजवः सटावधूताभ्रविमानसंकुलं कुर्वन्न
भो हेषितभीषिताखिलः १ विशालनेत्रो विकटास्यकोटरो बृहद्गलो नीलमहाम्बुदोपमः। दुराशयः कंसहितं चिकी
र्षुर्व्रजं स नंदस्य जगाम कंपयन् २ तं त्रासयंतं भगवान् स्वगोकुलं तद्धेषितैर्वालविघूर्णितांबुदं आत्मान
माजौ मृगयंतमग्रणी रुपाह्वयन् स व्यनदन्मृगेंद्रवत् ३ स तं निशाम्याभिमुखो मुखेन खं पिबन्निवाभ्यद्रवद
त्यमर्षणः जघान पद्भ्यामरविंदलोचनं दुरासदश्चंडजवो दुरत्ययः ४ [illegible] तद्वंचयित्वा तमधोक्षजो
रुषा प्रगृह्य दोर्भ्यां परिविध्य पादयोः सावज्ञमुत्सृज्य धनुःशतांतरे यथोरगं तार्क्ष्यसुतो व्यवस्थितः ५ ॥ ॥

विघूर्णिता परिभ्रामिता अंबुदा येन तं आजौ संग्रामार्थं आत्मानं मृग्यं अग्रणीः पुरतो निर्गतः सन् स्वसमीपं आजुहाव स च केशी त
न्निशाम्य मृगेंद्रवत् नादमकरोत् ३ ततः स केशी तं कृष्णं दृष्ट्वा मुखेन खं पिबन्निव मुखं विवृत्य अभिमुखः सन्नभिजगाम किंच अत्यमर्ष
णः अतिकुपितः अत्यंतमसहमानो ताभ्यां पद्भ्यां जघान दुरासदः अन्यैरभिभवितुमशक्यः दुरत्ययः उद्धतः सन् दुरतिक्रमः
अत्र हेतुः चंडजवः ४ तद्धननं वंचयित्वा तं हननाय प्रसारितयोः पादयोः हस्ताभ्यां गृहीत्वा परिविध्य भ्रामयित्वा व्यवस्थितः तथैव

स्थितेविबस्य ५

भा० द० भार्य्ययासह जांववत्यासह स्वधामतः महाकालपुरात् १९ द्वारकामावसन् द्वारकायांवसन् कर्त्ताकरिष्यति अमुष्य विश्वस्यभारस्य
१ उ० या एवं विज्ञाप्य कृताभिनंदनं भगवंतं नमस्यति द्वयेन विशुद्धविज्ञानघनमिति केवलंज्ञानैकमूर्त्तिः अतएवस्वसंस्थया स्वस्वरूपस
पू० म्यक् स्थित्यैव परमानंदरूपया समग्राप्ताप्राप्ताः सर्वोर्थायेन तं आप्तकामत्वेनोक्तासत्यसंकल्पतामाह अमोघवांछितमितिनन्तु

स्यमंतकस्यच मणेरादानं सह भार्य्यया मृतपुत्रप्रदानं च ब्राह्मणस्य धामतः पौंड्रकस्य वधं पश्चात्काशिपुर्य्याश्च
दीपनं दंतवक्त्रंच निधनं चैद्यस्यच महाक्रतौ २० यानि चान्यानि वीर्य्याणि द्वारकामावसन् भवान् कर्त्ता द्रक्ष्याम्य
हं तानि गेयानि कविभिर्भुवि २१ अथते कालरूपस्य क्षपयिष्णोरमुष्य वै अक्षौहिणीनां निधनं द्रक्ष्याम्यर्जुनसा
रथेः २२ विशुद्धविज्ञानघनं स्वसंस्थया समाप्तसर्वार्थममोघवांछितं स्वतेजसा नित्यनिवृत्तमायया गुणप्र
वाहं भगवंतमीमहि २३ त्वामीश्वरं स्वाश्रयमात्ममायया विनिर्मिताशेषविशेषकल्पनं क्रीडार्थमद्यात्तम
नुष्यविग्रहं नतोस्मि धर्य्यं यदु॰वृसात्वतां २४ श्रीशुकउवाच एवं यदुपतिं कृष्णं भागवतप्रवरो मुनिः प्रणिप ष्णि
त्याभ्यनुज्ञातो ययौ तद्दर्शनोत्सवः २५ भगवानपि गोविंदो हत्वा केशिनमाहवे पशूनपालयत्पालैः प्रीतैः व्रजसुखा

116

वांछा चेदस्ति दुर्न्निवारा संसृतिः अत आह स्वतेजसेति चिद्रूपतया नित्यनिवृत्तो मायया वाच्यो रूपो गुणप्रवाहो यस्मात्तं अतो भगवंतं त्वनि
रतिशयैश्वर्य्यं ईमही शरणं व्रजेमेति ननु त्रिकालज्ञस्त्वं कथं मत्प्रपंचं न जानासि चेत्कथं मे गुणप्रवाहं ब्रवीषि तत्राह त्वमिति
ईश्वरं अन्यस्यवशयितारं स्वाश्रयं अन्यस्यावश्यं अतः आत्माधीनतया मायया विनिर्म्मिता अशेषविशेषामाहात्म्याद्यायाद्वा राम:
दिरूपा वाकल्पना येन तं धर्य्यं श्रेष्ठं नतोस्मीति २० २१ २६ १३०
वपं२

कथमेवंरूपोहमितिचेत्तत्राह त्वमात्मेति नहित्वंजीववत्परिछिन्नः किंतुसर्वभूतानामंतरएकोनियंता आत्मा अंतरनुस्यूतत्वेह
ष्टांतः एधसांकाष्ठानामंतर्ज्योतिरिवेतिभूतेषुस्थितोपितैर्न्नदृश्यइत्याह गूढइति अत्रहेतुः गुहाशयः बुद्धेरप्यंतरं किंचसाक्षीनहि
साक्षीदृश्यतइत्यर्थः अपिचमहापुरुषः अतःपरिछिन्नमतिभिर्न्नज्ञायसइत्यर्थः तर्हिसर्वांतरत्वेकिंप्रमाणं अत्रआह ईश्वरइति
नहीश्वरंविनापरतंत्राणांजीवानांप्रवृत्तिर्घटइत्यर्थः अहमीश्वरः अन्यत्सर्वमीशितव्यमित्येतदेवकुतः अतआह आत्मने

त्वमात्मासर्वभूतानामेकोज्योतिरिवैधसांगूढोगुहाशयःसाक्षीमहापुरुषईश्वरः १२ आत्मनात्माश्रयःपूर्वंमा
यथाससृजेगुणान् तैरिदंसत्यसंकल्पःसृजस्यत्स्यवसीश्वरः १३ सत्वंभूधरभूतानांदैत्यप्रमथरक्षसां अव
तीर्णोविनाशायसेतूनांरक्षणायच १४ दिष्ट्यातेनिहतोदैत्योलीलयायंहयाकृतिः यस्यहेषितसंत्रस्तास्त्यजं
त्यनिमिषादिवं १५ चाणूरंमुष्टिकंचैवमल्लानन्यांश्चहस्तिनं कंसंचनिहतंद्रक्ष्येपरश्वोहनितेविभो १६ तस्या
नुशंखयवनमुराणांनरकस्यच पारिजातापहरणमिंद्रस्यचपराजयं १७ उद्वाहंवीरकन्यानांवीर्यशुल्का
दिलक्षणं नृगस्यमोक्षणंशापाद्द्वारकायांजगत्पते १८

तिसाधनांतरनिरपेक्षएव आत्माश्रयः स्वतंत्रः मायया शक्त्या भवान्गुणान्ससृजे सृष्टवान् तैःसृष्टैर्गुणैः इदंविश्वंसृजसि अत्सिसं
हरसि पालयसि ननुसृष्ट्यादिक्रिया षट्कारकसाध्येव दृष्टेत्यत आह सत्यसंकल्पइति नहिसंकल्पैकसाध्येवहिः साधनापेक्षेतिभावः
अतस्त्वमीश्वरइत्युपसंहारः १३ प्रस्तुतमाह सत्वमिति भूधरभूतानां भुवंधरतीतिभूधराराजानस्तद्रूपाणां १४ परश्वोहनीति श्वो
वा अक्रूरएष्यति श्वोमथुरांगतोसि परश्वश्चाणूरादीन्त्वयानिहतान् द्रक्ष्यामीति सिद्धवन्निर्देशोभिज्ञापनप्रकारविशेषः तस्य
अनुतदनंतरं शंखादीनां शंखःपंचजनः वधंद्रक्ष्यामीतिशेषः भोविभो इहधामात्रमेतत् जल्पानंतर्येविवक्षितं १८

तदेव नारदेन कंसवधादिकार्ये विज्ञापिते श्रीकृष्णे मथुरां गंतुमुद्यतो वर्त्तते तदाक्रूरोऽपि गोकुलमगादित्याह अक्रूरोपीति अपीति संभावनायां १ २ अर्हते योग्याय सत्पात्राय तद्दर्शने असंभावनामाशंक्य पुनः संभावयति ममेतद्विति द्वयेन विषयात्मनः विषयाविष्टचित्तस्य शूद्रजन्मनो यथा तस्य ब्रह्मकीर्त्तनं वेदोच्चारणं योग्यं चेत्ति ४ यद्यप्येवं किंतु अधमस्य नीचस्यापि मम स्यादेव कुत इत्यत आह ह्रियमाणः कालनद्येति अयं भावः

श्रीशुक उवाच अक्रूरोपि च तां रात्रिं मधुपुर्यां महामतिः उषित्वा रथमास्थाय प्रययौ नंदगोकुलं १ गच्छन्पथि महाभागो भगवत्यंबुजेक्षणे भक्तिं परामुपगत एवमेतदचिंतयत् २ किं मयाचरितं भद्रं किं तप्तं परमं तपः किं वाथाप्यर्हते दत्तं यद्द्रक्ष्याम्यद्य केशवं ३ ममैतद्दुर्लभं मन्ये उत्तमश्लोकदर्शनं विषयात्मनो यथा ब्रह्मकीर्त्तनं शूद्रजन्मनः ४ मैवं ममाधमस्यापि स्यादेवाच्युतदर्शनं ह्रियमाणः कालनद्या क्वचित्तरति कश्चन ५ ममाद्यामंगलं नष्टं फलवांश्चैव मे भवः यन्नमस्ये भगवतो योगिध्येयांघ्रिपंकजं ६ कंसो बताद्याकृत मेत्यनुग्रहं द्रक्ष्येंऽघ्रिपद्मं प्रहितोमुना हरेः कृतावतारस्य दुरत्ययं तमः पूर्वेतरन् यन्नखमंडलत्विषा

श्लो ७ नरव

यथा नद्या ह्रियमाणानां तृणादीनां मध्ये किंचित् कदाचित्तरति तथा कर्मविशेषेण ह्रियमाणानां जीवानां अपि मध्ये कश्चित्तरेदिति संभवतीति ५ अतोऽनयाद्यैव ममामंगलं ध्रुवं नष्टं भवेदिति ज्ञायते भवो जन्मास्य सफलो जातः इति यतः यतः नमस्करिष्यामि अमंगलनाशे सूचकांतरमाह कंस इति बतेत्याश्चर्ये अतिखिन्नः कंसोपि ममात्यंतमनुग्रहं कृतवान् यतोऽमुना प्रहितोऽहं हरेरंघ्रिपद्मं द्रक्ष्यामीति

७ पूर्वे प्रह्लादादयः तमः संसारं अतरन् तीर्णाः

ज्ञातेरवंके शिवधानंतरं नारदोक्तमंगीकृत्य पुनस्तथैव पश्चान्यालनयनाव्योमोहतः॥ यद्वा व्योमवधः पूर्वमेवकृतो पिवेश्यधारिप्रसंगा
दृत्रोक्त इति द्रष्टव्यं केचित् पुनः॥ शंखचूडवधात्पूर्वमेवपठंतिच॥ एकदेति मेघ इवाचरेत्तवान् स्वयंचोरवद्दाचरितः सन् प्र
पोवाह॥ अपाकृष्यानिनाय॥२८॥ पिदधे छादितवान्॥ शरणदः॥ आश्रयप्रदः॥ हरिसिंहः इव॥ पशुमारं पशुमारो यथा भवति

एकदाते पशून्पालांश्चारयंतोद्रिसानुषु॥ चक्रुर्निलायनक्रीडां चोरपालापदेशतः॥२६॥ तत्रासन्कतिचिच्चो
राः पालाश्च कतिचिन्नृप॥ मेषायिताश्च तत्रैके विजह्रुरकुतोभयाः॥२७॥ मयपुत्रो महामायो व्योमो गोपा
लवेषधृक्॥ मेषायितानपोवाह प्रायश्चोरायितो बहून्॥२८॥ गिरिदर्यां विनिक्षिप्य नीतं नीतं महासुरः
शिलया पिदधे द्वारं चतुःपंचावशेषिताः॥२९॥ तस्य तत्कर्म विज्ञाय कृष्णः शरणदः सतां॥ गोपान्नयं
तं जग्राह वृकं हरिरिवौजसा॥३०॥ स निजं रूपमास्थाय गिरींद्रसदृशं बली॥ इच्छन्विमोक्तुमात्मानं ना
शक्नोद्ग्रहणातुरः॥३१॥ तं निगृह्याच्युतो दोर्भ्यां पातयित्वा महीतले॥ पश्यतां दिवि देवानां पशुमारममारय
त्॥३२॥ गुहापिधानं निर्भिद्य गोपान्निःसार्य कृच्छ्रतः॥ स्तूयमानः सुरैर्गोपैः प्रविवेश स्वगोकुलं॥३३॥ इतिश्री
भागवते महापुराणे दशमस्कंधे व्योमासुरवधो नाम शप्तत्रिंशोऽध्यायः॥३७॥

तथाऽप्रनिश्वासः मिलषर्चः॥ सुविगोपैः स्तूयमानः उपरिवैमानिकैर्देवैरपि॥३३॥ इतिश्रीमद्भागवते महापुराणे दशमस्कंधे व्योमा
सुरवधो नाम सप्तत्रिंशोऽध्यायः॥३७॥ अष्टत्रिंशे यथाध्यायन्नक्रूरो गोकुलं गतः॥ तथैव रामकृष्णाभ्यां गृहं नीत्वा सुसत्कृतः॥१॥
॥ज्ञातः केशिवधे वृत्ते नारदर्षा निर्गते मुनौ तौ व्योमे हतेऽक्रूरः सायं गोकुलमागमत्॥२॥

भा॰ द॰ पू॰ ननु सर्वथाऽहंकाररहितस्यात्मारामस्य लीलापि कुत इत्याशंक्य परानुग्रहार्थैत्याशयेनाह यस्येति अखिलानि अखिलस्य वा अमीवानि
१३२ पापानि घ्नंतीत्यखिलामीवहानि तैस्तथा सुमंगलैः शोभनानि मंगलानि येभ्यः तैः गुणाः करुणादयः कर्म्माणि जन्मानि च तैः विमिश्रा
वाचः जगत्प्राणंति जीवयंति शुंभंति शोभयंति पुनंति पवित्रयंति अतिरिक्तमाह या इति तैर्विरक्ता रहिताः ताः स्वलंकृता अपि
शवस्यालंकरणवच्छोभमानाः मताः सतां संमताः १२ स्वयं रचितान् सेतून् धर्ममर्यादाः पालयता अमरवर्याणां सुखकर्त्ता सन्
अवतीर्णः यत् यशः १३ त्रैलोक्य एकमेव कांतं दृशिमतां दृष्टिमतां महानुत्सवो यस्मात् यद्वा महानुत्सव एव अतएव श्रीया ईप्सितमास्पदम्

118

१२
यस्याखिलामीवहभिः सुमंगलैः वाचो विमिश्रा गुणकर्म्मजन्मभिः प्राणंति शुंभंति पुनंति वै जगत् यास्तद्विरक्ताः शवशोभना मताः सचावतीर्णः किल सात्वतान्वये स्वसेतुपालामरवर्य्यशर्म्मकृत् यशो वितन्वन् व्रज आस्त ईश्वरो गायंति देवा यदशेषमंगलं १३ तं त्वद्य नूनं महतां गतिं गुरुं त्रैलोक्यकांतं दृशिमन्महोत्सवं रूपं दधानं श्रिय ईप्सितास्पदं द्रक्ष्ये ममासन्नुषसः सुदर्शनाः १४ अथावरूढः सपदीशयो रथात्प्रधानपुंसोश्चरणं स्वलब्धये धिया धृतं योगिभिरप्यहं ध्रुवं नमस्य आभ्यां च सखीन् वनौकसः १५

दं एवंभूतं रूपं श्रीमूर्त्तिं दधानं श्रियः ईप्सितास्पदं तमीश्वरं द्रक्ष्यामीति अत्र लिंगं उषसः प्रभातसमयाः सुदर्शनाः सुखप्रभाता श्री
रजन्यः शुभसूचिकाः बभूवुरित्यर्थः १४ किंच अस्य दर्शनानंतरं सपदि तत्क्षणमेव रथादवतीर्णः सन् प्रधानयोः पुरुषयो रामकृष्णयोश्चरणं योगिभिरपि आत्मलाभाय केवलं धियैव धृतं साक्षादहं नमस्यामि आभ्यां सह एतयोः सखीन् गोपांश्च नमस्या रामः
रा १३२

अंघ्रिपद्मं विभावयदिति ब्रह्मादिभिरर्चितमिति परमैश्वर्यमाह श्रिया चेति सौभाग्यातिशयं मुनिभिर्भजिस्सहितैरति परमपुरुषार्थ
त्वं गोचारणायेति कृपालुत्वं यद्गोपिकानामिति प्रेममात्रसुलभत्वं ८ मनोरथांतरं करोति द्रक्ष्यामीति शोभमानौ कपोलौ नासिका च यस्मि
न्नतत् स्मितसहितोऽवलोको यस्मिन् अरुणकंजवल्लोचने यस्मिन् तत् च तच्च मुखं गुडालकावृतं वक्राः केशा आवृतं तदानीमेव मुकुंदस्य च वा
दृष्ट्वा प्रतिहृष्यन्नाह प्रदक्षिणमिति ९ पुनरप्यनंतं चिंतयन्नि अप्यद्येति ईयुषः प्राप्तवतः लावण्यस्य धाम आश्रयः तस्य विष्णोः
यथा विष्णोर्लीलाविग्रहयुक्तं यद्वा धाम वपुः तस्य उपलंभनं दर्शनं भविता भविष्यति अपि यद्येवं स्यात्तर्हि मह्यं मम दृशो लोचनस्य पा

यदर्चितं ब्रह्मभवादिभिः सुरैः श्रिया च देव्या मुनिभिः ससात्वतैः गोचारणायानुचरैश्चरद्वने यद्गोपिकानां कुच
कुंकुमांकितं ८ द्रक्ष्यामि नूनं सुकपोलनासिकं स्मितावलोकारुणकंजलोचनं मुखं मुकुंदस्य गुडालकावृतं
प्रदक्षिणं मे प्रचरंति वै मृगाः ९ अप्यद्य विष्णोर्मनुजत्वमीयुषो भारावताराय भुवो निजेच्छया लावण्यधाम्नो
भवितोपलंभनं मह्यं न न स्यात्फलमंजसा दृशः १० य ईक्षिताहंरहितोप्यसत्सतोः स्वतेजसापास्ततमोभिदा
भ्रमः स्वमाययात्मन्रचितैस्तदीक्षया प्राणाक्षधीभिः सदनेष्वभीयते ११

लंभं स्यादिति न अपि तु स्यादेवेत्यर्थः य ईक्षित इत्यादि चतुर्भिः कुलकैः तत्रैव शंकानन्वस्य महादिवत् कर्तृभोक्तृत्वादिधर्मैस्तत्र तत्र प्रतीयमा
नस्य कथं विष्णुत्वमिति मांसं का श्लोकत्रयेणाकुर्वन्नस्तु येन तमहं द्रक्ष्यामीति मनोरथं करोति तथाहि य ईक्षितेति ईक्षणमात्रकर्ता
असत्सतोः कार्यकारणयोः ईक्षितापि ईक्षणमात्रकर्तापि अहंरहितः अहंकाररहितः तथापास्त तमोभिदाभ्रमः तमः स्वज्ञानं ततोऽभ्र
मः अभिनिवेशादि अपास्ता अपाकृताः तमआदयो यस्मिन् सः कुत इत्यत आह स्वतेजसा चिच्छक्त्या नित्यस्वरूपसाक्षात्कारेण तथापि स्व
माययात दीक्षितस्यैव ईक्षया प्राणाक्षधीभिः सहितैः आत्मन् आत्मनि स्वस्मिन्नेव रचितैर्जीवैः सदनेषु ब्रह्मवनतरुषु गोपीगृहेषु

च लीलया कामानि कुर्वन्निव प्रकटवत् अभिमुखत्वेन प्रतीयते १०

भा॰द॰रू॰
१३२

अथ मां परिरिप्सते आलिंगिष्यति यदा तदैव मे असौ देहः तीर्थीक्रियते अतिपवित्रीकरिष्यते उच्छ्वसितिः भविष्यति अतो दे
हात् २० ततः भोतासीतितशाजन्मभृतः सफलजन्मानः अन्यथा तजन्मेवनभवतीत्याह महीयसेति महीयसा श्लाघ्यतमेन योना
दृतः तस्यजन्मधिक् अमुष्यजंतोः २१ ननु सुहृदादिषु पक्षिगसं भ्रमाद्यो जीवधर्म्मा कथमीश्वरसंगच्छते अत आह न
तस्येति दयितः प्रियस्तादिपूरीतोऽप्रियः सुहृत्तमोऽहितः तद्वियरीतोद्वेष्यः एतत्सर्वव्यातिरिक्त उपेक्ष्य इति सत्यं तथापि
भक्तान् भजते तत्र च यथा ये भक्ताः सा स्तथा भजते ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं मिति भगवद्वचनात् अविषमवे

सुहृत्तमं ज्ञातिमनन्यदैवतं दोर्भ्यां बृहद्भ्यां परिरप्स्यते थ मां आत्मा हि तीर्थीक्रियते तदैव मे बंधश्च कर्मात्मकः
उच्छ्वसित्यतः २० लब्धांगसंगं प्रणतं कृतांजलिं मा वक्ष्यते ऽक्रूर ततेत्युरुश्रवाः तदा वयं जन्मभृतो महीय
सा नैवादृतो यो धिग मुष्य जन्म तत् २१ न तस्य कश्चिद्दयितः सुहृत्तमो न चाप्रियो द्वेष्य उपेक्ष्य एव वा तथा
पि भक्तान् भजते यथा तथा सुरद्रुमो यद्वदुपाश्रितोऽर्थदः २२ किं चाग्रजो मावनतं यदूत्तमः स्मयन् परि
ष्वज्य गृहीतमंजलौ गृहं प्रवेश्याप्तसमस्त सत्कृतं संप्रक्ष्यते कंसकृतं स्वबंधुषु २३ श्रीशु
क उवाच इति संचिंतयन् कृष्णं स्वफल्कतनयोऽध्वनि रथेन गोकुलं प्राप्तः सूर्यश्चास्तगिरिं नृप २४
पदानि तस्याखिललोक

पि भक्तेभ्य एव फलं ददातीत्यत्र दृष्टांतः यद्वत् सुरद्रुम इति यो मयांऽजलिः करिष्यते तस्मिन्नेव गृहीतं मां असानि समस्तानि अ
खंडि सत्कृतानि येन तं २३ सुतमार्गमिप्यनि वेदितथापि रथेन प्राप्त इति २४ अखिलैः लोकपालैः किरीटेषु जुष्टा अमलाः रामः
पादरेणवो यस्य तस्य क्षितिकौतुकानि चिह्नितेरलंकाररूपाणि २५ जुष्टामल पदानि तस्याखिललोकपालकिरीटजुष्टामलपा १३२
दरेणोः ददर्श गोष्ठे क्षितिकौतुकानि विलक्षितान्यब्जयवांकुशाद्यैः २५

किंच अपीति अधास्यत् धास्यति तद्विभावयति दत्ताभय इति सार्द्धेन १६ बलिना तावत् पदत्रय परिमितिभूदानसमये तस्य हस्ते उदकं निहितं कौशिक इंद्रः तेनापि कदाचित् किंचिन्निहितमिति ज्ञातव्यं मुमुक्षूणां संसारभयनिवर्त्तकं सकामानामभ्युदयप्रदं चेत्युक्तं अनुरक्तानां परमसुखदं चेत्याह यद्वा वाशब्दो वितर्के विहारे रासक्रीडायां सौगंधिकस्यगंधइव गंधो यस्य तत् सौगंधिकगंधि १७ एवं परमानु

अप्यंघ्रिमूले पतितस्य मे विभोः शिरस्यधास्यन्निजहस्तपंकजं दत्ताभयं कालभुजंगरंहसा प्रोद्वेजितानां शरणैषिणां नृणां १६ समर्हणं यत्र निधाय कौशिकस्तथा बलिश्चाप जगत्त्रयेंद्रतां यद्वा विहारे व्रजयोषितां श्रमं स्पर्शेन सौगंधिकगंध्यपानुदत् १७ न मय्युपैष्यत्यरिबुद्धिमच्युतः कंशस्य दूतः प्रहितोपि विश्वदृक् योंतर्बहिश्चेतस एतदीहितं क्षेत्रज्ञ ईक्षत्यमलेन चक्षुषा १८ अप्यंघ्रिमूलेऽवहितं कृतांजलिं मामीक्षिता सस्मितमार्द्रया दृशा सपद्यपध्वस्तसमस्तकिल्बिषो वोढा मुदं वीतविशंकऊ

ग्रहं संभाव्य पुनरप्यसंभवमाशंक्य परेहरति नमयीति यद्यप्यहं कंशेन प्रहितः अतस्तस्य दूतः तथापि मयि शत्रुरयमिति बुद्धिं न अपैष्यति न करिष्यतीत्यर्थः यतो विश्वदृक् सर्वज्ञः अतः मम चेतसोंतर्बहिश्च यदीहितं कृतांजलित्वादि चेष्टितं एतत् क्षेत्रज्ञः अंतर्यामी नित्यज्ञानेनेक्षते अयं भावः चेतसो बहिरेव कंशमनुवर्त्ते अंतस्तु कृष्णमेव तदेतदसौ हृदिस्थो जानातीति यद्वा एतस्य जगतः ईहितमिति १८ अत्रापि यदि अंघ्रिमूले चरणयोर्पतिते अवहितं संयतं कृपामृतेन आर्द्रया दृश्या ईक्षिता द्रक्ष्यति तर्हि सपद्येव विनिष्टाखिलकल्मषः परां

[illegible] ४७

स्वप्रभया विगततिमिरा दिशः कुर्वाणौ कनकाचितौ सुवर्णप्रास्ताविति सालंकारयोः शैलसादृश्यार्थमुक्तं भगवद्दर्शनाह्लादेन यद्बाष्पं तेन पर्य्या
कुले ईक्षणे यस्य सः पुलकैरञ्चितं व्याप्तं अंगं यस्य सः स्वाख्याने अक्रूरोहमस्मीति शेमीलिकथनेनाशक्नोत् ३४ अभिप्रेत्याक्रूरोय
मेतदर्थमागत इति ज्ञात्वा कंसहननसामर्थ्यं द्योतयन्निव रथांगेन चक्रेणांकितो यः पाणिस्तेन अभ्युपाकृष्य तमालिंगितवान् ३५ पाणौ

दिशो वितिमिरा राजन् कुर्वाणौ प्रभया स्वया यथा मारकतः शैलो रौक्मश्च कनकाचितौ ३३ रथात्तूर्णमवप्लुत्य सो
ऽक्रूरः स्नेहविह्वलः पपात चरणोपांते दंडवत् रामकृष्णयोः ३४ भगवद्दर्शनाह्लादबाष्पपर्याकुलेक्षणः पुल
कांचितांग औत्कंठ्यात् स्वाख्याने नाशकन्नृप ३५ भगवांस्तमभिप्रेत्य रथांगांकितपाणिना परिरेभेऽभ्युपाकृ
ष्य प्रीतः प्रणतवत्सलः ३६ संकर्षणश्च प्रणतमुपगुह्य महामनाः गृहीत्वा पाणिना पाणी अनयत्सानु
जो गृहं ३७ पृष्ट्वाथ स्वागतं तस्मै निवेद्य च वरासनं प्रक्षाल्य विधिवत्पादौ मधुपर्कार्हणमाहरत् ३८ निवेद्य गां
चातिथये संवाह्य श्रांतमादृतः अन्नं बहुगुणं मेध्यं श्रद्धयोपाहरद्विभुः ३९ तस्मै भुक्तवते प्रीत्या रामः परमधर्म
वित् मुखवासैर्गंधमाल्यैः परां प्रीतिं व्यधात्पुनः ४० पप्रच्छ सत्कृतं नंदः कथं स्थ निरनुग्रहे कंशे जीवति दा
शार्ह शौनपाल इवावयः ४१

अंजलिरूपेण संहतौ विवेच्य गृहीत्वा ३७ मधुपर्कार्हणं तस्मिन्नायुष्कदुचितं अर्हणं आहरत् अनीय समर्पितवानित्यर्थः ३८ सत्कृतं संभा
नितं निरनुग्रहे अक्रूरे कथं केन प्रकारेण यूयं जीवथेत्यर्थः शौनः पशुघाती स एव पालको येषां अवीनां मेषाणां तद्वत्तुल्या इत्यर्थः ४१

तद्दर्शनेन य आल्हादस्तेन विवृद्धः संभ्रमो यस्य सः प्रेम्णा ऊर्द्ध्वानि रोमाणि यस्य सः अश्रूणां कलाभिर्लेशैराकुले ईक्षणे यस्य सः अवस्कंद्य अवप्लुत्य
तेषु पदेषु अचेष्टत् अलुठत् अहो इति दुर्लभतां भावयन् २५ ननु किमर्थमेवं अलुठत् नास्ति प्रेमसंभ्रमे फलोद्देश इत्याह देहभृतामिति देहभा
जां मेलावानेव पुरुषार्थः कंसाज्ञा संदेशादारभ्य हरेर्लिंगदर्शनेन श्रवणादिभिर्योयमक्रूरस्य वर्णित इति संदेशादारभ्य यावानक्रूर

तद्दर्शनाल्हादविवृद्धसंभ्रमः प्रेम्णोर्द्ध्वरोमाश्रुकलाकुलेक्षणः रथादवस्कंद्य स तेष्वचेष्टत प्रभोरमून्यंघ्रिरजां
स्यहो इति २६ देहभृतामियानर्थो हित्वा दंभं भयं शुचं संदेशाद्यो हरेर्लिंगदर्शनश्रवणादिभिः २७ ददर्श कृ
ष्णं रामं च व्रजे गोदोहनं गतौ पीतनीलांबरधरौ शरदंबुरुहेक्षणौ २८ किशोरौ श्यामलश्वेतौ श्रीनिकेतौ बृ
हद्भुजौ सुमुखौ सुंदरवरौ बलद्विरदविक्रमौ २९ ध्वजवज्रांकुशांभोजैश्चिह्नितैरंघ्रिभिर्व्रजं शोभयंतौ म
हात्मानौ सानुक्रोशस्मितेक्षणौ उदाररुचिरक्रीडौ स्रग्विणौ वनमालिनौ पुण्यगंधानुलिप्तांगौ स्नातौ विरज
वाससौ ३१ प्रधानपुरुषावाद्यौ जगद्धेतू जगत्पती अवतीर्णौ जगत्यर्थे स्वांशेन बलकेशवौ ३२

रस्य जात इति वा २६ ततः कृष्णं रामं ददर्श गावो दुह्यंते यस्मिंस्तं गोदोहनं तत्स्थानं गतौ प्राप्तौ २७ अनुक्रोशोनुकंपा तद्युक्तस्मितसहि
तयुक्तमीक्षणं ययोः उदाररुचिरा क्रीडा ययोस्तौ स्रग्भिरलंकृतौ २९ प्रधानपुरुषौ भेतौ प्रकृतिपुरुषात्मकौ वा कुत आद्यौ तदपि च कुतः ज
गद्धेतू अत एव जगत्पती विपरीतौ वा चतुर्णां पदानां हेतुमद्भावः जगत्यर्थे पृथिव्याः भरापनयनाय स्वांशेन मूर्तिभेदेन बलकेशवौ संतौ ३०

अस्मत् अस्मिन्निमित्ते वृजिनं दुःखं आर्य्ययोर्निरपराधयोः यद्धेतोर्यः अहमेव हेतुस्तस्मात् हे सौम्य स्वानां वो दर्शनं अधमसंजातं दिष्ट्याभद्रं ७
मधोर्वा मधोर्वंशजः ८ यः धनुर्मखः ९ न शं देशो यस्य यदर्थं चाणूरादिभिर्घातनार्थं अस्य कृष्णस्य स्वजन्म आनकदुंदुभेः
शाकाशात् विशेषेण विज्ञापयामासतुः सोपि नंदो गोपान्समादिशत् तदेव दर्शयति गृह्णताभिः तादि गोरसः क्षीरादि उप

(12) अहो अस्मदभूद्भूरि पित्रोर्वृजिनमार्य्ययोः यद्धेतोः पुत्रमरणं यद्धेतोर्बंधनं तयोः ६ दिष्ट्याद्य दर्शनं स्वा
नां मह्यं वः सौम्य कांक्षितं संजातं वर्ण्यतां तात तवागमनकारणं ७ श्रीशुक उवाच पृष्टो भगवतास
र्वं वर्णयामास माधवः वैरानुबंधं यदुषु वसुदेववधोद्यमं ८ यत्संदेशो यदर्थं वा दूतः संप्रेषितः
स्वयं यदुक्तं नारदेनास्य स्वजन्मानकदुंदुभेः ९ श्रुत्वाक्रूरवचः कृष्णो बलश्च परवीरहा प्रहस्य नंदं
पितरं राज्ञादिष्टं विजज्ञतुः १० गोपान्समादिशत्सोपि गृह्यतां सर्वगोरसः उपायनानि गृह्णीध्वं युज्यं
तां शकटानि च ११ यास्यामः श्वो मधुपुरीं दास्यामो नृपते रसान् द्रक्ष्यामः सुमहत्पर्व यांति जानपदाः किल
: १२ एवमाघोषयत्क्षत्रा नंदगोपः स्वगोकुले गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशं १३

यनानि उक्तमवस्कन्निरसान् घृतादीन् शाब्दिकत्वेनेदं सूचयति आचिकित्सितस्य रोगस्य चिकित्सार्थं रसान् दास्याम इति दत्त्वा व्रज
रसाधिकेन अघोषयत् सर्वतो घोषितवान् तां कृष्णैकजीवनाः गोप्यः तत्तदा अक्रूरमागतमुपश्रुत्येति १३

निरनुग्रहत्वमाह योवधीदिति तोकान् तोकानि असुतृप् असून्येव तर्प्ययतीति य: अत:खल: तस्य कंसस्य प्रजानां हे अक्रूर येषां जीवनमात्र
मपि दुर्लभं तेषां व: कुशलं विचारयामीति ४० मधुरया वाचा इत्थं सत्कृत: तयैव वाचा परिपृष्टेन प्रश्नेन अध्वपरिश्रमं संसारश्रमं ४१
इति श्रीभागवते महापुराणे दशमस्कंधे अक्रूरागमनं नामाष्टत्रिंशोऽध्याय: ३८ श्रीशुक उवाच नवत्रिंशे पुरीं गच्छन् मुच्यते गोपिकोत्कयै: अक्रू

योवधीत्स्वस्वसुस्तोकान्क्रोशंत्या असुतृप्खल: किंनुस्वित्तत्प्रजानां व:कुशलं विमृशामहे ४२ इत्थं सूनृतया
वाचा नंदेन सुसभाजित: अक्रूर:परिपृष्टेन जहावध्वपरिश्रमं ४३ इति श्रीभागवते महापुराणे दशमस्कंधे
अक्रूरागमनं नामाष्टत्रिंशोऽध्याय: ३८ श्रीशुक उवाच सुखोपविष्ट:पर्यंके रामकृष्णोरुमानित: लेभे मनो
रथान्सर्वान्पथि यान्स चकार ह १ किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने तथापि तत्परा राजन्न हि वां
छंति किंचन २ सायंतनाशनं कृत्वा भगवान्देवकीसुत: सुहृत्सु वृत्तं कंसस्य पप्रच्छान्यच्चिकीर्षितं ३ श्रीभग
वानुवाच तात सौम्यागत: कच्चित्स्वागतं भद्रमस्तु व: अपि स्वज्ञातिबंधूनामनमीवमनामयं ४ किंनु न:कु
शलं पृच्छे एधमाने कुलामये कंसे मातुलनाम्नांग स्वानां नस्तत्प्रजासु च ५

२ एतावत्कालं विस्मृतो लोकस्य दर्शनें भक्तानां मनोरथा: सत्या: भवंतीति द्योतयन्नाह सुखोपविष्ट इति रामकृष्णाभ्यां उरु अधिकं मानित: १
२ ३ हे तात हे सौम्य: स्वागतं यथा तथा आगत: स्वज्ञातिबंधूनां स्वे सुहृद: ज्ञातय: सपिंडं बंधवो असंपिंडा संबंधिनस्तेषामपि किं अन
मीव अपापं अदु:सुखं सुखमिति यावत् अनामय मारोग्यं एवं प्रश्नोपि मम नास्ति संगत इत्याह किंत्विति अंग हे अक्रूर पृच्छे पृच्छामि नोऽस्मा
स्माकम् कुलस्य आमये रोगे भो मातुल इति नाम यस्य तस्मिन् न: स्वानां तस्य प्रजासु च ५

किंचिदत्वापहारित्वेनातिक्रूरस्त्वमित्याहुः क्रूरस्त्वमिति नच क्रूरो हरति नाहमिति चेदत आहुः अक्रूरसमाख्ययेति नह्येहं कश्चिमत्यः प्रभवति अतो ना
मांतरेणास्मध्वावं त्वमेवागतोसि विश्वमंहराभि नतु स्मच्चक्षुरिति चेन्नयेन नत्वदत्तेन चक्षुषा मधुद्विषः एकदेशेनैव वक्त्रा द्दे त्वदीयसमग्रसृष्टि
नैपुण्यं अज्ञाद्म इष्टवंत्यो वयं तद्धच्छुः अयंभावः मम सर्वरहस्य माभिज्ञानि मिति अमर्षेणैव ह्यस्मद्वियोजयन् स्वानंदीकरोषीति २१ विधा
तारं विहाय परस्पर मन्त्रुः ननंदसूनुरिति वत्स्वे दे तत्रक्षणभंगं अस्थिरं सौहृदं यस्य स गृहादीन् विहाय अज्ञासात्तस्यैव दास्य

क्रूरस्त्वमक्रूरसमाख्यया दिन श्चक्षुर्हि दत्तं हरसे वताज्ञवत्। येनैकदेशेऽखिलसर्गसौष्ठवं त्वदीयमद्राक्ष्म वयं
मधुद्विषः २१ न नंदसूनुः क्षणभंगसौहृदः समीक्षते नः सुकृतातुरा वत विहाय गेहान् स्वजनान् सुतान् पती
स्तद्दास्यमद्धोपगता नवप्रियः २२ सुखं प्रभाता रजनीयमाशिषः सत्या बभूवुः पुरयोषितां ध्रुवं याः संप्रवि
ष्टस्य मुखं व्रजस्पतेः पास्यंत्यपांगोत्कलितस्मितासवं २३

मुपागताः सुकृतातुराः तत्कृतेनैव सितादिभ्य परवशा अपि नः अस्मान् न समीक्षिष्यते नवं नवं प्रियं यस्य सः अतः एनं निवारयामः
इतिभावः २२ सेर्ष्यमूचुः सुखं प्रभातेति व्रजस्पते श्रीकृष्णस्य मुखं पास्यंती आदरेण द्रक्ष्यंति कथंभूतं अपांगेन नेत्रांतेन उत्कलि
तं उज्जृंभितं स्मितमेव आसवो रसो यस्मिन् तत् यद्वा अपंगोत्कलितस्मितेन आसवरूपं यन्मुखं तत अपानं मुखमेव संभावयंतीति २३

व्यस्ताः लिंगान्याह पंचभिः काश्चिदिति तेन अक्रूरेण कृतो यो हृत्तापस्तेन यः श्वासस्तेन म्लाना मुखश्रीर्यासां तास्तथा बभूवुरिति १४ दुकूला
निवलयानि केशाग्रंथयश्च स्रंसन्ति दुकूलादयो यासां ताः तथाभूताः काश्चन बभूवुरिति तस्य श्रीकृष्णस्यानुध्यानेन निवृत्त अशेषा
श्च वृत्तयो यासां ताः इमं लोकं देहमध्येन जानंति मुक्ता इवेति अपराः स्त्रियः शौरेर्गिरः स्मरंत्यः संमुमुहुः कथंभूताः अनुरा

काश्चित्तत्कृतहृत्तापश्वासम्लानमुखश्रियः स्रंसद्दुकूलवलयकेशग्रंथ्यश्च काश्चन १४ अन्याश्च तदनुध्याननिवृत्ताशेषवृत्तयः नाभ्यजानन्निमं लोकमात्मलोकं गता इव १५ स्मरंत्यश्चापराः शौरेरनुरागस्मितेरिताः हृदिस्पृशश्चित्रपदा गिरः संमुमुहुः स्त्रियः १६ गतिं सुललितां चेष्टां स्निग्धहासावलोकनं शोकापहानि नर्माणि प्रोद्दामचरितानि च १७ चिंतयंत्यो मुकुंदस्य भीता विरहकातराः समेताः संघशः प्रोचुरश्रुमुख्योऽच्युताशयाः १८

गोप्य ऊचुः अहो विधातस्तव न क्वचिद्दया संयोज्य मैत्र्या प्रणयेन देहिनः तांश्चाकृतार्थान्वियुनंक्ष्यपार्थकं विक्रीडितं तेऽर्भकचेष्टितं यथा १९ यस्त्वं प्रदर्श्यासितकुंतलावृतं मुकुंदवक्त्रं सुकपोलमुन्नसं शोकापनोरस्मितलेशसुंदरं करोषि पारोक्ष्यमसाधु ते कृतं २०

गेणयत्स्मितं तेन ईरिताः हृदि स्पृशंतीति हृदिस्पृशः मनोज्ञाः विचित्राणि पदानि यासु ताः विरहेण कातराः विह्वलाः अच्युते आशयश्चि
त्तं यासां ताः १८ तत्समसंगतिं विधाय विघटयतीति विधातः असेकं मा क्रोशंत्य आहुः अहो इति मैत्र्या हितचरणेन प्रणयेन स्नेहेन च अकृ
तार्थान् अप्राप्तभोगानपि तान् वियुनंक्षि वियोजयसि तस्मान्न तव काचिद्दयास्ति बालिशोचितमित्याहुः अपार्थकमिति विक्रीडितं च तवेदं कर्मेत्य
ाहुः यस्त्वमिति शोकमपनुदतीति शोकापनोदः सुचासौ स्मितलेशश्च गूढहासश्च गूढहासस्तेन सुंदरं मुकुंदस्य वक्त्रं प्रदर्श्य पुन

ना॰द॰प्र॰ अहो धिगस्मज्जीवितमित्याहुः आनर्द्धीरिति अनार्द्रा कठिना धीर्यस्य सः तावदेषः क्रूरः स्यंदनमधिरूढः अस्याविनयमानस्य स्थविरैरुपेक्षितं
१३७ तेन निवारितवंत इत्यर्थः किंचिद्दैवं चेति अयं भावः यदि दैवमस्माकमनुकूलं भवेत् विघ्नैः कश्चिद्देवानां मध्ये ज्ञाति हन्येतस्या अकस्माद्वज्रपा
तो वा भवेत् अन्यथा किंचिददैवं न तु तत्र किंचिदस्तीति २७ परस्परं संमंत्र्य साहसमधिरुह्याहुः निवारयाम इति अकरिष्यन्नु
किं करिष्यंती निमिषार्द्धदुस्त्यजान् मुकुंदसंगात् विध्वंसितानि वियोजितानि अतएव दीनानि चेतांसि यासां एवंभूतानामस्मा
कं नमस्योरपि भयमित्यर्थः २८ इतोपि कारणाद्दर्शसाहसमेवावलंबनीयमित्याहुः हे गोप्यः यस्य ललितस्मितं वल्गु मंजुली

123

अनार्द्रधीरेष समास्थितो रथं तमन्वमी च त्वरयंति दुर्मदाः गोपाः अनोभिः स्थविरैरुपेक्षितं दैवं च नोद्य प्रति
कूलमीहते २७ निवारयामः समुपेत्य माधवं किं नोकरिष्यन्कुलवृद्धबांधवाः मुकुंदसंगान्निमिषार्द्धदुस्त्यजा
न् दैवेन विध्वंसितदीनचेतसां २८ यस्यानुरागललितस्मितवल्गुमंत्रलीलावलोकपरिरंभणरासगोष्ठ्यां ।
नीताःस्म नः क्षणमिव क्षणदा विना तं गोप्यः कथं न्वतितरेम तमो दुरंतं २९ योह्नःक्षये व्रजमनंतसखः परीतो
गोपैर्विशन् खुररजःछुरितालकस्रक् वेणुं क्वणन् स्मितकटाक्षनिरीक्षणेन चित्तं क्षिणोत्यमुमृते नु कथं भवेम

लीलावलोकश्च परिरंभणं च अनुरागेण ललितानि यस्यां रासगोष्ठ्यां रासक्रीडासभायां नः अस्माभिः क्षणदाः रात्रयः क्षणमिव नीताः
तममुं कृष्णं विना दुरंतं तमः विरहदुःखं कथं नु अतितरेम न कथंचिदित्यर्थः २९ किंच आस्तां तमोतितरणं जीवनमेव कथं स्यादित्या रामः
हुः य इति अह्नः क्षये दिनावसाने खुररजोभिः छुरिताः धूसराः अलकाः स्रजश्च यस्य सः व्रजं विशन् स्मितेन यत्कटाक्षनिरीक्षणं तेन १३७
नश्चित्तं क्षिणोति हरति अमुं कृष्णं विना कथं भवेम जीवेमेति ३०

ननु छिन्नाणि दिनानि तथा भवतु नाम तथाप्यस्मत्स्नेहात् कृष्णः पित्रादिभिश्चापरावर्जित आगमिष्यतीत्याशंक्याहुः हे अबलाः तासां मधुवन्मंजु
भाषितैः वशीकृतचित्तः तथा तासां सलज्जस्मितैर्विभ्रमैर्भ्रमैरन्यपरवान् पित्रादिपरतंत्रोपि यदा व्रजे परे अन्ये बंधवः संति यस्य सः स तथा मनस्वाधी
रोपि ग्राम्याः अविदग्धानः कथं प्रति यास्यते अतेष्यति नकार्यं चिदिति स्पर्धैः २७ अस्मद्बहुत्सवभाजोऽन्याएवाग्र भविष्यंतीत्याहुः अथेति तत्र

तासां मुकुंदो मधुमंजुभाषितै गृहीतचित्तः परवान मनस्व्यपि कथं पुनर्नः प्रतियास्यतेवलाः ग्राम्याः सल
ज्जस्मितविभ्रमैर्भ्रमन् २७ अद्य ध्रुवं तत्र दृशो भविष्यते दासार्हभोजांधकवृष्णिसात्वतां महोत्सवः श्रीर
मणं गुणास्पदं द्रक्ष्यंति ये चाध्वनि देवकीसुतं २८ मैतद्विधस्याकरुणस्य नाम भूदक्रूर इत्येतदतीव दारुणः
योसावनाश्वास्य सुदुःखितं जनं प्रियात्प्रियं नेष्यति पारमध्वनः २९

पुरे दाशार्हादीनां दृशः दृष्टेर्महानुत्सवो भविष्यते भविष्यति ये देवकीसुतं द्रक्ष्यंति तथा ये चान्ये अध्वनि गच्छंतं द्रक्ष्यंति तेषामपि दृशो भवि
ष्यतीति यद्वा दृशाहति द्वितीया तेषां दृशोर्नेत्राणां महोत्सवो भविष्यत्ते आस्यति भास्वर्थे स्य भवते रात्मने पदित्वात् २८ अक्रूरं शपंत्य आ
हुः मैतद्विधस्येति येन विधा विधानं कर्म यस्य अतएव निःकृपस्य अक्रूर इति शोभनं नाम माभूत् तत्र हेतुः अतीव दारुण इत्यादि प्रि
यात् प्राणादपि प्रियं कृष्णं अध्वनः पारं अस्मद्गोचरत्वादतिदूरं देशं नेष्यति २९

सिद्धादिभिः स्तूयमानं ४४ सहस्रं शिरांसि यस्य तं सहस्रफणेषु मौलयो यस्य सं नीलं नीले अंबरे यस्य तं विशावल्लकामूलकंद
वत् श्वेतशृंगैः शिखरैः श्वेतकैलाशमिव स्थितं ४५ तस्योत्संगे कुंडलीकृतदेहार्धे विलोक्य एकादशेन श्लोकेनान्वयः शोभनौ
भ्रुवौ यस्य उन्नता नासिका यस्य तं च तं च शोभनौ कपोलौ अरुणे अधरे यस्य तं च तं च ४७ तुंगावंसौ यस्य उरःस्थले श्रीर्यस्य
तं च तं च वलिवत्पल्लवोदरं वलयः तिर्यक् निम्नरेखा यस्य संति तद्वान्वलिवत् लंबतत्पल्लववत् अश्वत्थस्य दलसदृशमुदरं यस्य तं

तौ रथस्थौ कथमिह सुतावानकदुंदुभेः तर्हिस्वित्स्यंदने न स्त इत्युन्मज्य व्यचष्ट सः ४२ तत्रापि च य
था पूर्वमासीनौ पुनरेव सः न्यमज्यद्दर्शनं यन्मे मृषा किं सलिले तयोः ४३ भूयस्तत्रापि सोऽद्राक्षीत्
स्तूयमानमहीश्वरं सिद्धचारणगंधर्वैरसुरैर्नतकंधरैः ४४ सहस्रसिरसं देवं सहस्रफणमौलिनं
नीलांबरं विशश्वेतं शृंगैः श्वेतमिव स्थितं ४५ तस्योत्संगे घनश्यामं पीतकौशेयवाससं पुरुषं चतु
र्भुजं शांतं पद्मपत्रारुणेक्षणं ४६ चारुप्रसन्नवदनं चारुहासनिरीक्षणं सुभ्रून्नसं चारुकर्णं सुकपो
लारुणाधरं ४७ प्रलंबपीवरभुजं तुंगांसोरःस्थलश्रियं कंबुकंठं निम्ननाभिं वलिवत्पल्लवोदरं ४८
बृहत्कटितटश्रोणीकरभोरुद्वयान्वितं चारुजानुयुगं चारुजंघायुगलसंयुतं ४९ तुंगगुल्फारुण
नखव्रातदीधितिभिर्वृतं नवांगुल्यंगुष्ठदलैर्विलसत्पादपंकजं ५०

कटितटं
कटितटं च श्रोणिश्च करभसदृशमूरुद्वयं च बृहच्च तत्कटितटश्रोणिकरभोरुद्वयं च तेनान्वितं यद्वा बृहद्भ्यां कटितटश्रोणि रामः
णिभ्यां करभोद्वयेन वान्वितं ४९ तुंगौ ईषदुन्नतौ गुल्फौ अरुणानखव्रातश्च तेषां दीधितिभिः तथा नवाः अंगुल्यः अंगुष्ठौ १३८
च तान्येव दलानि तैश्च विलसत् शोभमानं पादपंकजं यस्य तं ५०

कृष्णेविशिष्टानि मनांसि यासां ताः सुस्वरं उच्चैः ॥ ३१ ॥ क्रूरमक्रूर ततः कृत्वाकं संकोशि निषूदनः । गोपी मनोरथ्या रामः । स रामः स्वपुरं
ययौ स्त्रीणामिति ता अनादृत्य ॥ कृतमैत्रादिकः मैत्रं मित्रदैवत्यं संध्योपासनं । तदादिक मनुष्ठितं येन सः ॥ ३२ ॥ अन्वसज्जंत अनुगच्छन्
॥ ३३ ॥ अनुरंजिताः परावृत्य निरीक्षणादिभिः किंचिद्दत्तानंदिताः प्रत्यादेशं प्रत्याख्यानं ॥ ३४ ॥ तप्यतीः संतप्यमानाः । आयास्ये सोऽहमागमिष्यामि

श्रीशुक उवाच ॥ एवं ब्रुवाणाः विरहातुराः भृशं व्रजांगनाः कृष्णविषक्तमानसाः ॥ विसृज्य लज्जां रुरुदुः स्म सुस्वरं
गोविंद दामोदर माधवेति ॥ ३१ ॥ स्त्रीणामेवं रुदंतीनामुदिते सवितर्यथा ॥ अक्रूरश्चोदयामास कृतमैत्रादिको र
थं ॥ ३२ ॥ गोपास्तमन्वसज्जंत नंदाद्याः शकटैस्ततः ॥ आदायोपायनं भूरि कुंभान् गोरससंभृतान् ॥ ३३ ॥ गोप्यश्च
दयितं कृष्णमनुव्रज्यानुरंजिताः ॥ प्रत्यादेशं भगवतः कांक्षंत्यश्चावतस्थिरे ॥ ३४ ॥ तास्तथा तप्यतीर्वीक्ष्य स्व
प्रस्थाने यदूत्तमः ॥ सांत्वयामास सप्रेमैरायास्य इति दौत्यकैः ॥ ३५ ॥ यावदालक्ष्यते केतुर्यावद्रेणू रथस्य च ॥ अ
नुप्रस्थापितात्मानो लेख्यानीवोपलक्षिताः ॥ ३६ ॥ ता निराशा निववृतुर्गोविंदविनिवर्तने ॥ विशोका अहनि
निन्युर्गायंत्यः प्रियचेष्टितं ॥ ३७ ॥ भगवानपि संप्राप्तो रामाक्रूरयुतो नृप ॥ रथेन वायुवेगेन कालिंदीमघना
शिनीं ॥ ३८ ॥ तत्रोपस्पृश्य पानीयं पीत्वा मृष्टं मणिप्रभं ॥ वृक्षखंडमुपव्रज्य सरामो रथमाविशत् ॥ ३९ ॥ अ
क्रूरस्तावुपामंत्र्य निवेश्य च रथोपरि ॥ कालिंद्या ह्रदमागत्य स्नानं विधिवदाचरत् ॥ ४० ॥ निमज्ज्य तस्मिन् सलि
ले जपन् ब्रह्म सनातनं ॥ तावेव ददृशेऽक्रूरो रामकृष्णौ समन्वितौ ॥ ४१ ॥

ति दूतवाक्यैः ॥ ३५ ॥ स्वस्वं अनुप्रस्थापिता आत्मानं चित्तानि याभिस्ताः लेख्यमय पुत्रिका इव निश्चला ॥ ३६ ॥ ३७ ॥ ३८ ॥ वृक्षाणां खंडं समूहं उपव्रज्य
॥ ३९ ॥ शत्रुभ्यः शंकितः सन् रथोपरि निवेश्य ॥ ४० ॥ अस्वबेदं जुषन् । यौ गोपालौ कुतो मध्या वितिशंकितस्तेन तस्मै । अक्रूराय जले रूपं मत्याक्ष

श्रीकृष्णं शरणमिति नतोऽस्मि इति हे ब्रह्मन्त्वां नतोस्मि त्वमस्मत्पितृत्वात् कुतो मां वा त्वं नतोस्मि तत्राह आद्यं पुरुषं अव्ययं च अनादिनिधनमित्यर्थः कुत एतत् अखिलहेतवो हेतुः सतु नारायणः नाहमिति चेत् नारायणस्त्वं किं ईनारायण इति मां स्तोषि कात्र स्तुतिः सत्यमेवेत्याह यन्नाभिजातादिति यतो ब्रह्मणः १ अखिलहेतुहेतुत्वं प्रपंचयति भूरिति खमादि रहंकारः अजा माया तस्या आदिः पुरुषः येते ये जगतो हेतवस्ते सर्वेते तव अंगभूता अंगात् श्रीमूर्तेः भूताः उपसर्जनभूता वा नान्येति स्तुतिः कर्पति

125

॥ अर्जुन उवाच ॥ नतोऽस्म्यहं त्वाखिलहेतुहेतुं नारायणं पुरुषमाद्यमव्ययं ॥ यन्नाभिजातादरविंदकोशा
द्ब्रह्माविरासीद्यत एष लोकः ॥ १ ॥ भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इंद्रियाणि ॥ सर्वेंद्रिया
र्थाः विबुधाश्च सर्वे ये हेतवस्ते जगतोंऽगभूताः ॥ २ ॥ नैते स्वरूपं विदुरात्मनस्ते ह्यजादयो नात्मतया गृही
ताः ॥ अजोऽनुबद्धः सगुणैरजाया गुणात्परं वेद न ते स्वरूपम् ॥ ३ ॥

यते अहमेवान्यत्तत्तु स्यन्नस्मात् परतंत्रश्चेदित्याशंक्य तवेयामायास्वत्यारमाप्यैतु नकोपि वेदेत्याह नैत इति एते अजाद्या दिर्येषां ते आत्मनस्ते स्वरूपं न विदुः अनात्मतया जडत्वेन कारणेन जडत्वे हेतु गृहीताः अत्यक्ताद्विभिः दृश्याः नह्यजडो हगोचर इति भावः नन्वजडो ब्रह्मा माजानं तु जीववस्तु ज्ञास्यतीत्यत आह अज इति स अजो ब्रह्मापि अजाया गुणैरनुबद्धः प्राकृतः गुणातीतं ते स्वरूपं न वेद अन्यः कुतो ज्ञास्यतीति यद्वा प्रकृत्यादयः आत्मनः स्वरूपं तव स्वरूपं च न विदुः जडत्वे देवजीववस्तु तान् आत्मानं च

स्तु महार्हमणि व्राताः ये युक्तैः किरीटादिभिः ॥५१॥५२॥ पृथक् पृथक् भावो ऽभिप्रायो येषां तैः तत्र पार्षदैः स्वामीति स्तूयमानं स
नकादिभि ब्रह्मेति ब्रह्माद्यैः महेश्वर इति मारीच्यादिभिर्द्विजोत्तमैः परः प्रजा प्रजापतिरिति ॥५३॥ वसुः उपरिचरः प्रह्लाद
द नारद वसवः प्रमुखाः येषां तैः परदेवमिति च अष्टैर्वचोभिः पृथक् भावैर्वचोभिरित्येवा ॥५४॥ विद्याविद्ये जीवानां मुक्ति

सुमहार्हमणिव्रातकिरीटकटकांगदैः कटिसूत्रब्रह्मसूत्रहारनूपुरमंडलैः ॥ भ्राजमानं पद्मकरं शंख
चक्रगदाधरं श्रीवत्सवक्षसं भ्राजत्कौस्तुभं वनमालिनं ॥५२॥ सुनंदनंदप्रमुखैः पार्षदैः सनकादिभिः
सुरेशैर्ब्रह्मरुद्राद्यैर्नवभिश्च द्विजोत्तमैः ॥५३॥ प्रह्लादनारदवसुप्रमुखैर्भागवतोत्तमैः स्तूयमा
नं पृथक्भावैर्वचोभिरमलात्मभिः ॥५४॥ विलोक्य सुभृसं प्रीतो भक्त्या परमया युतः ॥ हृष्यत्तनूरुहो
भावपरिक्लिन्नात्मलोचनः ॥५५॥ गिरा गद्गदयास्तौषीत्सत्त्वमालंब्य सात्वतः ॥ प्रणम्य मूर्ध्नावहितः
कृतांजलिपुटः शनैः ॥५७॥ इति श्रीभागवते महापुराणे दशमस्कंधे ऽक्रूरायब्रह्मदर्शनंनाम ए
॥ एकोनचत्वारिंशोध्यायः ॥३९॥

संसृति हेतु मायाकार्यं शक्तिसंवित् ज्ञानं अभिरन्याभिश्च निषेवितं ॥५५॥ विलोक्य सुभृसंप्रीतः अस्मत्कृष्णो सावेवं भूतः
परमेश्वर इति ज्ञात्वेति ॥५६॥ इति श्रीभागवते महापुराणे दशमस्कंधे टीकायां एकोनचत्वारिंशोध्यायः ॥३९॥ चत्वारिंशेत
तो क्रूरः स्तौ त्संमत्वेश्वरेश्वरं प्रणम्य भक्त्यालु स्तावसगुणगुणभेदतः ॥१॥

भा०द०पू०

येपिक्तुद्वदन्भक्ता देवताभक्ता स्तेपित्वामेव यजंतीत्याह हे सर्वदेवमय नन्वेते परस्परदेवताधिदेपकलहव्याकुलचित्ताः कथ
मामेव यजंतीत्युच्यते तत्राह यद्यप्यन्याधिप इति बुद्धिमात्रभेदेन वस्तुभेद इत्यर्थः ९ तस्मात्सर्वेमार्गास्त्वय्येव पर्यवस्यंती
ति सदृष्टांतमाह यथेति अद्रेः शैलाच्छ्रात्सर्वतः प्रभवंतीयान द्यः पुनः पर्जन्येनापूरिताः वक्रस्रोतसः सत्यः सर्वतः
सिंधावेव विशंति तद्वद्देवतागतयो मार्गा अततस्त्वामेव विशंतीति १० अत्र हेतुमाह सत्त्वमिति भवतः शक्तिर्या
प्रकृतिस्तस्याः सत्वादयो गुणाः अतः आकृताः प्रकृतिकार्याः पाधयो ब्रह्मपर्यंताः स्थावरादयो जीवाः सोपाधिका इति तेषु गुणे

सर्व एव यजंति त्वां सर्वदेवमयेश्वरं येप्यन्यदेवताभक्ता यद्यप्यन्याधियः प्रभो ९ यथाद्रिप्रभावा नद्यः
पर्जन्यापूरिताः प्रभो विशंति सर्वतः सिंधुं तद्वत्त्वां गतयो ततः १० सत्वं रजस्तम इति भव
तः प्रकृतेर्गुणाः तेषु हि ब्रह्मकृता ओता आब्रह्मस्थावरादयः ११ तुभ्यं नमस्ते स्त्वविषक्तदृष्टये सर्वात्म
ने सर्वधियां च साक्षिणे गुणप्रवाहोयमविद्यया कृतः प्रवर्तते देवनृतिर्यगात्मसु १२

ओताः प्रविष्टास्ते च गुणाः प्रकृतौ सा च त्वयीति अतः क्रमेणोपाधिलयात् सर्वेपि त्वामेव विशंतीति यद्वा भवतः प्रकृतेर्गु
णेषु ओता ब्रह्मादयो भवद्व्यतिरिक्ताः न संति अतस्त्वमेव सर्वदेवमय इति ११ ननु भवतः प्रकृतेरेति वदस्माकमपि प्रकृ
तिसंबंधप्रतीति तत्प्रकृतेर्यं च मम च को विशेषः स्यादित्याशंक्य विशेषमाह तुभ्यमिति अविषक्ता दृष्टये अलिप्तप्रबुद्ध
ये कुतः सर्वात्मने स्वव्यतिरिक्ताभावाद्विषक्तदृष्टित्वमित्यर्थः किं च सति नृतीर्यं इव आत्मनो येषां तेषु देवतादिशरी
राभिमानीषु इत्यर्थः त्वदविद्यया कृतोयं गुणप्रवाह प्रवर्तते अतो महान् विशेषा इत्यर्थः यां च साक्षिणे सर्वबुद्धिसा

१५०

126

दिखात्तकापिबुद्धितोपकरणं इत्यर्थः इतरद्प्राप्यते गुरुणाय पाद ९२

१५०

ननु यदि वेदोपि न जानंति कथं तर्हि संसारनिवृत्तिर्जीवानामित्याशंक्य साक्षादगोचरत्वेपि येन केनापि मार्गेण भजतां त्वं गम्योसीत्याह त्वांयोगि
न इति हैरण्यगर्भीयाः अध्यात्माधिभूताधिदैवसाक्षिणं महापुरुषं तदंतर्यामिस्वरूपमीश्वरं च यजंति तदेवं सांख्ययोगावुक्तौ इदानीं
त्रयीमार्गं कर्मज्ञानभेदेन दर्शयति त्रय्या चेति श्लोकद्वयेन वैतानिकाः कर्मयोगिनः त्वां वै त्वामेव यजंते ननु ते इंद्रवरुणवाय्वादीन् यजं
ते न तु मां अत आह नानावज्रहस्तादीनि रूपाणि येषां तेऽमरास्तेषामाख्यया नाम्ना त्वामेव यजंते इति अयं भावः ऐंद्रवारुणादिह

त्वांयोगिनोयजंत्यद्धामहापुरुषमीश्वरं साध्यात्मंसाधिभूतंचसाधिदैवंचसाधवः ४ त्रय्याचविद्ययाकेचित्त्वांवै
वैतानिकाःद्विजाः यजंतेविततैर्यज्ञैर्नानारूपामराख्यया ५ एकेत्वाखिलकर्माणिसंन्यपसमंगताः ज्ञानिनो स्यो
ज्ञानयज्ञेनयजंतिज्ञानविग्रहं ६ अन्येचसंस्कृतात्मानोविधिनाभिहितेनते यजंतित्वन्मयास्त्वांवैबहुमूर्त्ये
कमूर्त्तिकं ७ त्वामेवान्येशिवोक्तेनमार्गेणशिवरूपिणं बह्वाचार्यविभेदेनभगवन्समुपासते ८

* तैरिंद्रादयः सर्वैश्वर्येण प्रकाश्यंते तेन च सर्वे इमाः बहवः संभवंति अतो नामभेदेन त्वामेव यजंत इति तथा च श्रुतिः स प्रथमः सप्र
क्रतिर्विश्वकर्मा स प्रथमोसि मित्रावरुणावग्निः स प्रथमो बृहस्पतिश्चिकित्वान् तस्मा इंद्राय हविरा जुहोतीति ५ ज्ञानयज्ञेन समा
धिना ६ सांख्ययोगत्रयीमार्गा उक्ताः वैष्णवसेवमार्गावाह द्वयेन अन्ये चेति संस्कृतात्मानः वैष्णवशैवदीक्षयादीक्षिताः संत
स्ते त्वयाभिहितेन पंचरात्रादि विधिना त्वन्मयाः त्वन्मयत्वेनात्मानं चिंतयंतः त्वदेकप्रधाना इति वा वासुदेवसंकर्षणप्रद्युम्ना
निरुद्धभेदेन बहुमूर्त्ति नारायणरूपेणैकमूर्त्तिकं त्वामेव यजंति ७ बह्वाचार्यभेदेनेति तान् भेद शैवपाशुपतादिमार्गेण
८

भा॰द॰पु॰ अकूपाराय कूर्माय यद्वि पृष्ठ कुधारो यस्य तस्मै १९ अग्रणां यत्नये परम्भुरामाय २० शंकर्षणादिचतुर्व्यूहरूपेण प्रणमति नमस्ते वासु
१४९ देवायेति २१ २२ एवं स्तुत्वा बंधमोक्षं प्रार्थयितुमाह भगवन्निति असति देहादौ ग्राह आग्रहो यस्य सः असत्याहो यस्य
स्येतिवा २३ नकेवलं मयं लोकः अहमपि तथैवेत्याह अहं चेति २४ मूढत्वमेव प्रकटयति विपर्यासमतिरिति अ
नित्ये कर्मफले नित्यमिति अनात्मनि देहे आत्मेति दुःखरूपे गृहे सुखमिति विपरीतमतिरित्यर्थः द्वंद्वे सुखदुःखादि
षु आरमते क्रीडतीति तथा सः ननु दुःखे कुतो रतिः तत्राह तमो विद्यः तमसावाप्तः आभान आत्मा प्रियं प्रेमास्पदं त्वां न जानंत
127
अकूपाराय बृहते नमो मंदरधारिणे क्षित्युद्धारविहाराय नमः शूकरमूर्तये १९ नमस्ते नृसिंहाय
क साधुलोकभयापह वामनाय नमस्तुभ्यं क्रांतित्रिभुवनाय च २० नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे नमस्ते
रघुवर्याय रावणांतकराय च नमस्ते वासुदेवाय नमः संकर्षणाय च प्रद्युम्नाय निरुद्धाय सात्वतां पत
ये नमः २१ नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने म्लेच्छप्रायक्षत्रहंत्रे नमस्ते कल्किरूपिणे २२ भग २
वन् जीवलोकोऽयं मोहितस्तव मायया अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु २३ अहं चात्मात्मजागा
रदारार्थस्वजनादिषु भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो २४ अनित्यानात्मदुःखेषु विपर्ययम
तीर्ह्यहं द्वंद्वारामस्तमोविष्टो न जाने त्वात्मनः प्रियं २५ यथाबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः अभ्येति मृग
तृष्णां वै तद्वत्त्वाहं पराङ्मुखः २६ नोत्सहेऽहं कृपणधीः कामकर्महतं मनः रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाण
इत्यर्थः २५ सदृष्टांतमाह यथेति तस्माज्जलादुद्भवंतीति तदुद्भवानि तृणादीनि तैः तथा मायाछन्नं त्वामहं हित्वा पराङ्मुखः दे
हाद्यभिमुखो वर्तन इति २६ ननु एवं जानतः कुतो विषयाभिमुखता तत्राह नोत्सह इति कृपणा विषयवासनायुक्ता धीर्यस्य सः आ

सर्वात्मन इत्यनेनोक्तं सगुणं रूपं स्तौति अग्निर्मुखमिति द्वाभ्यां अग्न्यादीनन्द्येषु आयत्तता विधीयते योयमग्निः स तव मुखमित्यादि
च न व्यस्तया इन्द्रियाणां च दुः श्रुतिः श्रवणौ दिशं कर्णौ मरुतौ प्राणश्च वलंचं तत् १३ अद्रयः परतेऽस्थीनि रवानि १४ न केवलमेता
वदा किंतु सर्वोप्ययं प्रपंचस्त्वदवयवभूत एवेति तदन्नैवं सत्यपि प्रपंचस्य विकारास्त्वयि न प्रयुज्यन्ते तस्य त्वयि कल्पितत्वादित्या
ह त्वय्यीति अव्ययात्मनि पुरुषे प्रार्ते लोकास्त्वयः संजिहि भवते अचलं ति हे अव्ययात्मन् इति वा कथं भवते त्वयी मनोमये भवः

अग्निर्मुखं तेऽवनिरंघ्रिरीक्षणं सूर्यो नभो नाभिरथो दिशः श्रुतिः द्यौः कं सुरेन्द्रास्तव बाहवोऽर्णवाः कुक्षिर्म
रुत्प्राणबलं प्रकल्पितं १३ रोमाणि वृक्षौषधयः शिरोरुहाः मेघाः परस्यास्थिनखानि तेऽद्रयः निमे
षणं रात्र्यहनी प्रजापतिर्मेढ्रस्तु वृष्टिस्तव वीर्यमिष्यते १५ त्वय्यव्ययात्मन्पुरुषे प्रकल्पिताः लोकाः
सपालाः बहुजीवसंकुलाः यथा जले संजिहते जलौकसोऽप्युदुम्बरे वा मशका मनोमये १६ यानि यानी
ह रूपाणि क्रीडनार्थं बिभर्षि हि तैरामृष्टशुचो लोका मुदा गायंति ते यशः १७ नमः कारणमत्स्याय प्र
लयाब्धिचराय च हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे १८

प्रधाने मनोवृत्तिर्विषये दृश्यन्ते त्वय्यव्यया कुब्जा मनसैवानुद्रष्टव्यं इत्यादि श्रुतेः जले यथा जलौकसः सूक्ष्म प्राणपुराशयः य
था च उदुम्बरांतः कसरे भुमसकाः परस्परवार्तानभिज्ञाः एवमनंतानि ब्रह्मांडानि त्वयि संचरंती त्यर्थः १५ तस्मादेवंभूतं तव
स्वरूपं दुरवगाहमिति त्वदवतारकथामेव संतः सेवंत इत्याह यानि यानीति आमृष्टा परिमार्जिता शुचः येषां ते १६ अतः
स्वयमप्यवतारान्नमस्यति नम इति हयशीर्ष्णे हयग्रीवाय मधुकैटभयोः मृत्यवे हंत्रे १७

एवाच त्वारिंशकेनह्नतत्रजकं प्रविशन्पुरीं ततोवरानदातुष्टः स्वुत्तमोवायकस्यच १ शसंकमक्रूरमनः अमोघस्वधामसंदर्शनसत्वपा
तः स्वराजधानीमथुरामयस्यदलंकृतानंतमहोत्सवाद्यां २ भूमौविजयतिजलेवा यावत्यद्भुतानिता नितानित्वय्येवसंतितं चत्वांवि
पस्यतोमेकीमद्भुतमदृष्टं अपितुसर्वदृष्टमित्यर्थः ४ ननुमत्प्रादेः पूर्वमेवत्वंविस्मितमुखोलक्षितोसि अतोभूमौविजयतिजले
वा किमद्भुतंदृष्टंवदेतित्रत्राह यत्राद्भुतानीति यत्रत्वयीसर्वाण्यद्भुतानिसंति तंत्वामिहपस्यतोमे अन्यत्रभूम्यादौकिम

120

श्रीशुकउवाच स्तुवतस्तस्यभगवान्दर्शयित्वाजलेवपुः भूयःसमाहरत्कृष्णोनटोनाट्यमिवात्मनः १ सो
पिचांतर्हितंवीक्ष्यजलादुन्मज्यसत्वरः कृत्वाचावश्यकंसर्वंविस्मितोरथमागमत् २ तमपृच्छद्धृषीकेशःकिंते
तेदृष्टमिहाद्भुतं भूमौवियतितोयेवातथात्वांलक्षयामहे ३ अक्रूरउवाच अद्भुतानीहयावंतिभूमौविय
तिवाजले त्वयिविश्वात्मकेतानिकिंमेदृष्टंविपस्यतः ४ यत्राद्भुतानिसर्वाणिभूमौवियतिवाजलेतंत्वा
नुपस्यतोब्रह्मन्किंमेदृष्टमिहाद्भुतं ५ इत्युक्त्वाचोदयामासस्यंदनंगांदिनीसुतः मथुरामनयद्रामंकृष्णं
चैवदिनात्यये ६ मार्गेग्रामजनाराजंस्तत्रतत्रोपसंगताः वसुदेवसुतौवीक्ष्यप्रीतादृष्टिंनचाददुः ७
तावद्व्रजौकसस्तत्रनंदगोपादयोग्रतः पुरोपवनमासाद्यप्रतीक्षंतावतस्थिरे ८ तान्समेत्याहभगवा
नक्रूरंजगदीश्वरः गृहीत्वापाणिनापाणिंप्रश्रितंप्रहसन्निव ९ भवान्प्रविशताममग्रेसहयानःपु

रामः

नुतंदृष्टंत्वांविनानतत्रकिंचिदद्भुतमित्यर्थः ब्रह्मन् हेपरमेश्वरेत्यर्थः ब्रह्मेतिवापाठः ५ गांदिनीसुतोक्रूरः ६ दृष्टिंनाददुःपस्य
तएवस्थितादत्यर्थः रामकृष्णागमनंप्रतीक्षमाणाःस्थिताः प्रश्रितंविनीतं ९ स्वगृहंविशतांप्रवमुच्यउत्तीर्यविश्रामोस्त
र्थः १०

तदेवमस्वतंत्रोयः सोहंतव अंघ्रिं उपगतः शरणंप्राप्तः ननुइंद्रियपरतंत्रस्यैतदपिकुतस्त्यंतत्राह तच्चापीति हेईश अहंतवांघ्रि
उपगमनंच असतांदुरापं अतोभवतोनुग्रहएव इत्यहंमन्ये अनुग्रहेसतीतिवा ननुसतांसेवयाइदंभवति किमदनुग्रहेणेत्यतआह
पुंसइति जीवस्यसंसारस्यापवर्गः समाप्तिर्यदात्वत्कृपयाभवेत् संभावनास्पदंभवति हेअब्जनाभ तदासदुपासनासंपद्यतेततैवंह
यिमतिर्भवेत् तत्कृपांविनानसत्सेवानितरांत्वन्मतिर्नततमांमुक्तिरित्यर्थः २८ पादयोःपतन् प्रार्थयतेद्वयेननमइति विज्ञानमेवमात्रा
तिर्यस्यतस्मै अतएवसर्वप्रत्ययहेतवेसमस्तज्ञानकारणाय किंचपुरुषेशप्रधानाय पुरुषस्ययेईश्वाः सुखदुःखप्रापकाःकालकर्म

सोहंतवांघ्र्युपगतोस्म्यसतांदुरापंतच्चाप्यहंभवदनुग्रहईशमन्ये। पुंसोभवेद्यर्हिसंसरणापवर्गस्त्व
य्यब्जनाभसदुपासनयामतिःस्यात्॥२८॥ नमोविज्ञानमात्रायसर्वप्रत्ययहेतवे। पुरुषेशप्रधानायब्रह्म
णेनंतशक्तये॥२९॥ नमस्तेवासुदेवायसर्वभूतक्षयायच। हृषीकेशनमस्तुभ्यंप्रपन्नंपाहिमांप्रभोः
३० इतिश्रीभागवतेमहापुराणेदशमस्कंधेमहापुरुषस्तवोनामचत्वारिंशोध्यायः ४०

स्वभावादयस्तेषांप्रधानायनियंत्रे कुतः ब्रह्मणेपरिपूर्णाय किंच अनंताःशक्तयोयस्य यद्वा अनंतामायाख्याशक्तिर्यस्यतस्मै अथ
वाप्रधानंप्रकृतिः ततःप्रवर्तकः पुरुषःईशःकालः एतत्त्रिधात्मनेब्रह्मणेचेत्याहभगवान् प्रकृतिर्ह्यस्योपादानमाधारः पुरुषःपरोस्याभि
भिव्यंजकः कालोब्रह्मतत्त्रितयंत्वहमिति २९ सर्वप्रत्ययहेतुत्वमभिव्यंजन्स्तौति नमस्तइति वासुदेवायचित्ताधिष्ठात्रेसर्वभूतक्षया
य आश्रयः अहंकारश्चप्राणिनामाश्रयः तस्मै अहंकाराधिष्ठात्रेसंकर्षणायेत्यर्थः हृषीकेशेति बुद्धिमनसोरधिष्ठात्रोःप्रद्यु
म्नानिरुद्धयोरेकीकृत्यग्रहणंशरणागतंमांपाहीतिप्रार्थना: ३० इतिश्रीभागवतेदशमेटीकायांचत्वारिंशोध्यायः ४०॥

भा॰द॰पू॰ १५३ सौवर्णाः संघाटकाः चतुःपथाः हर्म्याणि धनिनां गृहाणि च निःकुटानि गृहोद्यानाः आरामश्रेतैः श्रेणीनां पंक्तीनां एकरूपशिल्पोपजीविनां
सभाभिः उपवेशनस्थानैः अन्यैश्च भवनैर्गृहैः उपस्कृतां अलंकृतां अश्मस्फटिकाः हरितो मरकतं वैडूर्यादि रत्नैर्जुष्टे युक्तैर्लभ्यादि यासु वि
टंकरूपविष्टैः पारावतैः बर्हिभिश्च नादितां तत्र चत्वरभ्यः गृहपुरोभागेषु वज्रकस्थानानि वेदयः वातेभीना मध्योद्देशे विरचिता वप्रभवेदि
ज्वालामुखरंध्राणि गवाक्षच्छिद्राणि कुट्टिमानि मणिवज्राश्मयस्तेर्बद्धि रथ्याराजमार्गाः आपणाः पण्यवीथयः मार्गाः अन्येच त्वराणि
अंगणानि संसिक्तानिरथ्यादीनियस्यांतां २ तथा स्थलं इत्यानि द्वाराणि येषां ते गृहाः यस्यां तामकैः आपूर्णैः कुंभैः दध्नाचंदनेनच

129

सौवर्णशृंगाटकहर्म्यनिःकुटैः श्रेणीसभाभिर्भवनैरुपस्कृतां वैडूर्यवज्रामलनीलविद्रुमैर्मुक्ताहरिद्भिर्वल
भीषुवेदिषु २१ जुष्टेषुजालामुखरंध्रकुट्टिमेष्वाविष्टपारावतबर्हिनादितां संसिक्तरथ्यापणमार्गचत्वरां
प्रकीर्णमाल्यांकुरलाजतंडुलां २२ आपूर्णकुंभैर्दधिचंदनोक्षितैः प्रसूनदीपावलिभिः सपल्लवैः सवृंद
रंभाक्रमुकैः सकेतुभिः स्वलंकृतद्वारगृहां सपट्टिकैः २३

उक्षितैः सिक्तैः प्रसूनानां दीपानां चावलयो येषु तैः वृंदैः फलगुच्छैः उपलक्षिता रंभाक्रमुकैः तत्सहितैः सकेतुभिः केतवो ध्वजास्तत्सहितैः राम॰
पट्टिका वितस्तिविस्तारपट्टवस्त्राणि तत्सहितैः तत्रैयं रीतिर्द्वारेषु उभयत्र स्तंडुलाम् उपरि कुंभाः तत्पृतः प्रसूनावलयः कंठे पट्टिकाः १५३
मुखे स्तादिपल्लवा तदुपरि मार्गांतरे दीपावलयः तासंन्निधौ रंभाक्रमुकाः केतवोस्तारणानि चेति २३

स्वग्रजः सहगोपालैरित्यर्थः १२ यच्छौचेन यस्य पादरजः क्षालनोदकेन गृहं गंगास्थितेन १३ श्लोक्यः पुण्यकीर्तिर्हि एकांतभक्तानां या गतिस्तां च लेभे
१४ अपुनन् पवित्रितवत्यः याभिरद्भिः स्वः स्वर्गं प्राप्ताः प्रार्थयमानो नमस्करोति देवदेवेति अतः परमन्य छ्रेयो नास्तीति मत्वा बहुधा संबोध

अक्रूर उवाच। नाहं भवद्भ्यां रहितः प्रवेक्ष्ये मधुरां प्रभो त्यक्तुं नार्हसि मां नाथ भक्तं ते भक्तवत्सल ११ आगच्छ या
म गेहान्नः सनाथान् कुर्वधोक्षज सहाग्रजः सगोपालैः सुहृद्भिश्च सुहृत्तम १२ पुनीहि पादरजसा गृहान्नो गृहमेधिनां
यच्छौचेनानुतृप्यंति पितरः साग्नयः सुराः १३ अवनिज्यांघ्रियुगलमासीत् श्लोक्यो बलिर्महान् ऐश्वर्यमतुलं लेभे ग
तिं चैकांतिनां तु या १४ आपस्तेंघ्र्यवनेजिन्यस्त्रींल्लोकान् शुचयोपुनन् शिरसाधत्त याः शर्वः स्वर्याताः सगरात्मजाः
१५ देवदेव जगन्नाथ पुण्यश्रवणकीर्तन यदूत्तमोत्तमश्लोक नारायण नमोस्तु ते ॥ १६ ॥ श्रीभगवानुवाच ॥ आयास्ये
भवतो गेहमहमार्यसमन्वित यदुचक्रद्रुहं हत्वा वितरिष्ये सुहृत्प्रियं १७ एवमुक्तो भगवता सोक्रूरो विमना इव पु
रीं प्रविष्टः कंसाय कर्मावेद्य गृहं ययौ १८ अथापराह्ने भगवान् कृष्णः संकर्षणान्वितः मथुरां प्राविशद्गो
पैर्दिदृक्षुः परिवारितः १९ ददर्श तां स्फाटिकतुंगगोपुरद्वारां बृहद्धेमकपाटतोरणां ताम्रारकोष्ठां परिखादु
रासदामुद्यानरम्योपवनोपशोभितां २०

तं १ यति आयास्ये तावत् यदुचक्रद्रुह्यतीति यदुचक्रध्रुक् कंसं हत्वा सुहृदां प्रियं वितरिष्ये दास्यामि १७ रामकृष्णावानीतौ इति सुकृतं कर्मावे
द्य समर्प्येति १८ गोपैः परिवारितः प्राविशत् १९ श्रीकृष्णस्तां पुरीं अनुवर्णयति चतुर्भिर्दर्शितामिति स्फाटिकानि तुंगानि गोपुराणि द्वा
राणि यस्यां तां परितः खातः गर्त्ताः ताभिः दुरासदां दुर्गमां उद्यानानि दूरस्थानानि वनानि रम्याणि उपवनानि च निकटानि वनानि तैरुपशोभि
तां २०

रजको वस्त्रनिर्णेजकः स एव वस्त्राणां रंगमपि कुर्वन् रंगकारः रुषितः कुपितः ३४ हे उद्वृत्ताः गिरौ वने चरथ ये ते नित्यं ते यूयं परिध

रजकं किंचिदायांतं रंगकारं गदाग्रजः दृष्ट्वायाचितवासांसि धौतान्युत्तमानि च ३२ देह्यावयोः समुचिता
न्यंगवासांसि चार्हतोः भविष्यति परं श्रेयो दातुस्ते नात्र संशयः ३३ स याचितो भगवता परिपूर्णेन सर्व
130 तः साक्षेपं रुषितः प्राह भृत्यो राज्ञः सुदुर्मदः ईदृशान्येव वासांसि नित्यं गिरिवनेचराः परिधत्त किमु
द्वृत्ता राजद्रव्याण्यभीप्सथ ३४ याताशु बालिशा मैवं प्रार्थ्यं यदि जिजीविषा बध्नंति घ्नंति लुंपंति दृप्तं
राजकुलानि हि ३५ एवं विकत्थमानस्य कुपितो देवकीसुतः रजकस्य कराग्रेण शिरः कायादपा
तयत् ३६ तस्यानुजीविनः सर्वे वासःकोशान् विसृज्य वै दुद्रुवुः सर्वतो मार्गं वासांसि जगृहेऽच्युतः
३७

तेति संभावनायां लोट् अभीप्सथ प्रार्थयध्वं ३५ राजकुलानि राजकीयाः लुंपंति नः स्वं कुर्वंति ३६ वासःकोशान्
वस्त्रपुटकान् ३७

नरदेववर्त्मना राजमार्गेण तां पुरीं संप्रविष्टोक्षितीयांता २४ औत्सुक्यमेवाकुह्वयेन कश्चिदिति विपर्य्ययेण विपरीतं धृतानि वस्त्राणि भूषणानि याभिस्ताः युगलेषु धार्य्येषु कुंडलकंकणादिषु एकं विस्मृत्य समीयुः कृतं यथा एकमेव पत्रं यया सोऽवर्णो यासां एकमेव नूपुरं चरणाभिरणं यासां ताश्च ताश्च नांत्का अनंत्का एकस्मिन्नेव लोचने कज्जलं निधायेव: २५ ततः भोजनं त्यक्त्वा अभ्यंज्यमानाः सखीभि

तां संप्रविष्टो वसुदेवनंदनो वृतो वयस्यैर्नरदेववर्त्मना द्रष्टुं समीयुस्त्वरिताः पुरस्त्रियो हर्म्याणि चैवारुरुहुर्नृपोत्सुकाः
२४ काश्चिद्विपर्य्यग्धृतवस्त्रभूषणा विस्मृत्य चैकं युगलेष्वथापराः कृतैकपत्रश्रवणैकनूपुरा नांक्त्वा द्वितीयं त्व
पराः स्वलोचनं २५ अश्नंत्य एकास्तदपास्य सोत्सवा अभ्यंज्यमाना अकृतोपमज्जनाः स्वपंत्य उत्थाय निशम्य निःस्व
५ नं प्रपाययंत्योऽर्भकमपोह्य मातरः २६ मनांसि तासामरविंदलोचनः प्रगल्भलीलाहसितावलोकनैः जहार मत्त
द्विरदेंद्रविक्रमो दृशां ददच्छ्रीरमणात्मनोत्सवं २७ दृष्ट्वा मुहुः श्रुतमनुद्रुतचेतसस्तं तत्प्रेक्षणोत्स्मितसुधोक्षणलब्धमानाः आनंदमूर्तिमुपगुह्य दृशात्मलब्धं हृष्यत्त्वचो जहुरनंतमरिंदमाधिं २८ प्रासाद शिखरारूढाः प्री
त्युत्फुल्लमुखांबुजाः अभ्यवर्षन् सौमनस्यैः प्रमदा बलकेशवौ २९ दध्यक्षतैः सोदपात्रैः स्रग्गंधैरभ्युपा
यनैः तावानर्चुः प्रमुदितास्तत्र तत्र द्विजातयः ३० ऊचुः पौरा अहो गोप्यस्तपः किमचरन्महत् या ह्येतावनुपश्यं
तिनरलोकमहोत्सवौ ३१

क्रियमाणतैलाभ्यंगा अकृतस्नानाः अपोह्य अनिरस्य २६ प्रगल्भा लीला याभिः हसितानि वलणानि च तैः श्रियं रमयतीति श्रीरमणः तेनात्मना वपुषा तासां दृशां उत्सवं ददन् मनांसि जहार २७ मुहुः श्रुतं वा तद्द्रुतचेतसः सत्यः तं दृष्ट्वा तस्य प्रेक्षणं च उत्स्मितं च तदेव सुधा तया उक्षणं सेच नं सेवनं तेन लब्धो मानो याभिस्ताः दृशा उपादितेन नेत्रद्वारेण आत्मनि प्रसिलब्धं प्राप्तं परिष्वज्य तद्दर्शनजनितमनंतमाधिं जहुः हे अरिंदम निर्जितकामेति संबोधनं शृंगाररसे निमग्नोऽभूदिति २८ सौमनस्यैः शोभनकुसुमस्रग्भिः सौमनमनोभाविर्वा २९ पौराः

कृष्णक्रियः ५० ३१

अन्वयवर्द्धिनीं वंशेवृद्धिमतीमित्यर्थः अप्रार्थितं श्रीप्रभृतिकं च दत्वान् ततो निर्जगामेति स्वैरं चरन् मधुपुरे रजकं निहत्यवस्त्रैः सुदामाय च वरान् यच्चवा
यकस्य मालाहर्तं सम्यनुकंप्यचकार कुब्जामृज्वीं धनुष्य सहसानमयन् बभंज १ इति श्रीभागवते दशमस्कंधे टीकायां एकचत्वारिंशोध्यायः
द्विचत्वारिंशके कुब्जो जमनं धनुषो भिदा वधस्तद्रक्षिणां कंसरिपोरंगोत्सवादि च १ अंगविलेपाद्यैर्नादयः गृहीताम्यंगविलेपभाजं

(3) इति तस्मैव रं दत्वा श्रियं चान्वयवर्द्धिनीं बलमायुर्यशः कांतिं निर्जगाम सहाग्रजः ४२ इति श्रीभागवते महापु
राणे दशमस्कंधे पुरप्रवेशो नामैकचत्वारिंशोध्यायः ४१ बादरायणिरुवाच अथ व्रजन् राजपथेन माधवः
स्त्रियं गृहीतांगविलेपभाजनां विलोक्य कुब्जां युवतीं वराननां पप्रच्छ यांतीं प्रहसन् रसप्रदः १ का त्वं वरोर्वेतद
हानुलेपनं कस्यांगने वा कथयस्व साधु नः देह्यावयोरंगविलेपमुत्तमं श्रेयस्ततस्ते न चिराद्भविष्यति २
सैरंध्र्युवाच दास्यस्म्यहं सुंदर कंससंमता त्रिवक्रनामा ह्यनुलेपकर्मणि मद्भावितं भोजपतेरतिप्रियं वि
ना युवां कोन्यतमस्तदर्हति ३ रूपपेशलमाधुर्यहसितालापवीक्षितैः धर्षितात्माददौ सांद्रमुभयोरनुलेपनं ४

नानिपयां तांरसप्रदः १ हे अंगने हे वरोरु इति सोपहासं संबोधयं पप्रच्छति त्वं का एतत् दनुलेपनं कस्य वा उह इति निपातो भूविदे यमुत्के रामः
वितर्के अस्मत्सेवा सद्यः फलेत्याह न चिरादिति तिसृः ग्रीवोरःकट्यो वक्रा इति त्रिविक्रेति नाम यस्याः सा अनुलेपसाधनक्रियायां कंस १४५
स्य बहुमता दास्यस्मि ३ रूपं च अंगसौष्ठुमाधुर्यं च रसिकता हसितं च आलापाश्च वीक्षितं च तैः धर्षितात्मा मोहितचित्ता ४ रामकृष्णस

वायकः तंतुवायविशेषः एयः अलंकारं चैलैयैः वस्त्रमयैः आकल्पैर्भूषणैः ४० पर्वणि उत्सवे ४१ इह लोके परमां श्रियं च
बलं च ऐश्वर्यं च स्मृतिं च इंद्रियं च तस्मै प्रादात् क्षेमाय अभयाय भवाय उद्भवाय ४५ रजकवधेन वायुकानुग्रहेण पु

वसित्वात्मप्रिये वस्त्रे कृष्णः संकर्षणस्तथा शेषाण्यादत्त गोपेभ्यो विसृज्य भुवि कानिचित् ३९ ततस्तु वाय
कः प्रीतस्तयोर्वेषमकल्पयत् विचित्रवर्णैश्चैलेयैराकल्पैरनुरूपतः ४० नानालक्षणवेषाभ्यां कृष्णरामौ
विरेजतुः स्वलंकृतौ बालगजौ पर्वणीव सितेतरौ ४१ तस्य प्रसन्नो भगवान् प्रादात्सारूप्यमात्मनः श्रि
यं च परमां लोके बलैश्वर्यस्मृतीन्द्रियं ४२ ततः सुदाम्नो भवनं मालाकारस्य जग्मतुः तौ दृष्ट्वा स समुत्थाय
ननाम सिरसा भुवि ४३ तयोरासनमानीय पाद्यं चार्घ्यार्हणादिभिः पूजां सानुगयोश्चक्रे स्रक्ताम्बूलानुले
पनैः ४४ प्राह नः सार्थकं जन्म पावितं च कुलं प्रभो पितृदेवर्षयो मह्यं तुष्टा ह्यागमनेन वां ४५ भवंतौ कि
ल विश्वस्य जगतः कारणं परं अवतीर्णाविहांसेन क्षेमाय च भवाय च ४६ न हि वां विषमा दृष्टिः सुहृदोर्ज
गदात्मनोः समयोः सर्वभूतेषु भजंतं भजतोरपि ४७ तावाज्ञापयतं भृत्यं किमहं करवाणि वां पुंसोत्यनुग्रहो
ह्येष भवद्भिर्यन्नियुज्यते ४८ इत्यभिप्रेत्य राजेंद्र सुदामा प्रीतमानसः शस्तैः सुगंधैः कुसुमैर्माला विरचिता
ददौ ४९ ताभिः स्वलंकृतौ प्रीतौ कृष्णरामौ सहानुगौ प्रणताय प्रपन्नाय ददतुर्वरदौ वरान् ५० सोपि
वव्रेचलां भक्तिं तस्मिन्नेवाखिलात्मनि तद्भक्तेषु च सौहार्दं भूतेषु च दयां परां ५१

वयोर्विषमदृष्टितया अनीश्वरता नाशंकनीयेत्याह न हि वामिति अत्र हेतुः समयोरिति अत्रापि हेतुद्वयं सुहृदोरिति जगदात्मनो
रिति वा ४७ इत्यभिप्रेत्य इत्येवं चिज्ञापयत् अभिप्रेत्य तन्मतं ज्ञात्वा ४८ ५१

धनुर्मखशालांपृछन् १५ प्रसह्यबलात् १६ निमेषेणअतिशीघ्रं मदकरीमत्तहस्ती १७ गृह्यतांवध्यतामितिवदंतोचिद्रुतवः आवृतवंतः १९ नवोबलंकुर्मोकिंतुभग्नस्यधनुषः शकलेगृहीत्वाजघ्नतुश्चेतु २० परतःप्रातर्गंतव्यमितिशालामुखादेवपुनर्निष्क्रम्य २१ तेजःप्रभावे प्रागल्भ्यधृष्टतां २२ शकटंशाकटयवमोचनस्थानं २३ विगमेव्रजान्निर्गमनसमयेया आशिषः आशासततसु खंप्रभातारज

ततःपौरान्पृछमानोधनुषःस्थानमच्युतः तस्मिन्प्रविष्टोददृशेधनुरैंद्रमिवाद्भुतं १५ पुरुषैर्बहुभिर्गुप्तमर्चितं परमर्द्धिमत्
वार्यमाणःनृभिःकृष्णःप्रसह्यधनुराददे १६ करेणवामेनसलीलयामुद्धृतंसज्यंचकृत्वानिमिषेणपश्यतां नृणांविकृष्य
प्रबभंजमध्यतोयथेक्षुदंडंमदकार्युरुक्रमः १७ धनुषोभज्यमानस्यशब्दःखंरोदसीदिशः पूरयामासयंश्रुत्वाकंसस्त्रा
समुपागमत् १८ तद्रक्षिणःसानुचराःकुपिताआततायिनः गृहीतुंकामाःआवव्रुर्गृह्यतांवध्यतामिति १९ अथतान्
दुरभिप्रायान्विलोक्यबलकेशवौ क्रुद्धौधन्वनआदायशकलेतांश्चजघ्नतुः २० बलंचकंसप्रहितंहत्वाशालामु
खात्ततः निःक्रम्यचेरतुःहृष्टौनिरीक्ष्यपुरसंपदः २१ तयोस्तदद्भुतंवीर्यंनिशाम्यपुरवासिनः तेजःप्रागल्भ्यंरूपंच
मेनिरेविबुधोत्तमौ २२ तयोर्विचरतोःस्वैरमादित्योस्तमुपेयिवान् कृष्णरामौवृतौगोपैःपुराछकटमीयतुः २३
गोप्योमुकुंदविगमेविरहातुराया आशासताशिषऋता मधुपुर्यभुवन् संपश्यतांपुरुषभूषणगात्रलक्ष्मीं हित्वे
तरान्नुभजतश्चकमेयनंश्रीः २४

नीयं अद्यध्रुवंतत्रदृशोभविष्यते इत्यादि यदुक्तवन्त्यः ताःस्ताःसत्याबभूवुः पुरुषभूषणस्यश्रीकृष्णस्यगात्रस्यदेहस्यलक्ष्मीं
शोभांकथंभूतस्यगात्रस्यनु अहो इतरान् ब्रह्मादीन्हित्वायदयनंआश्रयंश्रीःकामयामासयांगात्रलक्ष्मीतिवा २४

132

स्ववर्णेतरशोभिना रामकृष्णयोर्वर्णाभ्यामितरः पीतादिवर्णैः शोभितुं शीलं यस्य तेन संप्राप्तपरभागेन संप्राप्तः परेणाभेरूपरितनो भागो येन सः संप्राप्तपरभागः शोभातिशयो येनेति वा तेनानुरंजितौ ५ स्वदर्शने सद्यः फलं दर्शयन् तस्याः प्रपदे पादाग्रद्वयं पद्भ्यामापीड्य द्वे अंगुल्यौ उत्ताने उन्नते यस्मिन्पाणौ तेन चिबुके मुखस्याधोभागे धृत्वा ऽध्यात्मं देहं उन्नमयामास ७ तदेवर्जुसमानमंगं य

ततस्तावंगरागेण स्ववर्णेतरशोभिना संप्राप्तपरभागेन शुशुभातेनुरंजितौ ५ प्रसन्नो भगवान्कुब्जां त्रिवक्रां रुचिराननां ऋज्वीं कर्तुं मनश्चक्रे दर्शयन्दर्शने फलं ६ पद्भ्यामाक्रम्य प्रपदे द्व्यंगुल्योत्तानपाणिना प्रगृह्य चिबुकेऽध्यात्ममुदनीनमदच्युतः ७ सा तदर्जुसमानांगी बृहच्छ्रोणिपयोधरा मुकुंदस्पर्शनात्सद्यो बभूव प्रमदोत्तमा ८ ततो रूपगुणौदार्यसंपन्ना प्राह केशवं उत्तरीयांतमाकृष्य स्मयंती जातहृच्छया ९ एहि वीर गृहं यामो न त्वां त्यक्तुमिहोत्सहे त्वयोन्मथितचित्तायाः प्रसीद पुरुषर्षभ १० एवं स्त्रिया याच्यमानः कृष्णो रामस्य पश्यतः मुखं वीक्ष्यानु गोपानां प्रहसंस्तामुवाच ह ११ एष्यामि ते गृहं सुभ्रु पुंसामाधिविकर्षणं साधितार्थोऽगृहाणां नः पांथानां त्वं परायणं १२ विसृज्य माध्व्या वाण्या तां व्रजन्मार्गे वणिक्पथैः नानोपायनतांबूलस्रग्गंधैः साग्रजोऽर्चितः १३ तद्दर्शनस्मरक्षोभादात्मानं नाविदंस्त्रियः विस्रस्तवासःकवरवलया लेख्यमूर्तयः ॥ १४ ॥ ॥ ॥ ॥ ॥

यस्याः बृहच्छ्रोणी पयोधरौ च यस्याः सा मुकुंदस्पर्शनादिति मुख्यं कारणं ८ आधिविकर्षणं मनःपीडाशमनं कंसवधेन साधितः सुहृत्प्रयोजनं येन सः अगृहाणामकृतगृहाणां पां थानां प्रवासिनां परं अयनं आश्रयस्त्वं १२ मधुरया गिरा तां प्रस्थाप्य व्रजन् वणिग्भिरर्चितः १३ लेख्याश्चित्रन्यस्ताः स्वमूर्तयो यासां ताः १४ ऽऽ

भा०द०पू० कष्टेनकथंचित् प्रभातायां पुनः स्तूर्यौघ डंभः समुत्थित इति तथा चक्षतिश्रिः उदगान्महलोरीणादिभ्राजमानः सलिलस्य मध्यात् सभाद्र
१४१ सभोलोहिताद्रेः सूर्योवियद्भिर्मनसा पुनस्त्विति यथोपजोषं यथासुखं ३२ मल्लतालउत्तरउपरिउद्धेषु क्षपते ये षु तेषु तूर्येषु उ
पाध्यायाः मल्लाचार्याः उपस्थानं मल्लरंगं ३६ समाहुताः समाहूता निवेदितान्युपायनानि यैस्ते ३८ इतिदशमे द्विचत्वारिंशः ४२

वुष्टायांनिशिकौरव्य तूर्यघोषसमुत्थिते कारयामासवैकंसो मल्लक्रीडामहोत्सवं ३२ आनर्चुः पुरुषारंगं
तूर्यभेर्यश्चजघ्निरे मंचाश्चालंकृताः स्रग्भिः पताकाचैलतोरणैः ३३ तेषुपौराजानपदाब्रह्मक्षत्रपुरो
गमाः यथोपजोषं विविशूराजानश्चकृतासनाः ३४ कंसः परिवृतोमात्यैः राजमंचउपाविशत्
मंडलेश्वरमध्यस्थो हृदयेन विदूयता ३५ वाद्यमानेषु तूर्येषु मल्लतालोत्तरेषु च मल्लाः स्वलंकृताः
दृप्ताः सोपाध्यायाः समासत ३६ चाणूरो मुष्टिकः कूटः शलस्तोशल एव च तआसेदुरुपस्थानं वल्गु
वाद्यप्र हर्षिताः ३७ नंदगोपादयोगोपाः भोजराजसमाहूताः निवेदितोपायनास्तएकस्मिन्मंचआविशन् ला २
३८ इतिश्रीभागवते महापुराणे दशमस्कंधे मल्लरंगोपवर्णनेनाम द्विचत्वारिंशोध्यायः ४२ श्रीशुकउवा
च अथकृष्णश्चरामश्च कृतशौचौपरंतप मल्लदुंदुभिनिर्घोषं श्रुत्वाद्रष्टुमुपेयतुः १

त्रिचत्वारिंशके हत्वा गजेंद्रं रामकृष्णयोः रंगप्रवेशस्तो भागमं चाणूरेणाच भाषितं पूर्वेद्युरेवकृतं शौचं शुद्धत्वं निरपराधत्वं याभ्यां तौ रामः
एतदुक्तं भवति धनुर्भंगादिना आवाभ्यां निजैश्वर्यं सूचितेपि पितरौ नमुंचति आवांच पुनः जिघांसति अतोस्य मातुलस्या १४१
पि वधेनावयोर्दोष इत्येवं हता पराध परिहारद्योति मल्लानां दुंदुभीनांच निर्घोषं मल्लतालदुंदुभिनिर्घोषं वा १

133

अवनिज्यं क्षालितमंघ्रियुगलं ययोस्तौ क्षीरमिश्रं अन्नं भुक्त्वा सुखं न्यवसतां २५ परं केवलं गोविंदरामयोर्विक्रीडितं तत् ननु पराक्रमः कश्चित् २६ उभयथा स्वप्नजागरितभेदेन प्रत्येकं मृत्योर्दौत्यकराणि च तथा च मंत्ररक्षा उद्धूकाश्चापद्मस्किरस्याल्लोयोमुखः रक्तसंदृत्त आगत इत्यादि तथा यदेतद्रताव्यहाविश्य दैवीवाचं वदसीत्यादि च २७ तानि दर्शयति स्वस्येति केवलं येन जलादौ प्रतिरूपे दृश्यमानेपि स्वशिरसस्तत्रादर्शनं असत्यपि द्वितीये च सत्यपि तद्दर्शने गुल्यादौ ज्योतिषां च

अवनिज्यांघ्रियुगलौ भुक्त्वा क्षीरोपसेचनं ऊषतुस्तां सुखं रात्रिं ज्ञात्वा कंसचिकीर्षितं २५ कंसस्तु धनुषो भंगं रक्षिणां स्वबलस्य च वधं निशम्य गोविंदरामस्य क्रीडितं परं २६ दीर्घप्रजागरो भीतो दुर्निमित्तानि दुर्मतिः बहून्याचष्टोभयथा मृत्योर्दौत्यकराणि च २७ अदर्शनं स्वशिरसः प्रतिरूपे च सत्यपि द्वितीये च द्वैरूप्यं ज्योतिषां तथा २८ छिद्रप्रतीतिश्छायायां प्राणघोषानुपश्रुतिः स्वर्णप्रतीतिर्वृक्षेषु स्वपदानाम दर्शनं २९ स्वप्ने प्रेतपरिष्वंगः खरयानं विषादनं यायान्नलदमाल्येकस्तैलाभ्यक्तो दिगंबरः ३० अन्यानि चेत्थंभूतानि स्वप्नजागरितानि च पश्यन्मरणसंत्रस्तो निद्रां लेभे न चिंतया ३१ अप्रमत्तापि

नादीनां द्वित्वं २८ छायायां प्रतिबिंबे छिद्रे प्रतीतिः पिहितकर्णपुटस्यापि अंतः प्राणघोषध्वनिः स प्राणघोषस्तस्य अश्रवणं वृक्षेषु स्वर्णवर्णप्रतीतिः प्रेतैः मृतैः रजकर्दमादिषु स्वपदानामदर्शनं २९ एतानि जागरितानि दुर्निमित्तानि स्वप्नान्याह स्वप्न इति प्रेतैः मृतैः सह परिष्वंगः खरमारुह्य पानं विषभक्षणं नलदमाली जपाकुसुममाली यायादिति यत् तदप्येकं दुर्निमित्तमिति ३१

किंच सधावन्निति अहनत् अहन् ११ रंगं समाविशत् तत्र वीरश्रियाबभौ कथंभूतः अंसे न्यस्तं विषाणं गजदंतो येन सः असृजो रक्तस्य
मदस्य च बिंदुभिः परितोंऽकितः १५ विरूढा उत्पन्ना स्वेदकणिकास्ताभिरुपलक्षितं वदनांबुरुहं यस्य सः न केवलं स एक समाविशत्
किंतु वृतो गोपैरिति १६ तत्र च शृंगारादि सर्वरसकदंबमूर्तिर्भगवान् सत्र द्रष्टृभिस्तत्तदभिप्रायानुसारेण बभौ न साकल्येन सर्वैरित्याह
मल्लानामिति मल्लादीनां दशानां दृष्टीनां असम्यगादिरूपेण दशधा विदितः सन् साग्रजो रंगं गतः इत्यन्वयः मल्लादिष्वभि

134

सधावन्क्रीडया भूमौ पतित्वा सहसोत्थितः तं मत्वा पतितं क्रुद्धो दंताभ्यां सोऽहनत्क्षितिं ११ स्वविक्रमे प्रति
हते कुंजरेंद्रोत्यमर्षितः चोद्यमानो महामात्रैः कृष्णमभ्यद्रवद्रुषा १२ तमापतंतमासाद्य भगवान्मधु
सूदनः निगृह्य पाणिना हस्तं पातयामास भूतले १३ पतितस्य पदाक्रम्य मृगेंद्र इव लीलया दंतमु
त्पाट्य तेनेभं हस्तिपांश्चाहनद्धरिः १४ मृतकं द्विपमुत्सृज्य दंतपाणिः समाविशत् अंसन्यस्तविषाणो
ऽसृङ्मदबिंदुभिरंकितः १५ विरूढस्वेदकणिकावदनांबुरुहो बभौ वृतो गोपैः कतिपयैर्बलदेवज
नार्दनौ १६ रंगं विविशतू राजन् गजदंतवरायुधौ मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मू
र्तिमान् गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं प
रं योगिनां वृष्णीनां परदेवतेति विदितो रंगं गतः साग्रजः १७

व्यक्ता रसाः क्रमेण श्लोकेन बुध्यंते रौद्रोऽद्भुतश्च शृंगारो हास्यं वीरो दया तथा भयानकश्च बीभत्सः शांतः सप्रेमभक्तिकः अवि
दुषां विराट् विकलः अपर्याप्तो राजन् इति तथा अनेन बीभत्सो उक्तः विकलत्वं च कवज्रसारसर्वांगाविसादिना वक्ष्यते

१७

अंबष्ठो हस्तिपस्तेन चोदितं २ परिकरं युद्धोचितपरिधानं कृत्वा समृद्धनिबध्य ३ ४ अंतको मृत्युः कालस्तन्निमित्तं यमस्तन्नियंता तैरुपमा य
स्य तं ५ विगलितो विच्युतः मुष्टिना निहत्या लीयत अदृश्यो बभूव ६ अचक्षाणा अपश्यन् घ्राणमेव घ्राणं तेन मुष्टिदर्शनं यस्य सः लो
चनागोचरमपि हि पशवो घ्राणेन जानंतीति इति प्रसिद्धं पराभृश्यात् धृतवान् पुष्करेणाग्रं उग्रेण स हृष्टमः प्रसह्य हनात् बलेन ७ धनुषः
धनुषां पंचविंशतिर्यावत् तावंतं देशं गजं विचकर्ष आकृष्य नीतवान् कंकइवाविचकर्ष यथा गं सर्प्यं वर्त्तमानं गजं सुपर्णं इव स्वय

रं गधारं समासाद्य तस्मिन्नागमवस्थितं १ अपस्यत् कुवलयापीडं अंबष्ठप्रचोदितं २ बध्वा परिकरं शौरिः
समृद्धकुटिलालकान् उवाच हस्तिपं वाचा मेघनाद गंभीरया ३ अंबष्ठांबष्ठ मार्गं नो देह्यपक्रम माचिरं
नो चेत्सकुंजरं त्वाद्य नयामि यमसादनं ४ एवं निर्भर्त्सितो ऽबष्ठः कुपितः कोपितं गजं चोदयामास कृष्णाय
कालांतकयमोपमं करीन्द्रस्तमभिद्रुत्य करेण तरसाग्रहीत् कराद्विगलितः सो ऽमुं निहत्यांघ्रिष्वलीयत ६ सं
क्रुद्धस्तमचक्षाणो घ्राणदृष्टिः स केशवं परामृशत्पुष्करेण स प्रसह्य विनिर्गतः ७ पुच्छे प्रगृह्यातिबलं
धनुषः पंचविंशतिः विचकर्ष यथा नागं सुपर्ण इव लीलया ८ स पर्य्यावर्त्तमानेन सव्यदक्षिणतो ऽच्युतः
बभ्राम भ्राम्यमाणेन गोवत्सेनेव बालकः ९ ततो ऽभिमुखमभ्येत्य पाणिनाहत्य वारणं प्राद्रवत्पातयामास
स्पृश्यमानः पदे पदे १०

मिति आविशासीत् यथा ग्राचांदिशं दृष्टिविष्णुस्कल इतिवत् ८ स पर्य्यावर्त्तमानेनेति पुच्छग्राहिणं कृष्णं गृहीतुं यदि दक्षिणतः परि वर्त्त
ते गजस्तर्हि सव्यतो भ्रामयति यदा सव्यतः परिवर्त्तते तदा दक्षिणतो भ्रामयं तेन सह बभ्राम गोवत्सेन भ्राम्यमानेन बालकः स एव कृ
ष्णः यथा ऽन्योपि बालक इवेति ९ वारणं गजं प्राद्रवत् प्रकर्षेण समंततो धावन् पातयामास यथा तथा तं वंचयन् प्राद्रवन्नित्यर्थः १०

भा० द० पू० अनेन परिरक्षितो यदोर्वंशः सुबहुविस्फुतः श्रियं यशो महत्त्वं च लप्स्यतीति वदंती २८ धेनुकबकवत्सासुरेषु विपर्ययोक्तिः
१४८ उनवादेश्च निरासार्थात् ३० जनेष्वेवं ब्रुवाणेषु तदसहमानश्चाणूरो ब्रवीदिति ३१ हे इत्यादि प्रियं करवामेति राज्ञि प्रीतेः

वदंत्यनेन वंशोऽयं यदोः सुबहुविस्फुतः श्रियं यशो महत्त्वं च लप्स्यते परिरक्षितः २९ अयं चास्याग्रजः श्रीमान्रा
मः कमललोचनः प्रलंबो निहतो येन वत्सको ये बकादयः ३० जनेष्वेवं ब्रुवाणेषु तूर्येषु निनदत्सु च कृष्णरा
मौ समाभाष्य चाणूरो वाक्यमब्रवीत् ३१ हे नंदसूनो हे राम भवंतौ वीर्यसंमतौ नियुद्धे कुशलौ श्रुत्वा
राज्ञाहूतौ दिदृक्षुणा ३२ प्रियं राज्ञः प्रकुर्वंत्यः श्रेयो विंदंति वै प्रजाः मनसा कर्मणा वाचा विपरीतमतोऽन्य
था ३३ नित्यं प्रमुदिता गोपा वत्सपालाः यथास्फुटं वनेषु मल्लयुद्धेन क्रीडंतश्चारयंति गाः ३४ तस्माद्रा
ज्ञः प्रियं यूयं वयं च करवामहे भूतानि नः प्रसीदंति सर्वभूतमयो नृपः ३५ तन्निशम्याब्रवीत्कृष्णो देशकालो
चितं वचः नियुद्धमात्मनोऽभीष्टं मन्यमानोऽभिनंद्य च ३६ श्रीभगवानुवाच प्रजा भोजपतेरस्य वयं चापि वने
चराः करवामः प्रियं नित्यं तन्नः परमनुग्रहः ३७ बालाः वयं तुल्यबलैः क्रीडिष्यामो यथोचितं भवेन्नियुद्धं मा
धर्मः स्पृशेन्मल्लसभासदः ३८ चाणूर उवाच न बालो न किशोरस्त्वं बलश्च बलिनां वरः लीलयेभो हतो येन स
हस्रद्विपसत्वभृत् ३९ तस्माद्भवद्भ्यां बलिभिर्योद्धव्यं नानयोऽत्र वै मयि विक्रम वार्ष्णेय बलेन सह मुष्टिकः ४० इति

तान्नि च प्रसीदेयुः ३२। ३३ ३३ ३५ ३६ यथोचितं नियुद्धं बाहुयुद्धं भवेत् मल्लसभाधिकृतान् अधर्मो मास्पृशेदित्यर्थः हे यशोति
वा ३७ ३८ सहस्रद्विपानां सत्वं बलं बिभर्तीति तथा बलिभिर्मल्लैर्द्वाभ्यां सह अनयोऽन्यायो धर्मविक्रमं पराक्रमं कुरु चाणूरमुष्टिकौ विक्रमत्ता

भागवते दशमे त्रिचत्वारिंशः ४३

टि० ४० इति दशमे त्रिचत्वारिंशः ४३ १४८

उद्विविजे भीतो बभूव १८ यथा नटावित्ति निर्भयत्वं दर्शितं १९ प्रहर्षवेगेनोत्कलितानि उज्जृम्भितानि ईक्षणानि आननानि च येषां ते तयो राननं पपुः परं न तृप्ता निराकांक्षा नबभूवुरित्यर्थः २० तदेवाह पिबंत इवेति श्लिष्यंतः परिष्वंगं कुर्वंत इव लालिता इत्यर्थः यथा

घ्नतं कुवलयापीडं हत्वा तावपि दुर्जयौ कंसो मनस्यपि तदा भृशमुद्विविजे नृप १८ तौ रेजतू रंगगतौ महाभुजौ विचित्रवेषाभरणस्रगंबरौ यथा नटावुत्तमवेषधारिणौ मनः क्षिपंतौ प्रभया निरीक्षतां १९ निरीक्ष्य तावुत्तमपूरुषौ जना मंचस्थिता नागरराष्ट्रका नृप प्रहर्षवेगोत्कलितेक्षणाननाः पपुर्न तृप्ता नयनैस्तदाननं २० पिबंत इव चक्षुर्भ्यां लिहंत इव जिह्वया जिघ्रंत इव नासाभ्यां श्लिष्यंत इव बाहुभिः २१ ऊचुः परस्परं ते वै यथादृष्टं यथाश्रुतं तद्रूपगुणमाधुर्य्यप्रागल्भस्मारिता इव २२ एतौ भगवतः साक्षाद्धरेर्नारायणस्य हि अवतीर्णाविहांशेन वसुदेवस्य वेश्मनि ॥२३॥ एष वै किल देवक्यां जातो नीतश्च गोकुलं कालमेतं वसन्गूढो ववृधे नंदवेश्मनि पूतनानेन नीतांतं चक्रवातश्च दानवः अर्जुनौ धेनुकः केशी गुह्यकोन्ये च तद्विधाः २५ गावः सपाला एतेन दावाग्नेः परिमोचिताः कालियो दमितः सर्प्प इंद्रश्च विमदः कृतः २६ सप्ताहमेकहस्तेन धृतोद्रिप्रवरोमुना वर्षवाताशनिभ्य श्च परित्रातं च गोकुलं २७ गोप्योस्य नित्यमुदितहसितप्रेक्षणं मुखं पश्यंत्यो विविधांस्तापांस्तरंति स्माश्रमं मुदा

दृष्टं धनुर्भंगादि यथाश्रुतं गोवर्द्धनोद्धारणादि तद्वत्तदनंतेकथ्यतदनुरूपमित्यर्थः श्रुतत्वं च तयोः रूपं गजहननादियुक्तं गुणाः सौर्य्यादयः माधुर्यं हसितालापादि प्रागल्भ्यं यथा कृपं तैः स्मारिताः इव स्मरणं प्रापिता इव २२ विस्मितानां वचनान्याह त्रयोदशभिः एतावित्यादिभिः २३ किलेति सर्वज्ञान्वयः २४ गुह्यकः शंखचूडः अन्ये च अघासुरादयः २५ २६ २७ श्राम्यमभीष्टकृपमयुक्तं मुखं मुखं श्रमं मुखमि तिवा यथा श्रमं यथा भवति तथा तरंति स्मेति २८

बलाबलमुक्तंतांग्रयं वयंतिपंचभिः क्वेतिवज्रसारापिवतकठिनानिसर्वाराणंगानियस्य ८ समाजस्यसभायाः ९ अपराऊचुः नसभामिति अब्रुवन्ज्ञात्वापितूष्णींतिष्ठन् विपरीतंब्रुवन् अतःमाज्ञःसभांनप्रविशेदिति १० बलातःशत्रुमभितइति शत्रोर्भये योधावतः इसस्य स्यश्रमवारिणाउक्षव्याप्तंवदनांबुजंदृश्यतां ११ अन्याऊचुः किंनपश्यतेति सामर्षसक्रोधंहासेनसंरंभः अविशस्तेन शोभितं १२ अन्याऊचुः पुण्यावतेति नरलिंगेन मनुष्यदेहेनगूढः वनस्यानिचित्राणिमाल्यानियस्यसः गिरित्रः शिवः रमाचताभ्यांमर्चितावंघ्रीय

136

क्व वज्रसारसर्वांगौ मल्लौ शैलेंद्रसन्निभौ क्व चातिसुकुमारांगौ किशोरौ नाप्तयौवनौ ८ धर्मव्यतिक्रमो ह्यस्य समाजस्य ध्रुवं भवेत् यत्राधर्मः समुत्तिष्ठेन्न स्थेयं तत्र कर्हिचित् ९ न सभां प्रविशेत्प्राज्ञः सभ्यदोषाननुस्मरन् अब्रुवन्विब्रुवन्नज्ञो नरः किल्बिषमश्नुते १० वल्गतः शत्रुमभितः कृष्णस्य वदनाम्बुजं वीक्ष्यतां श्रमवार्युप्तं पद्मकोशमिवाम्बुभिः ११ किं न पश्यत रामस्य मुखमाताम्रलोचनं मुष्टिकं प्रति सामर्षं हाससंरंभशोभितं १२ पुण्या बत व्रजभुवो यदयं नृलिंगः गूढः पुराणपुरुषो वनचित्रमाल्यः गाः पालयन्सहबलः क्वणयंश्च वेणुं विक्रीडयाञ्चति गिरित्ररमार्चितांघ्रिः १३ गोप्यस्तपः किमचरन्यदमुष्य रूपं लावण्यसारमसमोर्ध्वमनन्यसिद्धं दृग्भिः पिबन्त्यनुसवाभिनवं दुरापमेकान्तधाम यशसः श्रिय ऐश्वरस्य १४

स्यसः अयंभावः धिगिमांसभां यस्यामयंपराभूयते तास्तुव्रजभुवोधन्याः यतायासु अयंकृष्णोविविधक्रीडयांचतिगच्छतीति अहोकष्टमस्मत्पुण्यं यतोस्माभिरनवसरेदृष्टोयं १३ गोप्यस्तुवहुपुण्याइत्याहुस्त्रिभिःगोप्यइति अमुष्यकृष्णस्यरूपं अंगंलावण्येनसारंश्रेष्ठंचिंच असमो र्ध्वंनविद्यतेसमं ऊर्ध्वमधिकंचयस्यतत् तदपिनअन्येन आभरणादिनासिद्धं किंतुस्वतएव ऐश्वरस्य एकांतधाम अतोश्वरस्यच अथाभिचा

नित्यानंदधामांतरे अप्रसिद्धस्य ऐश्वर्यस्य एकांतं स्थानमिति स्वतंत्रोमं स्यात्
श्रियः इति १४

चतुश्चत्वारिंशके तु मल्लकंसादिमर्द्दनं कंसयोषित्समाश्वासस्ताभ्यां पित्रोश्च दर्शनं १ चर्चितः निश्चितः स्वसंकल्प एव यस्य सः २ बा
हुमध्यात् कनिष्ठांगुलीव्यतीरेकेण हतमुष्टिर्हस्तोऽरत्निः ३ परिभ्रामणं हस्तादिषु ग्रहीत्वा परितश्चालनं विक्षेपो नोदनं परिरंभो बा
नि: हुभ्यां पीडनं अवपातनं अधःक्षेपः उत्सर्पणं उल्लङ्घ्य पुरतो गमनं एतैरन्योन्यं प्रत्यरुंधतां ईसा कृतवंतौ ४ उत्थापनं पादौ जानुनी च पिंडी

श्रीशुक उवाच एवं चर्चितसंकल्पो भगवान्मधुसूदनः आससादाथ चाणूरं मुष्टिकं रोहिणीसुतः १ हस्ताभ्यां
हस्तयोर्बध्वा पद्भ्यामेव च पादयोः विचकर्षतुरन्योन्यं प्रसह्य विजिगीषया २ अरत्नी द्वे अरत्निभ्यां जानुभ्यां जानुभ्यां
चैव जानुनी शिरः शीर्ष्णोरसोरस्तावन्योन्यमभिजघ्नतुः ३ परिभ्रामणविक्षेपपरिरंभावपातनैः उत्सर्पणाप
सर्पणैश्चान्योन्यं प्रत्यरुंधतां ४ उत्थापनैरुन्नयनैश्चालनैः स्थापनैरपि परस्परं जिगीषंतावपचक्रतुरात्म
नः ५ तद्बलाबलवद्युद्धं समेताः सर्वयोषितः ऊचुः परस्परं राजन् सानुकंपा वरूथशः ६ महानयं बताध
र्मः एषां राजसभासदां ये बालबलवद्युद्धं राज्ञोन्विच्छंति पश्यतः ७

हत्य पतितस्योच्चाटनं उन्नयनं हस्ताभ्युद्धृत्य नयनं चालनं कंठादिलग्नस्य निःसारणं स्थापनं पादादि पिंडीकरणं एवं परस्परं आ
त्मनो देहस्यापचक्रतुः अपकारं कृतवंतौ ५ तद्युद्धं बलाबलवत् एकतो बलमन्यतोऽबलं तद्युद्धं विषममित्यूचुरित्यर्थः यद्वा तद्ब
लाबलवतोः युद्धं दृष्ट्वा महानयमधर्म इत्यूचुरित्यन्वयः तदेव दर्शयति महानिति बालयो बलवतोश्च युद्धं राजा चेत्सभ्यैस्त्वयं वारणीयः
एते तु राज्ञः पश्यतः स्वयमप्यान्विच्छंति अनुमन्यंते इति महानधर्म इत्यर्थः ७

भा०द०पू० १५१

भूपृष्ठे भुवउपरि पोथयामास ... आस्फालयत् २३ इंद्रध्वजोनाम गौडेषु प्रसिद्धः कस्मिंश्चि दुत्सवे महांस्तंभो ध्वजपताका धलंकृ

वाहोर्निगृह्य चाणूरं बहुशो भ्रामयन्हरिः भूपृष्ठे पोथयामास तरसा क्षीणजीवितं २३ विस्रस्ताकल्पकेशस्रगिंद्रध्वज इवपतत् तथैव मुष्टिकः पूर्वं स्वमुष्ट्याभिहितेन वै २४ बलभद्रेण बलिना तलेनाभिहतो भृशं प्रवेपितः सरुधिरमुद्वमन्मुखतोर्दितः २५ व्यसुःपपातोर्व्युपस्थे वाताहत इवांघ्रिपः ततःकूटमनुप्राप्तं रामःप्रहरतांवरः २६ अवधील्लीलयाराजन् सावज्ञं वाममुष्टिना तर्ह्येव हि शलः छिन्नः पदापशीर्षकः २७ द्विधा विदीर्णस्तोशलक उभावपि निपेततुः चाणूरे मुष्टिके कूटे शले तोशलके हते २८ शेषाः प्रदुद्रुवुर्मल्लाः सर्वे प्राणपरीप्सवः गोपान्वयस्यानाकृष्य तैः संसृज्य विजह्रतुः २९ वाद्यमानेषु तूर्येषु वल्गंतौ रुतनूपुरौ जनाःप्रजहृषुः सर्वे कर्मणा रामकृष्णयोः ३० ऋते कंसं विप्रमुख्याः साधवः साधुसाध्विति हतेषु मल्लवर्येषु विद्रुतेषु च भोजराट् ३१ धनं हरत गोपानां नंदं बध्नीत दुर्मतिः वसुदेवस्तु दुर्मेधा हन्यतामाश्वसत्तमः उग्रसेनः पिता चापि सानुगः परपक्षगः ३३ एवं विकत्थमाने वै कंसे प्रकुपितोव्ययः लघिम्नोत्पत्य तरसा मंचमुत्तुंगमारुहत् ३४ तमाविशंतमालोक्य मृत्युमात्मन आसनात् मनस्वी सहसोत्थाय जगृहे सोसि चर्मणी ३५ तं खड्गपाणिं विचरंतमाशु श्येनं यथा दक्षिणसव्यमंबरे समग्रहीद्दुर्विषहोग्रतेजा यथोरगं तार्क्ष्यसुतः प्रसह्य ३६

तःपुरुषाकृतिः उच्छ्रीयते स यथा पतति तद्वद्पतदिति २४ अर्दितः पीडितः २५ ऊर्व्याःपृथ्वेभूतले २६ ७ वल्गंतौ नृत्यादि कुर्वंतौ साधुसाध्विति वदंतः अव्ययः अक्षमः लघिम्ना लाघवेन ३४ ३५ दुर्विषहं असह्यमनंततेजो यस्य श्रीकृष्णस्य ३६ न्यवारयत स्वतत्पीठि वाक्यं चेद उद्वाचेद ३८ निःसारयत दुर्वृत्तौ वसुदेवात्मजौ पुरात् ३२ कृष्णोपकल रामः

किं च या दोहनादिषु गायंति ता व्रजस्त्रियो धन्याः प्रेंखेंखनं दोलांदोलनं रुदितं ... उरुक्रमे चित्तं उरुक्रमचित्तं तेनैव यानं सर्वविषय
प्राप्तिर्यासां ताः पाठांतरे उरुक्रमचित्तयानं तस्य इत्यर्थः कुतः अनुरक्तधियः तत्र लिंगं अश्रुकंठ्यः १५ प्रातरिति या अबला अस्य वेणुं निश

या दोहनेऽवहनने मथनोपलेपप्रेंखेंखनार्भरुदितोक्षणमार्जनादौ गायंति चैनमनुरक्तधियोऽश्रुकंठ्यो धन्या
व्रजस्त्रिय उरुक्रमचित्तयानाः १५ प्रातर्व्रजाद्व्रजत आविशतश्च सायं गोभिः समं क्वणयतोऽस्य निशम्य वे
णुं निर्गम्य तूर्णमबलाः पथि भूरिपुण्याः पश्यंति सस्मितमुखं सदयावलोकं १६ एवं प्रभाषमाणासु स्त्री
षु योगेश्वरो हरिः शत्रुं हंतुमनश्चक्रे भगवान्भरतर्षभ १७ सभयाः स्त्रीगिरः श्रुत्वा पुत्रस्नेहशुचातुरौ
पितरावन्वतप्येतां पुत्रयोरबुधौ बलं १८ तैस्तैर्नियुद्धविधिभिर्विविधैरच्युतेतरौ युयुधाते यथान्योन्यं त
थैव बलमुष्टिकौ १९ भगवद्गात्रनिःपातैर्वज्रनिष्पेषनिष्ठुरैः चाणूरो भज्यमानांगो मुहुर्ग्लानिम
वाप ह २० स श्येनवेग उत्पत्य मुष्टीकृत्य करावुभौ भगवंतं वासुदेवं क्रुद्धो वक्षस्यबाधत २१ नाचल
त्तत्प्रहारेण मालाहत इव द्विपः २२

अपगृह्य तूर्णं निर्गम्य पथि सस्मितं मुखं पश्यंति ताः पुण्याः भूरि इति १६ एवं सभयं प्रभाषमाणासु स्त्रीषु तासां भयनिवृत्तये हरिः शत्रुं हं
तुमनश्चक्रे १७ सभयाः स्त्रीणां गिरः श्रुत्वा पुत्रयोः स्नेहेन या शुक् तया आतुरौ विकलौ पुत्रयोर्बलमजानंतौ पितरावनुतापं प्रापतु
रिति १८ १९ तदा भगवतो गात्राणां अरत्निजान्वादीनां निःपातैस्तैः प्रहारैः वज्रस्य निःपेषस्तीव्रः प्रपातस्तद्वन्निष्ठुरैः भज्यमा
नांगः श्रमं प्राप्तः २० श्येनस्येव वेगो यस्य सः चाणूरः अबधात् अताडयत् २१ २२

एवः ह्रस्वः प्रभवंत्यस्मादिति प्रभवः अपियंत्यस्मिन्निति अप्ययः सच स च तदवध्यानं अवज्ञां तत्कर्तृशीलं यस्य सः ४८ आस्तृणुपरईमतस्
वयात्पुत्रभ्रांतिं विहाय जगदीश्वराविति ज्ञात्वा सं किं तेन सस्कालेनालिंगितवंतौ किंतु बद्धांजली तस्थतुरित्यर्थः ५० प्रसं स्नेह लाहस्ती
इंमहंजेजान् भद्रलीलया वीभत्सचरितं कंसं सवीभत्समभारयन् १ इति श्रीमद्भागवते महापुराणे दशमस्कंधे टीकायां चतुश्चत्वा

130

सर्वेषामिह भूतानामेष हि प्रभवाप्ययः गोप्ता च तदवध्यायी न क्वचित्सुखमेधते ४८ श्रीशुक उवाच राजयोषि
त आश्वास्य भगवाँल्लोकभावनः यामाहुर्लौकिकीं संस्थां हतानां समकारयत् ४९ मातरं पितरं चैव मोचयि
त्वाथ बंधनात् कृष्णरामौ ववंदाते शिरसास्पृश्य पादयोः ५० देवकी वसुदेवश्च विज्ञाय जगदीश्वरौ कृतसंवंदनौ
पुत्रौ सस्वजाते न शंकितौ ५१ इति श्रीमद्भागवते महापुराणे दशमस्कंधे कंसवधो नाम चतुःचत्वारिं
शोऽध्यायः ४४ बादरायणिरुवाच पितरावुपलब्धार्थौ विदित्वा पुरुषोत्तमः मा भूदिति निजां मायां ततान
जनमोहिनीं १ उवाच पितरावेत्य साग्रजः सात्वतर्षभः प्रश्रयावनतः प्रीणन्नंब तातेति सादरं २

रिंशत्तमोऽध्यायः ४४ पंचचत्वारिंशके पित्रोर्मोहादिसांत्वयन् उग्रसेनाभिषेकश्च गुरुवासात्सुरागमः १ उपलब्धार्थौ विदित्वेति
अयमर्थः उपसमीपे आवयोः पुत्रवध्वाः संसारिकुपरमसुखभोगात् एवमेव चनलब्धार्थौ आवामीश्वरावितिलब्धः ज्ञानः परम
ज्ञानरूपो ययोस्ताभ्यां तथाभूतौ तौ ज्ञात्वा मयि प्रसन्ने सति अनयोर्जनि नां किं दुर्लभं स्यात् दुर्लभं तु मयि पुत्रतया प्रेम अतः इदा
नीमेव तत्ज्ञानं मा भूदिति निजां स्वाधीनां मायां तयोः प्रसारितवानिति १ तदेव दर्शयति उवाचेत्यादिभिः रवभिः प्रीणन् प्रीणय

स्मार्तुं इति शेषः २

गरिष्ठत्वाय विश्वाश्रयत्वमुक्तं तत्र हेतुः अब्जनाभः कुतस्तस्योपर्येव पपात यत आत्मतंत्रः ३७ ३८ ३९ निर्दिशो निदेशः आज्ञा एव मितस्य

प्रगृह्य केशेषु चलत्किरीटं निपात्य रंगोपरि तुंगमंचात् तस्योपरिष्टात्स्वयमब्जनाभः पपात विश्वाश्रय आत्मतंत्रः
३७ तं संपरेतं विचकर्ष भूमौ हरिर्यथेभं जगतो विपश्यतः हाहेति शब्दः सुमहांस्तदाभूदुदीरितः सर्वजनैर्नरेंद्र
३८ स नित्यदोद्विग्नधिया तमीश्वरं पिबन्नदन्वा विचरन्स्वपन्श्वसन् ददर्श चक्रायुधमग्रतो यतस्तदेव रूपं दुरवाप
माप ३९ तस्यानुजा भ्रातरो ऽष्टौ कंकन्यग्रोधकादयः अभ्यधावन्नभिक्रुद्धा भ्रातुर्निर्देशकारिणः ४० तथाति
रभसांस्तांस्तु संयत्तान्रोहिणीसुतः अहन्परिघमुद्यम्य पशूनिव मृगाधिपः ४१ नेदुर्दुंदुभयो व्योम्नि ब्रह्मेशा
द्या विभूतयः पुष्पैः किरंतस्तं प्रीताः शशंसुर्ननृतुः स्त्रियः ४२ तेषां स्त्रियो महाराज सुहृन्मरणदुःखिताः तत्रा
भीयुर्विनिघ्नंत्यः शीर्षाण्यश्रुविलोचनाः ४३ शयानान्वीरशय्यायां पतीनालिं
गय शोचतीः विलेपुः सुस्वरं नार्यो विसृजंत्यो मुहुः शुचः ४४ हा नाथ प्रिय धर्मज्ञ करुणानाथवत्सल त्वया
हतेन निहता वयं ते सगृहप्रजाः ४५ त्वया विरहिता पत्या पुरीयं पुरुषर्षभ न शोभते वयमिव निवृत्तोत्सवमंगला ४६
अनागसां त्वं भूतानां कृतवान्द्रोहमुल्बणं तेनेमां भो दशां नीतो भूतध्रुक्को लभेत शं ४७

त तत्कारिणः संस्तेभ्यः धावन् ४० तथातीति अतिरभसो वेगो यासां तान् संयत्तान् उद्युक्तान् ४१ ४२ ४३ शोचं सो विलापांश्च नु शुचः
अश्रूणि ४५ धर्मज्ञेत्यादीनि विलापे प्रेमसंबोधनानि अनागसामिति तु परमार्थोभिधाधानं ते त्वदीया वयं ४६ त्वया पत्या विरहिता पु

भा॰द॰पू॰ आश्वास्य शांतयित्वा १२ त्वमेवज्ञापयेति भावेनाह ययातिशापादिति न खलु यादवत्वेपि मदाज्ञया न दोष इति भावः १३ ममताद्दशी शक्तिर्ना
१५३ स्तीति चेत्तत्राह मयीति मत्प्रसादेन सर्वं भविष्यतीत्यर्थः १४ स्वान् ज्ञातीन् संबंधांश्च दिग्भ्य आनाय्येति १५ सिद्धाः पूर्णाः कृष्णरामाभ्यां
गतो निवृत्तो ज्वरस्तापो येषां ते १७ सदयस्मितवीक्षणं यस्मिन् तत् १८ प्रवयसो वृद्धा अपि अतिशयितं बलमोजश्च येषां ते १९ २॰ भृशं

एवमाश्वास्य पितरौ भगवान् देवकीसुतः मातामहं तूग्रसेनं यदूनामकरोन्नृपं १२ आह चास्मान्महाराज प्रजाश्चाज्ञा
तुमर्हसि ययातिशापाद्यदुभिर्नासितव्यं नृपासने १३ मयि भृत्य उपासीने भवतो विबुधादयः बलिं हरंत्यवनताः
139 किमुतान्ये नराधिपाः १४ सर्वान् स्वान् ज्ञातिसंबंधान् दिग्भ्यः कंसभयाकुलान् यदुवृष्ण्यंधकमधुदाशार्हकुकुरां
धकान् १५ सभाजितान्समाश्वास्य विदेशावासकर्शितान् न्यवासयन्स्वगेहेषु वित्तैः संतर्प्य विश्वकृत् १६
कृष्णसंकर्षणभुजैर्गुप्ता लब्धमनोरथाः गृहेषु रेमिरे सिद्धाः कृष्णरामगतज्वराः १७ वीक्षंतोहरहः प्रीताः मुकुंद
स्य मुखांबुजं नित्यं प्रमुदितं श्रीमत् सदयस्मितवीक्षणं १८ तत्र प्रवयसोप्यासन् युवानोतिबलौजसः पिबंतो
क्षैर्मुकुंदस्य मुखांबुजसुधां मुहुः १९ अथ नंदं समासाद्य भगवान्देवकीसुतः संकर्षणश्च राजेंद्र परिष्वज्ये
दमूचतुः २० पितर्युवाभ्यां स्निग्धाभ्यां पोषितौ लालितौ भृशं पित्रोरभ्यधिका प्रीतिरात्मजेष्वात्मनोपि हि २१

आत्मनोऽप्यधिकत्वेन यौ पोषितौ न वाश्चर्यमेतदित्याह पित्रोरिति आत्मनो देहादपि आत्मजेष्वभ्यधिका प्रीतिरिति २ देवकीवसुदेवयोः राम॰
पुत्रौ युवां नास्मत्सुतावित्यपि न वाच्यमित्याह स पितेति २१ १५३

अस्मत्तः अस्मिन्निमित्ते नित्यमुत्कंठितयोरपि युवयोः पुत्राभ्यामावाभ्यां लाल्या बाल्यपौगंडकैशोराः तत्तदवस्थानुभवसुखानीत्यर्थः तेनाभव
न्नेति अस्मत्तः पुत्राभ्यामिति सामानाधिकरण्यं वा ३ किंच आवामेव दैवहीनावित्याह न लब्ध इति पितृगेहस्था बाला यां मुदं विंदंते सा च
न लब्धा इति ४ एवं तावत् श्लोकद्वयेन युवयोरावयोश्च कामहानिरुक्ते आवयोः पुनः युष्मत्परिचर्यालोपेन धर्महानिरपि जाता इत्या

नास्मत्तो युवयोस्तात नित्योत्कंठितयोरपि बाल्यपौगंडकैशोराः पुत्राभ्यामभवन् क्वचित् ३ न लब्धो दैवहतयोर्वासो नौ
भवदंतिके यां बालाः पितृगेहस्था विंदंते लालिता मुदं ४ सर्वार्थसंभवो देहो जनितः पोषितो यतः न तयोर्याति निर्वे
शं पित्रोर्मर्त्यः शतायुषा ५ यस्तयोरात्मजः कल्प आत्मना च धनेन च वृत्तिं न दद्यात्तं प्रेत्य स्वमांसं खादयंति हि ६
मातरं पितरं वृद्धं भार्यां साध्वीं सुतं शिशुं गुरुं विप्रं प्रपन्नं च कल्पोऽबिभ्रच्छ्वसन्मृतः ७ तन्नावकल्पयोः कंसान्नि
त्यमुद्विग्नचेतसोः मोघमेते व्यतिक्रांता दिवसा वामनर्चतोः ८ तत्क्षंतुमर्हथस्तात मातर्नौ परतंत्रयोः
अकुर्वतोर्वां शुश्रूषां क्लिष्टयोर्दुर्हृदा भृशं ९ श्रीशुक उवाच इति मायामनुष्यस्य हरेर्विश्वात्मनो गिरा मोहि
तावंकमारोप्य परिष्वज्यापतुर्मुदं १० सिंचंतावश्रुधाराभिः स्नेहपाशेन चावृतौ न किंचिदूचतू राजन् बाष्पकंठौ
विमोहितौ ११

६ सर्वार्थसंभव इति सर्वेषां धर्मार्थादीनां संभवो यस्मिन् स देहो यतः याभ्यां जनितश्च पोषितस्तयोः पित्रोर्निर्वेशं निष्कृतिं नाप्नोति एवं मर्त्यः स
संवत्सरमात्रेणायुषा न प्राप्नोति ५ तन्मध्येपि तयोः पुत्रः कल्पः समर्थः सन्नपि देहेन धनेन च पित्रोर्वृत्तिं जीविकां न संपादयेत् तं प्रेत्य
लोकांतरे यमदूता स्वस्यैव मांसं खादयंतीति हि किंच मात्रादिशुश्रूषामकुर्वन् विफलजीवितश्च भवतीत्याह मातरमिति अबिभ्रत्
अपुष्णन् श्वसन्नपि मृततुल्य एवेति ७ तत् तस्मात् नौ आवयोः मोघं व्यर्थं अनर्चतोः अपूजयतोः दुर्हृदा कंसेन कृता ८।९।१०।११

भा० द० पू०
१५४

सरहस्यं मन्त्रदेवताज्ञानसहितं धर्म्मान् मन्वादिशास्त्राणि न्यायपथान् मीमांसादीन् आन्वीक्षिकीं तर्कविद्यां षड्विधां संधिविग्रहयानं आसनं द्वैधमाश्रय इत्यर्थः एवंविधां राजनीतिं सकृन्निगदमात्रेण एकवारगुरोरुच्चारमात्रेण तावतीः चतुःषष्टिकलाः ताश्च शैवतन्त्रोक्ताः यथानिरूपितं तथा गीतं १ वाद्यं २ नृत्यं ३ नाट्यं ४ आलेख्यं ५ विशेषकच्छेद्यं ६ तण्डुलकुसुमावलिविकाराः ७ पुष्पास्तरणं ८ दशनवसनाङ्गरागाः ९ मणिभूमिकाः १० कर्म्मशयनरचनं ११ उदकवाद्यं १२ उदकघातः १३ चित्राश्च योगाः १४ चित्रमाल्यग्रथनविकल्पाः १५ शेखरापीडयोजनं १६ नेपथ्ययोगाः १७ कर्णपत्रभङ्गाः १८ गन्धयुक्तिः १९ भूषणयोजनं २० ऐन्द्रजालं २१ कौचुमारयोगः २२ हस्तलाघवं २३ चित्रशाकापूपभक्ष्यविकारक्रियाः २४ पानकरसरागासवयोजनं २५ सूचीवायकर्म्म २६ सूत्रक्रीडा वीणाडमरुकवाद्यानि २७ प्रहेलिका २८ प्रतिमा

140

सरहस्यं धनुर्वेदं धर्म्मान् न्यायपथांस्तथा तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधां ३४ सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ सकृन्निगदमात्रेण तौ संजगृहतुर्नृप ३५ अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः गुरुदक्षिणयाचार्यं छन्दयामासतुर्नृप ३६

लादुर्वचकयोगाः ३० पुस्तकवाचनं ३१ नाटकाख्यायिकादर्शनं ३२ काव्यसमस्यापूरणं ३३ पट्टिकावेत्रवाणविकल्पाः ३४ तर्ककर्माणि ३५ तक्षणं ३६ वास्तुविद्या ३७ रूप्यरत्नपरीक्षा ३८ धातुवादः ३९ मणिरागज्ञानं ४० आकरज्ञानं ४१ वृक्षायुर्वेदयोगाः ४२ मेषकुक्कुटलावकयुद्धविधिः ४३ शुकसारिकाप्रलापनं ४४ उत्सादनं ४५ केशमार्जनकौशलं ४६ अक्षरमुष्टिकाकथनं ४७ म्लेच्छितकविकल्पाः ४८ देशभाषाज्ञानं ४९ पुष्पशकटिकानिमित्तज्ञानं ५० यन्त्रमातृका ५१ धारणमातृका ५२ संपाठ्यं ५३ मानसीकाव्यक्रिया ५४ अभिधानकोशक्रियाविकल्पाः ५६ छलितकयोगाः ५७ वस्त्रगोपनानि ५८ द्यूतविशेषाः ५९ आकर्षक्रीडा ६० बालक्रीडनकानि ६१ वैनायिकी ६२ वैजयिकी ६३ वैयासिकीनां च विद्यानां ज्ञानं ६४ इति चतुःषष्टिकलाः छन्दयामासतुः उपलोभितवन्तौ ३६

राम:
१५४

सव्रजं व्रजवासिभिः सहितं कुप्यानि स्वर्णरजतातिरिक्तकांश्यपात्रादीनि तत्प्रभृतिभिः २४ २५ पुरोधसा गर्गाचार्य्येण द्विजसंस्कृतिं उपनयनं गा
वो गावः रुक्मस्य माला विद्यंते यासां ताः क्षौमवस्त्रमालावतीः २७ या एव मनोदत्ताः प्रासवतात्र एवादृहात् ननु ताः कंसेनापहृताः सत्यं राज्ञा गोष्ठा

सपिता सा च जननी यो पुष्णीतां स्वपुत्रवत् शिक्षन्त्वं बंधुभिरुत्सृष्टान् कल्पैः पोषणरक्षणैः २२ यात यूयं व्रजं ता
त वयं च स्नेहदुःखितान् ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखं २३ एवं सांत्वय्य भगवान्नंदं सव्रजमच्युतः
वासोलंकारकुप्याद्यैरर्हयामास सादरं २४ इत्युक्तस्तौ परिष्वज्य नंदः प्रणयविह्वलः पूरयन्नश्रुभिर्नेत्रे सह
गोपैर्व्रजं ययौ २५ अथ शूरसुतो राजन् पुत्रयोः समकारयत् पुरोधसा ब्राह्मणैश्च यथावद्द्विजसंस्कृतिं २६
ङ्गी तेभ्योदाद्दक्षिणा गावो रुक्ममालाः स्वलंकृताः स्वलंकृतेभ्यः संपूज्य सवत्साः क्षौममालिनीः २७ याः कृष्णराम
जन्मर्क्षे मनोदत्ता महामतिः ताश्चाददादनुस्मृत्य कंसेनाधर्मतो हृताः २८ ततश्च लब्धसंस्कारौ द्विजत्वं प्राप्य
सुव्रतौ गर्गाद्यदुकुलाचार्य्याद्गायत्रं व्रतमास्थितौ २९ प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ नान्यसिद्धाम
लं ज्ञानं गूहमानौ नरेहितैः ३० अथो गुरुकुले वासमिच्छंतावुपजग्मतुः काश्यं सांदीपनिं नाम अवंतिपुरवासिनं ३१
यथोपसाद्य तौ दांतौ गुरौ वृत्तिमनिंदितां ग्राहयंतावुपेतौ स्म भक्त्या देवमिवादृतौ ३२ तयोर्द्विजवरस्तुष्टः शुद्धभा
वानुवृत्तिभिः प्रोवाच वेदानखिलान् सांगोपनिषदो गुरुः ३३

राद्धिर्य दत्ता इहेत्याह कंसेनाधर्मत इति २८ गायत्रं व्रतं ब्रह्मचर्य्यं २९ प्रकर्षेण भवत्याभ्यामिति प्रभवौ अत एव सर्वज्ञौ सुतः सिद्धममलं
ज्ञानं प्रच्छादयंतौ नरचेष्टितौ ३० ३१ यथा यथावत् उपासाद्य प्राप्य गुरौ वृत्तिमभ्यात् ग्राहयंतौ शिक्षयंतौ गुरुमुपेतौ उपगतौ सेवितवंतावित्य
र्थः ३२ शुद्धो भावो यासु ताभिरनुवृत्तिभिः सांगोपनिषदः अंगानि शिक्षादीनि तैरुपनिषद्भिः सहितान् ३३

भा॰द॰पू॰ देवीरो अनिलवद्वंहोयस्यतेन पर्जन्यो छंदास्य प्रायथा भानि भवंत्विह परत्रच मे घस्तत्रिन होयस्यतेन ४९ नष्टं अदृष्टं तत्पुनर्लब्धं धनं या
२५५ भिस्ताः इवेति ५० इतिश्रीभागवते दशमस्कंधे पंचचत्वारिंशः ४५ षट्चत्वारिंशाके घोषमुद्धवं प्रेष्य तद्गिरा यशोदानंदयोः कृष्णः
शोकापनोदनं १ कामचारं द्विजातिः सन् परीसजातिसंयतः गुरोर्ज्ञानमनु प्राप्य सख्या गोपीरुपादिशत् २ गोपीनांसांत्वनं भक्तिरहस्यं
सन्मार्गे साध्यमितीतरत्वं उद्धवं विशेनष्टी वृष्णीनामिति बुद्धिसत्तमः बुद्धातिश्रेष्ठः १ २ गोपीनां विशेषतः शंदेशैः कारणमाह ता
इति ३ मय्येव संकल्पात्मकं मनो यासांताः मदर्थे त्यक्तदैहिकाः पतिपुत्रादयो याभिस्ताः ततः किमतआह ये त्यक्तलोकधर्म्मा इति मन्निमित्तंत्यक्तो

(14)

गच्छ तस्व गृहं वीरो कीर्तिर्वो मस्तु पावनी गुरुणैवमनुज्ञातौ रथेनानिलरंहसा आयातौ स्वपुरं तात पर्जन्यनिनदे
न वै ४९ समनंदन्प्रजाः सर्वा दृष्ट्वा रामजनार्द्दनौ अपश्यंत्यो बव्हहानि नष्टलब्धधना इव ५० इतिश्रीमद्भागव
ते महापुराणे दशमस्कंधे पंचचत्वारिंशोध्यायः ४५ बादरायणिरुवाच वृष्णीनां प्रवरो मंत्री कृष्णस्य दयितः सखा
शिष्यो बृहस्पतेः साक्षादुद्धवो बुद्धिसत्तमः १ तमाह भगवान्प्रेष्ठं भक्तमेकांतिनं क्वचित् गृहीत्वा पाणिना पाणिं
प्रपन्नार्त्तिहरो हरिः २ गच्छोद्धव व्रजं सौम्य पित्रोर्नौ प्रीतिमावह गोपीनां मद्वियोगाधिं मत्संदेशैर्विमोचय ३ ताम
न्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ये त्यक्तलोकधर्म्माश्च मदर्थे तान्बिभर्म्यहं ४ मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गो
कुलस्त्रियः स्मरंत्यो विमुह्यंति विरहोत्कंठ्यविह्वलाः ५ धारयंत्यतिकृच्छ्रेण प्रायः प्राणान्कथंचन प्रत्यागमन
मो संदेशैर्वल्लव्यो मे मदात्मिकाः ६

लोकधर्म्मो विहमुत्र सुखेतत्साधनानि च यैस्तानिबिभर्म्मि सं वर्द्धयामि सुखयामीत्यर्थः तासां वियोगमाधिं दर्शयति द्वयेन मयिताः विरहेण श्रोत्कं राम:
ठ्यं तेन विह्वलाः परवशाः ५ गोकुलान्निर्गमनसमये सीघ्रमागमिष्यामिति ये प्रत्यागमनसंदेशास्तैः मे मदीयाः वल्लव्यो गोप्यः मदात्मिकाः २५५
इति तासामात्मा स्वदेहे यदि वर्त्तेत वर्हितापेन दह्येतैव मय्येव वर्त्तमानत्वात् कथंचिज्जीवंतीति भावः ६

प्रभासे देशे महार्णवे मृतं बालं वरयामास ३७ ईश्वरावेताविति विदित्वा समुद्रस्तयोरर्हणमाजहार ३८ पंचजनस्त्वसुरो हृतवान् स च महान्समासा

द्विजस्तयोस्तन्महिमानमद्भुतं संलक्ष्य राजन्नतिमानुषीं मतिं संमंत्र्य पत्न्या स महार्णवे मृतं बालं प्रभासे वरयां बभूव
३७ तथेत्यथारुह्य महारथौ रथं प्रभासमासाद्य दुरंतविक्रमौ वेलामुपव्रज्य निषीदतुः क्षणं सिंधुर्विदित्वार्हणमाहर
त्तयोः ३८ तमाह भगवानाशु गुरुपुत्रः प्रदीयतां योसाविह त्वया ग्रस्तो बालको महतोर्मिणा ३९ समुद्र उवाच नैवा
हार्षमहं देव दैत्यः पंचजनो महान् अंतर्जलचरः कृष्ण शंखरूपधरोसुरः आस्ते तेनाहृतो नूनं तच्छ्रुत्वा सत्वरं प्रभुः ४०
जलमाविश्य तं हत्वा नापश्यदुदरेऽर्भकं तदंगप्रभवं शंखमादाय रथमागमत् ४१ ततः संयमनीं नाम यमस्य दयि
तां पुरीं गत्वा जनार्दनः शंखं प्रदध्मौ सहलायुधः ४२ शंखनिर्ह्रादमाकर्ण्य प्रजासंयमनो यमः तयोः सपर्यां म
हतीं चक्रे भक्त्युपबृंहितां ४३ उवाचावनतः कृष्णं सर्वभूताशयालयं लीलामनुष्य हे विष्णो युवयोः करवाम किं
४४ श्रीभगवानुवाच गुरुपुत्रमिहानीतं निजकर्मनिबंधनं आनयस्व महाराज मच्छासनपुरस्कृतः ४५ तथेति
तेनोपानीतं गुरुपुत्रं यदूत्तमौ दत्वा स्वगुरवे भूयो वृणीष्वेति तमूचतुः ४६ सम्यक् संपादितो वत्स भवद्भ्यां गुरुनि
ष्क्रियः कोनु युष्मद्विधगुरोः कामानामवशिष्यते ४७

ध्म ध्म इत्यर्थः ४० ४१ ४२ सपर्यां पूजां ४३ सर्वेषां भूतानामाशयः आशयाः अंतःकरणानि तान्यालयो निवासो यस्य तं निजकर्मबंधनं
यस्य तं ४४ तथाभूतमपि मच्छासनपुरस्कारेणानयत्त स्तोन दोष इत्यर्थः ४५ वत्सेति सधान्येनैकस्य संबोधनं गुरोर्निष्क्रयो गुरुदक्षिणा युष्म
द्विधयो गुरोर्मम कामानां मध्ये को नु कामोऽवशिष्यते न कोपि ४७

भा॰द॰पू॰ गावोगाः गिरं गोवर्द्धनं १८ अप्यायास्यति आगमिष्यतिविं १९ श्रीकृष्णोपकारस्मरणमदिभिरनुपमानंदनाभिभूयमानआ
१५६ ह दावाग्नेरित्यादिना वाताद्वर्षाच्चेति अन्येभ्यश्च दुरत्ययेभ्यो मृत्युभ्यः श्रीकृष्णेन रक्षितास्म २० किंच स्मरतामिति लीलयापांग

अपि स्मरति नः कृष्णो मातरं सुहृदः सखीन् गोपान्व्रजं चात्मनाथं गावो वृंदावनं गिरं १८ अप्यायास्यति गो
विंदः स्वजनान् सकृदीक्षितुं तर्हि द्रक्ष्यामतद्वक्त्रं सुनसं सुस्मितेक्षणं १९ दावाग्नेर्वातवर्षाच्च वृषस
र्पाच्च रक्षिताः दुरत्ययेभ्यो मृत्युभ्यः कृष्णेन सुमहात्मना २० स्मरतां कृष्णवीर्याणि लीलापांगनिरी
क्षितं हसितं भाषितं चांग सर्वा नः शिथिलाः क्रियाः २१ सरिच्छैलवनोद्देशान् मुकुंदपदभूषितान्
आक्रीडानीक्ष्यमाणानां मनो याति तदात्मतां २२ मन्ये कृष्णं च रामं च प्राप्ताविह सुरोत्तमौ सुराणां मे
हदर्थाय गर्गस्य वचनं यथा २३ कंसं नागायुतप्राणं मल्लौ गजपतिं तथा अवधिष्टां लीलयैव पशूनिव
मृगाधिपः २४ तालत्रयं महासारं धनुर्यष्टिमिवेभराट् बभंजैकेन हस्तेन सप्ताहमदधाद्गिरिं २५
प्रलंबो धेनुकोरिष्टो तृणावर्त्तो बकादयः दैत्याः सुरासुरजितो हता येनेह लीलया २६ शुक उवाच
इति संस्मृत्य संस्मृत्य नंदः कृष्णानुरक्तधीः अत्युत्कंठो भवत्तूष्णीं प्रेमप्रसरविह्वलः २७ यशोदा वर्ण्य
मानानि पुत्रस्य चरितानि च शृण्वत्यश्रूण्यवास्राक्षीत्स्नेहस्नुतपयोधरा २८ तयोरित्थं भगवति कृष्णे
नंदयशोदयोः वीक्ष्यानुरागं परमं नंदमाहोद्धवो मुदा २९

पांगेन निरीक्षितं अंग हे उद्धव २१ न केवलं ते शिथिला एव किंतु शनैरुपरमंतीत्याह सरिच्छैलेति सरितश्च शैलाश्च वनो
देशाश्च तान् आक्रीडान् क्रीडास्थानानि २२ सुराणां महदर्थाय महत् गंभीरं गर्गस्य वचनं यथा २३ न केवलं तद्वचनानुसारे

142

कृष्णबलरामसंवादपीत्याह कंसमिति २४ इभराट् गजश्रेष्ठः
वतालत्रयपराक्रमवर्णनं २५ २६

संदेशं भवतीनां वियोगो मे नहि सर्वात्मना क्वचित् इत्यादिकं निम्लोचति अस्तं गच्छति सति छन्नं यानं यस्येति तद्गोपीभिरज्ञातत्वे न नंदसंगतत्वं ध्वनितं सूचयति ८ व्रजं वर्णयति पंचभिः वासितार्थं पुष्पवती गावस्तन्निमित्तमभितो युध्यद्भिः शुष्मिभिर्मत्तैर्गोवृषैर्नादितं वस्त्राभिर्धेनुभिः स्वत्सकान्प्रति ९ विलंघद्भिः गोदोहशब्दैः सह अभितो रवाः मुंच मामुंच नय आनय ७

श्रीशुक उवाच इत्युक्त उद्धवो राजन् संदेशं भर्तुरादृतः आदाय रथमारुह्य प्रययौ नंदगोकुलं ७ प्राप्तो नंदव्रजं श्रीमान्निम्लोचति विभावसौ छन्नयानः प्रविशतां पशूनां खररेणुभिः ८ वासितार्थेऽभियुध्यद्भिर्नादितं शुष्मिभिर्वृषैः धावंतीभिश्च वास्राभिरूधोभारैः स्ववत्सकान् ९ इतस्ततो विलंघद्भिर्गोवत्सैर्मंडितं सितैः गोदोहशब्दाभिरवं वेणूनां निःस्वनेन च १० गायंतीभिश्च कर्माणि शुभानि बलकृष्णयोः स्वलंकृताभिर्गोपीभिर्गोपैश्च सुविराजितं ११ अग्न्यर्कातिथिगोविप्रपितृदेवार्चनान्वितैः धूपदीपैश्च माल्यैश्च गोपावासैर्मनोरमं १२ सर्वतः पुष्पितवनं द्विजालिकुलनादितं हंसकारंडवाकीर्णैः पद्मखंडैश्च मंडितं १३ तमागतं समागम्य कृष्णस्यानुचरं प्रियं नंदः प्रीतः परिष्वज्य वासुदेवधियार्चयत् १४ भोजितं परमान्नेन संविष्टं कशिपौ सुखं गतश्रमं पर्यपृच्छत्पादसंवाहनादिभिः १५ कच्चिदंग महाभाग सखा नः शूरनंदनः आस्ते कुशल्यपत्याद्यैर्युक्तो मुक्तः सुहृद्व्रतः १६ दिष्ट्या कंसो हतः पापः सानुगः स्वेन पाप्मना साधूनां ध

देहि इत्यादिरवो यस्मिन् तत् वेणूनां निःस्वनेन च गायंतीभिर्गोपैश्च सुविराजितं अग्न्यादयो येनान्वितैर्गोपगृहैर्धूपादिभिश्च मनोरमं खंडसमूहः अर्चयत् पूजयामास साधूनामिति कर्मणि षष्ठी १७

पा

143

यातपर्यंतं अनंतालवयं च स्नेहदुःखितान् ज्ञातीन्वो द्रष्टुमेष्यामो विधाय सुहृदां सुखमिति यदाह तत्सत्यं करिष्यतीति ३४ काल
विलंबनसहमानौ प्रत्याह माखिद्यतमिति द्रेमहाभागौ अंतिके इदानीमेव समीपे वा कुतः इत्यत आह अंतर्हृदीति तर्हि सर्वैः किं मिति न द्र
श्यते तत्राह ज्योतिरिति तथा यथा मथनं विना दृश्यते तथा भक्तिं विना कृष्णोपीति भावः आत्मा मेव ततस्य हि इहागमनं स्वस्यातिप्रियान् पित्रा
दीन्विहाय न संगच्छत इति मन्ये तत्राह न हीत्येव अस्य प्रियादयो न हि संति तत्र हेतुः अमानिनः समानस्येति ३६ ३७ सोपि जन्मक
र्मादिरहितोपि क्रीडाप्रयोजनः सन् साधूनां परिपालनाय सदसत् मिश्रयोनिषु सात्विकराजसतामसयोनिषु यथा देवादिमत्स्या

आगमिष्यत्यदीर्घेण कालेन व्रजमच्युतः प्रियं विधास्यते पित्रोर्भगवान् सात्वतां पतिः ३४ हत्वा कंसं रंगमध्ये प्र
तीपं सर्वसात्वतां यदाह वः समागत्य कृष्णः सत्यं करोति तत् ३५ माखिद्यतं महाभागौ द्रक्ष्यथः कृष्णमंतिके
अंतर्हृदि स भूतानामास्ते ज्योतिरिवैधसि ३६ न ह्यस्यास्ति प्रियः कश्चिन्नाप्रियो वास्त्यमानिनः नोत्तमो
नाधमो वापि समानस्यासमोपि वा ३७ न माता न पिता तस्य न भार्या न सुतादयः नात्मीयो न परश्चापि
न देहो जन्म एव च ३८ न चास्य कर्म वा लोके सदसन्मिश्रयोनिषु क्रीडार्थः सोपि साधूनां परित्राणाय क
ल्प्यते ३९ सत्वं रजस्तम इति भजते निर्गुणो गुणान् क्रीडन्नतीतोत्र गुणैः सृजत्यवति हंत्यजः ४० यथा भ्रमरि
कादृष्ट्या भ्रामतीव महीयते चित्ते कर्तरि तत्रात्मा कर्तेवाहंधिया स्मृतः ४१

दिनृसिंहादियोनिषु कल्प्यते आविर्भवतीत्यर्थः ननु जन्मकर्मादिरहितस्य कुतः गतादि इत्यत आह सत्वमिति क्रीडामतीतो विमीडन्
तथापि मायागुणैः घटितः इत्यर्थः ४० अत्रो विद्योपाधिर्जीवस्य कर्तृत्वं दृष्टांतीकुर्वं स्तस्या विषयस्यैव कर्तृत्वमिति सदृष्टांतमाह १५७
दृष्ट्येति भ्रमरिका भ्रमणं तया उपलक्षितया दृष्ट्या भूरपि भ्राम्यतीति यथा प्रतीयते एवं चित्ते कर्तरि सति तत्र चित्ते अहंधियात्मा

अखिलगुरुत्वमेवजगत्कारणत्वेननियंतृत्वेनचाह एतावितिरामोमुकुंदश्चेत्येतौविश्वस्यबीजयोनीनिमित्तोपादाने ननुपुरुषप्रधा
नयोर्बीजयोनित्वंप्रसिद्धमतआह पुरुषःप्रधानमितिपुरुषोंऽशः प्रधानंशक्तिः अतःप्रधानपुरुषावप्येतावेवेत्यर्थः एवंजग
त्कारणत्वमुक्त्वा किंच अन्वीयतेषुभूतेष्वनुप्रविश्यभूतानांचतदुपहितस्यविलक्षणस्यनानाभेदस्यचज्ञानस्यजीवस्यईशातेईश्वरौभव

उद्धवउवाच युवांश्लाघ्यतमौनूनंदेहिनामिहमानद नारायणेऽखिलगुरौयत्कृतामतिरीदृशी ३०
एतौहिविश्वस्यचबीजयोनीरामोमुकुंदःपुरुषःप्रधानं अन्वीयभूतेषुविलक्षणस्यज्ञानस्यचेशात
इमौपुराणौ ३१ यस्मिन्जनःप्राणवियोगकालेक्षणंसमावेश्यमनोविशुद्धं निर्हृत्यकर्माशयमाशु
यातिपरांगतिंब्रह्ममयोर्कवर्णः ३२ तस्मिन्भवंतावखिलात्महेतौनारायणेकारणमर्त्यमूर्त्तौ भा
वंविधत्तंनितरांमहात्मन् किंवाऽवशिष्टंयुवयोःसुकृत्यं ३३

तःकृतपुराणौ अनादी अनादित्वात्कारणत्वं ततश्चनियंतृत्वमित्यर्थः ३० ननुसृष्ट्यादिकर्मविशेषान्मनुष्यादीजन्मदर्शनाच्चत
स्यान्येभ्यःकोविशेषइत्याशंक्याह यस्मिन्नितिद्वाभ्यां कर्माशयंकर्मवासनांनिर्हृत्यत्यक्त्वाब्रह्ममयः स्वरूपज्ञानवान् अर्कवर्णः
शुद्धसत्त्वमूर्तिःसन्परांगतिंतत्पदंयाति ३१ अखिलात्मनांचहेतुश्चतस्मिन्कारणेनमनुष्याकृतौ महात्मनिपरब्रह्मणिभवंतौभक्तिं
कुरुतः अतःकृतकृत्यावित्यर्थः ३२ प्रस्तुतमाह आगमिष्यतीतिपित्रोर्युवयोः ३३

भा॰द॰पू॰ ३० वनौकसो गोप्यः ३८ स क्रोधमाह अक्रूर इति अर्थं साधितवानित्यर्थसाधनः तदाह येन नीत इति ४० कंसघातयि
२०५८ त्वा पुनः किमर्थमागत इत्याशंक्य कार्यं संभावयंति किमिति तदा साधितसाधितेन कार्येण क्रीतस्य भर्तुः पाठांतरे प्रेतस्य
मृतस्य कंसस्य निःकृतिः मौर्ध्वदेहिकं अस्माभिः कृत्वा साधयिष्यते अस्मान्मांसैः पिंडान् कृत्वा दास्यतीत्यर्थः ४० एवंवदंतीनां

145

उद्धव पत्नीनाम अरविंदलोचनं व्रजांगनानां दिवमस्पृतध्वनिः दध्नश्च निर्मथनशब्दमिश्रितो निरस्यते
येन दिशाममंगलं ३८ भगवत्युदिते सूर्ये नंदद्वारि व्रजौकसः दृष्ट्वा रथं शातकौंभं कस्यायमिति चाब्रुवन्
३९ अक्रूर आगतः किं वा यः कंसस्यार्थसाधनः येन नीतो मधुपुरीं कृष्णः कमललोचनः ४० किं साधयि
ष्यत्यस्माभिः भर्तुः प्रीतस्य निःकृतिं इति स्त्रीणां वदंतीनां उद्धवोगात्कृताह्निकः ४१ इति भागवते दशमे षट्
चत्वारिंशः ४६ श्रीशुक उवाच तं वीक्ष्य कृष्णानुचरं व्रजस्त्रियः प्रलंबबाहुं नवकंजलोचनं पीतांबरं पुष्क
रमालिनं लसन्मुखारविंदं परिमृष्टकुंडलं सुविस्मिताः को यमपीच्यदर्शनः कुतश्च कस्याच्युतवेषभूष
णः इति स्म सर्वाः परिवव्रुरुत्सुकास्तमुत्तमश्लोकपदांबुजाश्रयं १ तं प्रश्रयेणावनताः सुसत्कृतं सव्रीडहा
सेक्षणसूनृतादिभिः रहस्यपृच्छन्नुपविष्टमासने विज्ञाय संदेशहरं रमापतेः २

स्त्रीणां ततः स्वस्मिन्नवसरे कृतस्नानादिनियम उद्धवः आगत इत्याह इति दशमे षट्चत्वारिंशः ४६ प्रागुक्तं शोकेपनयनं तथा
देशेन गोपिकाः बोधयित्वोद्धवस्तत अनुज्ञाप्याऽगमत्पुरीं १ अपीच्यं दर्शनं सुंदरं दर्शनं यस्य सः अच्युतस्येव वेषो भूषणानि च

यथ्यसः कोपंक्रुगोभ्याकांस्यवोनितवंदंस्पसंपरिवद्धुं ४

किंच युवयोरेवनायमात्मजः किंतुसर्वेषामपिचात्मा पितात्मजएव किंतुशत्रुमित्रादिरूपोपीति सर्वात्मनिरूपणेन मोहनिवृत्तयेसं
वंधमनैकांतिकीकरोति युवयोरेवेतिद्वाभ्यां अच्युताद्विनातरांनितरांतत्त्वतोवाच्यंनिर्वचनार्हंवस्तुनास्तीति ४२ दीपान्निरूप्यम
ज्वाल्यवास्तून्देहल्यादीन् ४२ मणिभिकांच्यादिषुस्थितैः रज्जुर्विकर्षत्सुभुजेषुकंकणानांस्रजोयासांताः चलंतोनितंबाः स्त

युवयोरेवनैवायमात्मजोभगवान्हरिः सर्वेषामात्मजोह्यात्मापितामातासईश्वरः ३४ दृष्टंश्रु
तंभूतभवद्भविष्यस्थास्नुचरिष्णुंमहदल्पकंच विनाच्युताद्वस्तुतरांनवाच्यंसएवपरमार्थभूतः
३५ एवंनिसासाब्रुवतोर्व्यतीतानंदस्यकृष्णानुचरराजन् गोप्यःसमुत्थायनिरूप्यदीपान्वास्तून्स
मभ्यर्च्यदधीन्यमंथन् ३६ तादीपदीप्तैर्मणिभिर्विरेजुरज्जुर्विकर्षद्भुजकंकणस्रजः चलन्नितंवस्तन
हारकुंडकुंडलत्विषत्कपोलारुणकुंकुमाननाः ३७

नाहाराश्रयाभ्यांकुंडलैश्चत्विष्यंतः स्फुरंतःकपोलायासांअरुणानिकुंकुमानियेषुतानिआननानियासांताएवंता
श्चताश्च ३७

भ्रंकारान्बहु यथा कुर्वंतं अस्मदग्रे सादरं लोभयंतं जानती निषेधत्याह किमिहेति पुरातनं पुराणं। यदुसोनं स्तुतं विजयसखसख्यः न सख्युः प्रसंगत्रापाः सख्यः तासामग्रत
स्तत्प्रसंगो गीयतां इष्टास्तस्य प्रियाः ते न स्तुतिं ता इति वार्त्तेन क्षपिता कुचरुक् येषां ते ताः न वेष्टमधोसितं ददास्यतीति १२ भौमात्तदैवैवोचैः श्रीमन्तु भसंनागाद्धिकं
तत्तां अस्मात्यितुंमामादिष्टवानित्यत आह दिवीति दिवि भुवि रसातले च याः स्त्रियः स्युः ताः कानाम दुराया न कास्त्वत्तः तदित्थं वयं तस्येत्यर्थः कपटेन रुचिरे
ण हासेन भ्रूविजृंभेण यस्मात्स्याद् कपटे स्त्रिया किं च यस्य चरणरजः श्रीः सेवते येन तत्र वयं काः अपि च यद्यप्येवं तत्रापि कृपणपक्षे कृपणानुकंपी तिष्ठत्येवोत्तम
श्लोकशब्दो यथाभवतीति तथा कथं नोपलक्ष्यत इति भावः १३ पादमूले प्रविशंतं समाधिप्रायेण सिवमस्याह विसृज शिरसि न्यस्तं पादं विसृज न पाद्यम् एतमाह वेद्मी
ति मुकुंदादभ्येत्यागतः शिक्षितस्त्वयर्थः दौत्यैः दूतकर्मभिः चाटुकारैः प्रियोक्तिचरणादिभिः अनुनयविदुषः प्रार्थनाचतुरस्यतेसर्वमहं वेद्मि मुकुंदस्तेन

किमिह बहु षडंघ्रे गायसि त्वं यदूनामधिपतिमगृहाणामग्रतो नः पुराणं विजयसखसखीनां गीयतां तत्प्रसंगः
क्षपितकुचरुजस्ते कल्पयंतीष्टमिष्टाः १२ दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः कपटरुचिरहासभ्रू
विजृंभस्य याः स्युः चरणरज उपास्ते यस्य भूतिर्वयं का अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः १३ विसृज शिर
सि पादं वेद्म्यहं चाटुकारैरनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुंदात् स्वकृत इह विसृष्टापत्यपत्यन्यलोका व्य
सृजदकृतचेताः किं नु संधेयमस्मिन् १४ मृगयुरिव कपींद्रं विव्यधे लुब्धधर्मा स्त्रियमकृत विरूपां स्त्री
जितः कामयानां बलिमपि बलिमत्त्वावेष्टयद्ध्वांक्षवद्यस्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः १५

ध

मप्यविश्वसनीयइति भावः ननु तेन किमपराद्धं तत्राह स्वकृत इति यदर्थमेव विसृष्टापत्यपत्यन्यलोकाः अपत्यानि पतयश्च
ते इहलोकः अन्यलोको धर्मसाध्यश्च याभिस्ताः अस्मानकृतचेताः अकृतज्ञो चित्तो व्यसृजत् अस्मिन् किं नु संधानं कर्त्तुमि
ति १४ किं च तस्य पूर्वो कर्मणो तेन संधानात् विभेम्यहमस्मादित्याह मृगयुरिवेति मृगयुर्लुब्धकः स्वयं कपीन्द्रं वालिनं विव्यधे
अविध्यत् लुब्धधर्मा क्रोधेन अलुब्धधर्मैतेनाः लुब्धको हितम्मा समनु कामोविशंति अयं तु न तथा अतोऽपि कठिन इत्यर्थः
तथा स्त्रीयं स्वरूपेण स्वा स्त्रीजितः सीतापरं तत्रौ कामयेनयानं प्राप्तसाधनयस्यास्तां विरूपां छिन्नकर्णनासिकामकरोत् दाशरथिरूपेण तथा
बलिमपि तत्त्वबलिमत्त्वा पित्वा ध्वांक्षवत् काकवत् अवेष्टयत् कपटवामनरूपेण वामनो भूत्वा मालिमत्त्वाऽधिपद्मे पद्म इति पाठ्यां लिदृशो
गृहीत्वा जीवेष्टयात् स्वर्गादधोऽक्षिपदित्यर्थः न न आदसितस्य कृष्णस्य सख्यैरलं एवं चेत्किमिति तं नित्यं गायसि तत्राह दुस्त्यज इति तस्य

पार्षदं सेवकं ३ पित्रोः प्रियचिकीर्षयेत्यत्र हेतुः स्नेहानुबंध इति ४ अन्यथा गोव्रजे तस्येत्यत्र हेतुः अन्येष्विति अर्थकृता कार्यनिमित्ता विडं
बनं अनुकरणमात्रं न तु तात्विकी मैत्री पुंभिरिव दृष्टांतो ५ तदेवान्यार्थदर्शनैः प्रपंचः निःस्वमित्यादिना दत्ता दक्षिणा येन तं याज्यं पतितं विग
तफलं वृक्षं रतां अनुरक्तां अनन्यामित्यर्थः ६ त्यक्तलौकिकाः त्यक्तलोकव्यवहारः ७ प्रियस्य कर्माणि गायंत्यः तथा तस्य बाल्यकैशोरयोर्यानि क
र्माणि तानि संस्मृत्य संस्मृत्य गतह्रियः सत्यो रुदंत्यश्च तमपृच्छन्निति पूर्वेणान्वयः एवं संबंधः ८ प्रियेणाप्रेषितं अभिमानं मां प्रसादयितुं प्रस्थापितोयं
दूत इति कल्पयित्वाब्रवीत् यदा तस्मिन् प्रियप्रस्थापितोद्धवे दृष्टे तदा मधुकरापदेशेनोद्धवमेवाब्रवीदित्यर्थः ९ हे मधुप कितवस्य धूर्तस्य बंधो नो
स्तोच मम मानस कारेणाज्ञापयेत्यर्थः तत्कर्मीत्यपेक्षायां कुंकुमवरोपितस्य तस्य स्मश्रुणां नो हि तत्कारणानुग्रेऽस्माकमंघ्रिं सत्यः कुचाभ्यां विलुंपितासम

जानीमस्त्वां यदुपतेः पार्षदं समुपागतं भर्त्रेह प्रेषितः पित्रोर्भवान् प्रियचिकीर्षया ३ अन्यथा गोव्रजे तस्य
स्मरणीयं न चक्ष्महे स्नेहानुबंधो बंधूनां मुनेरपि सुदुस्त्यजः ४ अन्येष्वर्थकृता मैत्री यावदर्थविडंबनं पुंभिः स्त्रीषु कृता
यद्वत्सुमनःस्विव षट्पदैः ५ निःस्वं त्यजंति गणिका अकल्पं नृपतिं प्रजाः अधीतविद्या आचार्यमृत्विजो दत्तदक्षिणं खगा वी
तफलं वृक्षं भुक्त्वा चातिथयो गृहं दग्धं मृगास्तथारण्यं जारा भुक्त्वा रतां स्त्रियं ६ इति गोप्यो हि गोविंदे गतवाक्कायमानसाः कृष्ण
दूते व्रजं याते उद्धवे त्यक्तलौकिकाः ७ गायंत्यः प्रियकर्माणि रुदंत्यश्च गतह्रियः तस्य संस्मृत्य संस्मृत्य यानि कैशोरबाल्ययोः ८
काचिन्मधुकरं दृष्ट्वा ध्यायंती कृष्णसंगमं प्रियप्रस्थापितं दूतं कल्पयित्वेदमब्रवीत् ९ मधुप कितवबंधो मा स्पृशांघ्रिं सपत्न्याः
कुचविलुलितमालाकुंकुमश्मश्रुभिर्नः वहतु मधुपतिस्तन्मानिनीनां प्रसादं यदुसदसि विडंब्यं यस्य दूतस्त्वमीदृक् १० सकृदधर
सुधां स्वां मोहिनीं पाययित्वा सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक् परिचरति कथं तत्पादपद्मं तु पद्मा अपि बत हृतचेता
उत्तमश्लोकजल्पैः ११

र्द्धं नायाद्वक्षसस्थवनमाला: अतएव तस्याः कुंकुमे येषु तैः श्मश्रुभिः उपालक्षितः किंतु तास्मै मानिनीनां प्रसादं मधुपतिर्वहतु किं
मन्प्रसादेन नस्तत्प्रसादस्य विडंब्यं यदुसदसि विडंब्यं उपहासास्पदं कृतः यस्य दूतस्त्वमीदृक् इदृशः १० ननु किमिति त्वं तमवजानीषे किं चेत्तो नापकृतं अतआह सकृदिति
मदधरसुधां स्वां मोहिनीं पाययित्वा सुमनसः कुसुमानीव यथा त्यजति तद्वत् अस्मान् तत्याज तस्यापि पद्मं श्रीः कथं सेवते इति मदेत्याह अपि तो बतेति तदुत्तमश्लोकजल्पैः मि
थ्या वचनैः हृतचेता इति भावः ११

द०भा०पू०
१९०

146

तेनस्मृतिर्नास्तीत्यत आह अपि बतेति नवद्युर्ये इत्यो गुरुकुलादागत्य आर्यपुत्रः श्रीकृष्णः साधुना किं मधुपुर्यां वर्त्तते कदाचिदपि नोस्माकं वा
र्त्ताः किंकरीणां गृणीते अगुरुवत्सुगंधं भुजं नो मूर्ध्नि कदा नु धास्यतीति १९ श्रीकृष्णदर्शने लालसा औत्सुक्यं यासां गोपीनां प्रियसंदेशैः सांत्वयन् प्रथमं ता इदमभाषत
२० तत्रादौ तासां स्तुतिमाह अहो इति यूयं पूर्णार्थाः कृतार्थाः २१ श्रेयोभिः श्रेयःसाधनैः २२ अनुत्तमा अप्रतिहता २३ अवृणीत वृतवत्यः
२४ सर्वात्मभावः एकांतभक्तिः अधिकृतः प्राप्तः भगवत्प्रेमसुखप्रदर्शनेन मम महान् अनुग्रहः कृत इति २५ भर्त्तुः कृष्णस्य रह

अपि बत मधुपुर्यामार्यपुत्रोधुनास्ते स्मरति स पितृगेहान्सौम्य बंधूंश्च गोपान् क्वचिदपि स कथा नः किं
करीणां गृणीते भुजमगुरुसुगंधं मूर्ध्न्यधास्यत्कदा नु १९ ॥श्रीशुक उवाच॥ अथोद्धवो निशम्यैवं कृष्ण
दर्शनलालसाः सांत्वयन्प्रियसंदेशैर्गोपीरिदमभाषत २० ॥उद्धव उवाच॥ अहो यूयं स्म पूर्णार्था भ
वत्यो लोकपूजिताः वासुदेवे भगवति यासामित्यर्पितं मनः २१ दानव्रततपोहोमजपस्वाध्यायसंय
मैः श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते २२ भगवत्युत्तमश्लोके भवतीभिरनुत्तमा
भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा २३ दिष्ट्या पुत्रान्पतीन्देहान्स्वजनान्भवनानि च हित्वावृणीत
यूयं यत्कृष्णाख्यं पुरुषं परं २४ सर्वात्मभावोधिकृतो भवतीनामधोक्षजे विरहेण महाभागा महान्मे
नुग्रहः कृतः २५ श्रूयतां प्रियसंदेशो भवतीनां सुखावहः यमादायागतो भद्रा अहं भर्त्तू रहस्करः २६
॥श्रीभगवानुवाच॥ भवतीनां वियोगो मे न हि सर्वात्मना क्वचित् यथा भूतानि भूतेषु खं वाय्वग्निर्जलं मही
२ तथाहं च मनःप्राणभूतेंद्रियगुणाश्रयः आत्मन्येवात्मनात्मानं सृजे हन्म्यनुपालये आत्ममायानुभा

स्करः रहस्यकार्यकर्त्ता २६ भवतीनां मे मया सह वियोगो नास्ति कुतः सर्वात्मना सर्वस्योपादानकारणत्वेन २७ अत एव सर्वेषु मय्यादि
कार्येषु हमनुगतत्वेन स्थित इति सदृष्टांतमाह यथेति भूतेषु चराचरेषु भूतानि यथा वायुरग्निर्जलं मही
प्राप्तं चित्तीमत् आदिनी कामी गुणा कारणं तेषामाश्रयत्वेनानुगत इत्यर्थः २८ ननु कारणत्वे सर्वानुगतत्वे च कार्यकारणभेदः
स्यादित्यत आह आत्मन्येवेति ननु नित्यसिद्धस्य कुतः सृष्ट्यादिरूपता अत आह भूतेन्द्रियगुणात्मना बुद्धिरिति पाठः न हूयत इति ननु

राम०
१९०

अपीच जानीम एकपाक्षि अपरोलतान्नलोभ्य लवीनत्यादिनलाकुंपीकामः जीकर्म इत्याह यदनु यत्नेतियस्यानुचरितमेवलीलात देवकर्णपीयूषं तस्य विप्रु
ट् कणिकातस्याः सकृदनं तेचनंतेन विधूता निरस्ताद्वंद्वधर्मा रागादयो येषां ते अतएव विनष्टाश्चतुल्याः दीनाः खितंगृहं कुटुंबं विहाय दीनाभाग इ
नो विहंगा अपि भीक्षुचर्यां प्राणवृत्तिमात्रं चरंति अत्र वाच्यांशे सत्यापि त्यक्तेन शाङ्कस इति नीरापरत्वे पप्रतीतावच्छो तासा उत्स्यत्स्वेपि पक्ष्यां
विकोपमर्थः विधूतद्वंद्वधर्मा इत्यंतः समासः पूर्वेण तेन अतएव विनष्टा इति समासः इह बोविहंगाहंसादयसारादय इत्येके नष्टे तधर्माणो
विनष्टा एव सुपरितः क्षणमेवरीनं तु छ्यु रसरितं कुटुंबं विहाय दीना इवकृपाकेवला धीराइति वा पाठः बहवो विहंगा हंसा इव सारासारविवेकवंत
ः भिक्षुचर्यां परमहंसा चरंति तस्मादेवं परमेपुरुषार्थरूपत्वादेव तु त्यजइदवनत्यक्तुं शक्यते इति १६ ननु किमेवं तु ये पूर्वं तत्ते वयमाकरदयितिकिमेवं नो

यदनुचरितलीलाकर्णपीयूषविप्रुट् सकृददनविधूतद्वंद्वधर्मा विनष्टाः सपदि गृहकुटुंबं दीनमुत्सृज्य
दीना बहव इव विहंगा भिक्षुचर्यां चरंति १६ वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः कुलिकरु
तमिवाज्ञाः कृष्णवध्वो हरिण्यः ददृशुरसकृदेतत्तन्नखस्पर्शतीव्रस्मररुज उपमंत्रिन् भण्य
तामन्यवार्ता १७ प्रियसख पुनरागाः प्रेयसा प्रेषितः किं वरय किमनुरुंधे माननीयोऽसि
मेऽङ्ग नयसि कथमिहास्मान्दुस्त्यजद्वंद्वपार्श्वं सततमुरसि सौम्य श्रीर्वधूः साकमास्ते
१८

वो चरितीति अत्र आह वयमिति हे उपमंत्रिन् अन्यस्मिन्निवार्ता नीयतां कुलिकस्य मृगयोः रुतं गीतं अज्ञा मृग्यः इव तत्सत्यमिति
श्रद्दधानाः कृष्णस्य हरिणस्य वध्वो भार्याः हरिण्यः शरैः क्षताः सत्यो कृष्णोद्दशुः ९ वंजिह्मस्य कुटिलस्य तस्य व्याहृतं सत्यमि
व श्रद्दधानास्वयं त्वोन्यं असकृदेतदनुभूतवत्यः किं तत्र तस्य नखैः स्पर्शो तेन तीव्रः स्मरः तेन रुजः पीडा तस्मादन्या वार्ता भ
ण्यतां कथ्यतामिति १७ पराङ्गत्य गत्वा पुनरागतं प्रत्याह प्रियसखेति हे प्रियसख प्रेयसा प्रेषितः पुनः प्रेषितः किं
त्वमागतोसि अंग हे त्वमस्माकं माननीयोसि अतो भवान् किमनुरुंधे किं प्रार्थयसि तं वरय कथं मानीतंप्रत्याह
नयसीति हे सौम्य अस्मान् दुस्त्यजं द्वंद्वं मिथुनीभावो यस्य तस्य पार्श्वं समीपं कथं नयसि नयतु तावत् हि इत्थं सौम्य श्रीर्नो सपत्नी
सहैव तत्र तस्यास्ते तत्र वाचिद्धरसि वक्षस्येव १८

॥ अस्मदं दत्तोन आत्मनात्मसंनियोगं तानाः पूर्वमार्थे द्वितीया ३७ अहतो अहितः शत्रुः अघं करोति अघकृत् इदानीं आनंद आप्तैर्बांधवैः ३८
अन्या ऊचुः कच्चिदिति नोस्माकं करोत्यां प्रीतिं किं पुरयोषितां करोति स्निग्धं च तत् सव्रीडहासं उदारं मीक्षणं तेनार्चितः तामिरस्मा
भिर्वा ३९ अन्या ऊचुः कथमिति तासां वाक्यैर्विभ्रमैश्च अनुभाजितः पूजितः ४० अपरान्या ऊचुः अपि मनसा चितं यस्मात् क्वचित् प्रस्तु
ते स्मरति किमस्मान् विदग्धाः ४१ अन्या ऊचुः ताः किमिति कुमुदैः कुन्दैः शशांकेन च रम्ये वृन्दावने क्वणच्चिरणानां नूपुराणि यस्यां तस्यां रास

श्रीशुक उवाच ॥ एवं प्रियतमादिष्टमाकर्ण्य व्रजयोषितः । ता ऊचुरुद्धवं प्रीतास्तत्संदेशागतस्मृतीः
३७ गोप्य ऊचुः ॥ दिष्ट्याहितो हतः कंसो यदूनां सानुगोऽघकृत् । दिष्ट्याप्तैर्लब्धसर्वार्थैः कुशल्या
स्तेऽच्युतोऽधुना ३८ कच्चिद्गदाग्रजः सौम्य करोति पुरयोषितां । प्रीतिं नः स्निग्धसव्रीडहासो
दारेक्षणार्चितः ३९ कथं रतिविशेषज्ञः प्रियश्च पुरयोषितां । नानुबध्येत तद्वाक्यैर्विभ्रमैश्चानु
भाजितः ४० अपि स्मरति नः साधो गोविंदः प्रस्तुते क्वचित् । गोष्ठीमध्ये पुरस्त्रीणां ग्राम्याः
स्वैरकथांतरे ४१ ताः किं निशाः स्मरति यासु तदा प्रियाभिर्वृंदावने कुमुदकुंदशशांकरम्ये
रेमे क्वणच्चरणनूपुररासगोष्ठ्यामस्माभिरीडितमनोज्ञकथः कदाचित् ४२ अप्येष्यती
दाशार्हस्तप्ताः स्वकृतया शुचा । संजीवयन्नु नो गात्रैर्यथेंद्रो वनमंबुदैः ॥ ४३ कस्मात्कृष्ण इहायाति
प्राप्तराज्यो हताहितः । नरेंद्रकन्या उद्वाह्य प्रीतः सर्वसुहृद्वृतः ४४ किमस्माभिर्वनौकोभिरन्या
भिर्वा महात्मनः । श्रीपतेराप्तकामस्य क्रियेतार्थः कृतात्मनः ४५॥

गोष्ठ्यां अस्माभिः ईडिता मनोज्ञा कथा यस्य स तदा पातु नि सा अस्मरन् नेता कदाचित् किं तु स्मरति ४२ स्वनिमित्तेन शोकेन तप्ता
नः अस्मान् गात्रैः करस्पर्शादिभिः संजीवयन् किं न दृश्यतीति ४३ अन्या ऊचुः ॥ कस्मादिति अन्यान्या गतिर्बलेन एवं मत्वा वि
स्तरसंप्रतीमहे स्वयं प्राप्तः कस्मादिहागमिष्यतीत्यनेनापि लीति ४४ अन्या अपरमार्थमूचुः कीमस्माभिर्वनचरीभिरस्मा
भिरन्याभिर्वा राजकन्याभिः महात्मनोऽधीरस्य किंच श्रीपतेः तदस्मात्तां स्वतः एव आप्तकामस्य ४५

ध३॥

भा॰द॰पु॰
१६१

147

राम॰
१६१

न त्वात्मनो भ्रान्त्यादिरूपत्वेन दोषप्रसंगः स्यात्तत्राह आत्मेति आत्मा शुद्धः कुतः अगुणान्वयः न गुणा मुक्तेनीति त्वया न कुतः व्यतिरिक्तः न
दपि कुतः ज्ञानमयः ज्ञानस्वरूपः न त्वहं प्रत्ययेस्व संवेद्य मेवात्मनो नानात्वं स्यादिति कुतः अद्भुतात्तत्राह सुषुप्तेति मायाकार्यमनो
वृत्तिभिर्येव तेऽन्वसंप्राज्ञरूपेण प्रतीयते न स्वत इत्यर्थः ३० कुतः मनोनिरोधे तदभावादिति व्यतिरेकं स्पष्टयितुं मनोनिरोधं विधत्ते येनेति.
उत्थितः प्रबुद्धः मिथ्याभूतमेव स्वप्नं ध्यायति एवं बाधितानपीन्द्रियार्थान् ध्यायेत् येन मनसा ध्यायेत चिंतु विनि आपक्षतोनद
न्द्रियाणि प्रत्यपद्यत प्राप्तवान् मनः विनिद्रः अनलसः सन्निरुन्ध्यात् नियच्छेदिति ३१ तावता च कृतार्थो भवतीत्याह एतदन्तः इति

आत्मा ज्ञानमयः शुद्धो व्यतिरिक्तोऽगुणान्वयः सुषुप्तिस्वप्नजाग्रद्भिर्मनोवृत्तिभिरीयते ३० येनें
द्रियार्थान्ध्यायेत मृषा स्वप्नवदुत्थितः तन्निरुन्ध्यादिंद्रियाणि विनिद्रः प्रत्यपद्यतः ३१ एतदंतः
समाम्नायो योगः सांख्यं मनीषिणां त्यागस्तपो दमः सत्यं समुद्रांता इवापगाः ३२ यत्त्वहं भवती
नां वै दूरे वर्ते प्रियो दृशां मनसः सन्निकर्षार्थं मदनुध्यानकाम्यया ३३ यथा दूरचरे प्रेष्ठे मन
आविश्य वर्तते स्त्रीणां च न तथा चेतः सन्निकृष्टेऽक्षिगोचरे ३४ मय्यावेश्य मनः कृत्स्नं
विमुक्ताशेषवृत्ति यत् अनुस्मरंत्यो मां नित्यमचिरान्मामुपैष्यथ ३५ या मया क्रीडता
रात्र्यां वनेऽस्मिन्व्रज आस्थिताः ।अलब्धरासाः कल्याण्यो मापुर्मद्वीर्यचिंतया ॥३६॥

एष मनोनिरोधोऽन्तः समाप्तिः फलं यस्य सः समाम्नायो वेदः मतत्रयपर्यवसानमित्यर्थः योगोऽष्टांगः सांख्यमात्मानात्मविवेकः
त्यागः संन्यासः तपः स्वधर्मः दमः इंद्रियदमनं भागोऽशेषे कर्मैपर्यवसाने दृष्टान्तः समुद्रान्ता आपगा नद्य इवेति ३२ ननु किमन्या
निवास्मानात्मविद्याप्रलोभयसि वयं तु सर्वसुंदरस्य केवलगुणगणालंकृतेन त्वया विरहं नैव सहामहे इति चेत्तत्राह यत्त्वहमिति
दृशां दूरे वर्ते तत् मदनुध्यानार्थं तच्च ध्यानं मनसः सान्निकर्षार्थमिति ३३ एतदुपपादयति त्रयेण यथा दूरचरे इति ३४
उपैष्यथ इति माधुर्ये मात्र मे इदमिति चेत्तत्राह या इति हे कल्याण्यः स्वभर्तृभिः प्रतिरुद्धाः वने क्रीडता मया सह व्रज एव क्रीडा
जाता इव मामापुः प्राप्ताः ३६

किंच ॥ इतरप्रसारो महत्त्वे कारणं तस्य वनचारित्वव्यभिचारो ज्ञानं वा कारणं किंतु केवलं भजनमेवेत्याह क्वेमा इति तासामनुभजतः पुंसः ननु श्रेय उपयुक्त
इत्यतः अगदराजः अमृतं यथोक्तं ५७ अतएवमासां गोपीनां भगवतः प्रसाद इत्याह नायमिति अंगेवक्षसि उ अहो नितांतरतेः एकांतरति
मत्याः श्रियोपि नायं प्रसादः अनुग्रहोस्ति नलिनस्येव गंधोरुक्कांतिश्च यासां तासां स्वर्योषितामप्सरसामपि नास्ति अन्याः पुनर्दूरतो निरस्ताः
रासोत्सवे कृष्णभुजदंडाभ्यां गृहीतः आलिंगितः कंठो येन लब्धा आशिषो याभिः तासां गोपीनां यत्प्रसाद उदगात् आविर्बभूव ५८ किंच आसां तावत्

भा॰द॰पू॰ १९२ 148

क्वेमाः स्त्रियो वनचरीर्व्यभिचारदुष्टाः कृष्णे क्व चैष परमात्मनि रूढभावः नन्वीश्वरोनुभजतोऽविदुषोपि
साक्षाछ्रेयस्तनोत्यगदराज इवोपयुक्तः ५७ नायं श्रियोंग उ नितांतरतेः प्रसादः स्वर्योषितां न
लिनगंधरुचां कुतोन्याः रासोत्सवेस्य भुजदंडगृहीतकंठलब्धाशिषां य उदगाद्व्रजसुंदरीणां ॥
५८ आसामहो चरणरेणुजुषामहं स्यां वृंदावने किमपि गुल्मलतौषधीनां या दुस्त्यजं स्वज
नमार्यपथं च हित्वा भेजुर्मुकुंदपदवीं श्रुतिभिर्विमृग्यां ५९ या वै श्रियार्चितमजादिभिरा
प्तकामैर्योगेश्वरैरपि यदात्मनि रासगोष्ठ्यां कृष्णस्य तद्भगवतश्चरणारविंदं न्यस्तं स्तनेषु विज
हुः परिरभ्य तापं ६० वंदे नंदव्रजस्त्रीणां पादरेणुमभीक्ष्णशः यासां हरिकथोद्गीतं पुनाति भु
वनत्रयं ६१ श्रीशुक उवाच ॥ अथ गोपीरनुज्ञाप्य यशोदां नंदमेव च गोपानामंत्र्य दाशार्हो यास्य
न्नारुरुहे रथं ६२ तं निर्गतं समासाद्य नानोपायनपाणयः नंदादयोनुरागेण प्रावोचन्नश्रुलो
चनाः ६३ मनसो वृत्तयो नः स्युः कृष्णपादांबुजाश्रयाः वाचोभिधायिनीर्नाम्नां कायस्तत्प्रह्व

राम॰ १९२

पीनोभाग्यं मम भवितेत्याह आसामिति गोपीनां चरणरेणुभाजां गुल्मादीनां मध्ये यत्किमपि अहं स्यामित्याशंसा कथं भू
तानां पाद इत्यादि आर्यो लोकमार्गो धर्मश्च हित्वा ५९ पुनस्ता एव विशिनष्टि यावादिति योगेश्वरैरप्यात्मन्येवार्चितं स्तनेषु न्यस्तं प
रिरभ्य तं तापं च जहुरिति ६० एवं मह्यं प्रतिपाद्य नमस्करोति वंदइति ६१ अनुज्ञाप्य अनुसांत्व्य चिरं स्थित्वा आमंत्र्य पृष्ट्वा ६२ ६३ नः अस्मा
कं मनसो वृत्तयः कृष्णपादांबुजाश्रयाः स्युः अभिधायिनीः अभिधायिन्यः ६४

धृजनदुःखप्रणाशनात्

पश्चाद्धर्मान्तापादसंगतिः सेवास्मानाकुलइति अतो नैराश्यमेव परं सुखं न त्वाशेति दुःखरूपमित्याह परंसौख्यमिति स्वैरिणी कामचारिणी ४६ मपि र एकांतवासो किंच तद्विस्मर्तुं [illegible] भवतीत्याहुः सरिच्छैलेति त्रिभिः अत्र चरितास्सेविताः इ उद्धव कृष्णस्य [illegible] पेति ४७ ४८ ४९ ५० श्रीकेसमधोक्षजं ज्ञात्वात्मानं [illegible] ५१ विनुदन्नपनयन् ५२ सरिद्वनगिरिद्रोणीः [illegible] कृष्णलीलासंप्र आदिभिः संस्मारयन् रेमे ५३ कृष्णावेशो नाम मनो मनसा [illegible] ताः गोपीर्नमस्यन् नमस्कुर्वन् [illegible] उत्तमस्यो [illegible] गोपस्त्रीनमस्कु

परं सौख्यं हि नैराश्यं स्वैरिण्यप्याह पिङ्गला ॥ तज्जानतीनां नः कृष्णे तथाप्याशा दुरत्यया ४६ क उत्सहेत संत्यक्तुमुत्तमश्लोकसंविदं ॥ अनिच्छतोपि यस्य श्रीरंगान्न च्यवते क्वचित् ४७ सरिच्छैलवनोद्देशा गावो वेणुरवा इमे संकर्षणसहायेन कृष्णेनाचरिताः प्रभो ४८ पुनः पुनः स्मारयन्ति नन्दगोपसुतं बत श्रीनिकेतैस्तत्पदकैर्विस्मर्तुं नैव शक्नुमः ४९ गत्या ललितयोदार हासलीलावलोकनैः माध्व्या गिरा हृतधियः कथं तं विस्मरामहे ५० हे नाथ हे रमानाथ व्रजनाथार्तिनाशन मग्नमुद्धर गोविन्द गोकुलं वृजिनार्णवात् ५१ श्रीशुक उवाच ॥ ततस्ताः कृष्णसंदेशैर्व्यपेतविरहज्वराः उद्धवं पूजयांचक्रुर्ज्ञात्वात्मानमधोक्षजं ५२ उवास कतिचिन्मासान् गोपीनां विनुदन् शुचः कृष्णलीलाकथां गायन् रमयामास गोकुलं ५३ यावन्त्यहानि नन्दस्य व्रजेऽवात्सीत्स उद्धवः व्रजौकसां क्षणप्रायाण्यासन् कृष्णस्य वार्तया ५४ सरिद्वनगिरिद्रोणीर्वीक्षन् कुसुमितान्द्रुमान् कृष्णं संस्मारयन्रेमे हरिदासो व्रजौकसां ५५ दृष्ट्वैवमादि गोपीनां कृष्णावेशात्मविक्लवं उद्धवः परमप्रीतस्ता नमस्यन्निदं जगौ ॥ ५६ ॥ एताः परं तनुभृतो भुवि गोपवध्वो गोविन्द एव निखिलात्मनि रूढभावाः वाञ्छन्ति यद्भवभियो

तिरन्यास्ताः इति रत्नाः परं केवलं तनुभृतः सफलजन्मानः रूढभावाः प्ररूढप्रेमवत्यः यदीति यं निरूढंभाव [illegible] भवतीति रसोपि तु तासां भरत्वं पंचभिर्गोपीजां ५५ भवभियो मुमुक्षवः मुनयो मुक्ताः अपि वयं भक्ता अपि अतः अनंत कथा [illegible] जन्मभिर्विप्रसं स्कारैः सौत्रसावित्रियाज्ञिकैः [illegible] किं करोति [illegible] अनंतकथा [illegible] जन्मभिश्चतुर्भिर्ब्रह्मजन्मभिः किमित्यर्थः ५६॥

तस्य

कवदी नाक्रूरजोषजं भीजि प्रतीवरणं ६

कामेनैव प्रकृतिरिद्यमयाचत न च मोक्षं स्वसाक्षात्क्रियेति दुर्भगेत्युक्तं कृताथें तेनु तस्या न संदेहः ७ ८ कामरूपं वरं दत्त्वा मानयित्वा चालंकारा दिदानैः ९ मनोग्राह्यं विषयसुखं असत्त्वात् तुच्छत्वात् १० किंचिच्चिकीर्षयन् दासीनां कुब्जयैव प्रस्थानं कारयितुं मिथ्यात्वप्रदर्शनार्थं अक्रूरप्रियकाम्यया च ११ आरात् दूरत एव १२ आम्रपद इति छेदः १३ अपः आप्तवतीर्धारयन् निश्चितवान् १४ वां युवयोरिदं कुलं उद्धृतं समेधितं च १५ वामि

भा. द. पू. १९३ सानंगतप्तकुचयोरुरसस्तथाक्ष्णोर्जिघ्रंत्यनंतचरणेन रुजो मृजंती दोर्भ्यां स्तनांतरगतं परिरभ्य कांत
मानंदमूर्तिमजहादतिदीर्घतापं ५ सैवं कैवल्यनाथं तं प्राप्य दुःप्राप्यमीश्वरं अंगरागार्पणेनाहो दु
र्भगेदमयाचत ७ अहोष्यतामिह प्रेष्ठ दिनानि कतिचिन्मया रमस्व नोत्सहे त्यक्तुं संगं तेंबुरुहेक्षण
८ तस्यै कामवरं दत्वा मानयित्वा च मानदः सहोद्धवेन सर्वेशः स्वधामागमदर्चितः ९ दुराराध्यं
समाराध्य विष्णुं सर्वेश्वरेश्वरं यो वृणीते मनोग्राह्यमसत्त्वात्कुमनीष्यसौ १० अक्रूरभवनं कृष्णः स
१49 हरामोद्धवः प्रभुः किंचिच्चिकीर्षयन्प्रागादक्रूरप्रियकाम्यया ११ स तान्नरवरश्रेष्ठानाराद्वीक्ष्य स्वबां
धवान् प्रत्युत्थाय प्रमुदितः परिष्वज्याभिनंद्य च १२ ननाम कृष्णं रामं च स तैरप्यभिवादितः पूज
यामास विधिवत्कृतासनपरिग्रहान् १३ पादावनेजनीरापो धारयंछिरसा नृप अर्हणेनांबरै
र्दिव्यैर्गंधस्रग्भूषणोत्तमैः १४ अर्चित्वा शिरसानम्य पादावंकगतौ मृजन् प्रश्रयावनतोऽक्रूरः
कृष्णरामावभाषत १५ दिष्ट्या पापो हतः कंसः सानुगो वामिदं कुलं भवद्भ्यामुद्धृतं कृच्छ्राद्दुरंता
च्च समेधितं १५ युवां प्रधानपुरुषौ जगद्धेतू जगन्मयौ भवद्भ्यां न विना किंचित्परमस्ति न चापरं १६ आ
त्मसृष्टमिदं विश्वमन्वाविश्य स्वशक्तिभिः ईयते बहुधा ब्रह्मन् श्रुतप्रत्यक्षगोचरं १७ ७ राम. १९३

इदं कुलमित्यादि व्यवहारदृष्ट्योक्तं परमार्थमाह युवामिति जगन्मयौ युवां कुतः जगद्धेतू तदपि कुतः प्रधानपुरुषौ तत्तदात्मकौ अतः परं किंचिदपि
अतो भवद्भ्यां विना परं कारणं अपरं कार्यं च नास्तीति १६ ननु प्रकृतिपुरुषौ नास्तीत्युच्यते तत्राह आत्मसृष्टमिति ब्रह्मन् हे परमेश्वर वृ
त्तिपाठः स्वशक्तिभिः आत्मनैव सृष्टमिदं विश्वं अन्वाविश्य कारणत्वात् अनुप्रविष्टोऽपि तदुपाधिभेदस्थितः श्रुतप्रत्यक्षगोचरं यथा भवति
तथानेकधा भवानेव प्रतीयसे १७

कृष्णे रतिः स्यादिति ६५ कृष्णादिभ्यो भक्त्युद्रेकमाह उपायनानि चाददिति ६७॥ दशमे सप्तचत्वारिंशः॥४७॥ अष्टचत्वारिंशके प्य कृष्णः कुब्जाम
रीरमत् अक्रूरस्य गृहं गत्वा तं गजाह्वमथादिशत् १ सैरंध्र्याः कामतप्ताया प्रियमिच्छन्मनोरथात् अयं सूक्ष्म तत्त्वः कृष्णो निन्यापारो नत्वांत्य
त २ महार्हैरनर्घैरुपस्करैर्गृहोपकरणैराढ्यं कामोपायैस्तदुद्दीपकैः पुरतः संबंधादिभिरुपबृंहितं १ यथा यथोचितं २ ३ अभा

कर्मभिर्भ्राम्यमाणानां यत्र क्वापीश्वरेच्छया मंगलाचरितैर्दानै रतिर्नः कृष्ण ईश्वरे ६५
एवं सभाजितो गोपैः कृष्णभक्त्या नराधिप उद्धवः पुनरागच्छन्मथुरां कृष्णपालितां ६६
कृष्णाय प्रणिपत्याह भक्त्युद्रेकं व्रजौकसां वसुदेवाय रामाय राज्ञे चोपायनान्यदात् ६७
इति श्रीभागवते महापुराणे दशमस्कंधे उद्धवयाने सप्तचत्वारिंशोऽध्यायः ४७॥ श्री
शुक उवाच। अथ विज्ञाय भगवान् सर्वात्मा सर्वदर्शनः सैरंध्र्याः कामतप्तायाः प्रियमि
च्छन्गृहं ययौ महार्होपस्करैराढ्यं कामोपायोपबृंहितं मुक्तादामपताकाभिर्विता
नशयनासनैः धूपैः सुरभिभिर्दीपैः स्रग्गंधैरपि मंडितं १ गृहं तमायांतमवेक्ष्य सासनात्सद्यः
समुत्थाय हि जातसंभ्रमा यथोपसंगम्य सखीभिरच्युतं सभाजयामास सदासनादिभिः २ तथो
द्धवः साधुतयाभिपूजितो न्यसीदुर्व्यामभिमृश्य चासनं कृष्णोपि तूर्णं शयनं महाधनं विवे
श लोकाचरितान्यनुव्रतः ३ सा मज्जनालेपदुकूलभूषणस्रग्गंधताम्बूलसुधासवादिभिः प्र ४
पत्र साधितात्मोपससार माधवं सव्रीडलीलोत्स्मितविभ्रमेक्षितैः ४ आहूय कांतां नवसंगमह्रि ५
या विशंकितां कंकणभूषिते करे प्रगृह्य शय्यामधिवेश्य रामया रेमेनुलेपार्पणपुण्यलेशया

प्रियोपसर्पणमाचरदिति आहूयेति ईषद्धासा सव्रीडं सलीलया उत्स्मितं तन्मुखेषु विभ्रमयुतचक्षुरादिभिः स्मितैरुपसर्पणादिति ४ अनुलेपार्पणस्य
तस्याः पुण्यं ना सीतिदर्शयतु पुण्यलेशयेत्युक्तं न तु पुण्यस्यान्तत्वविवक्षया ५ ॥ ॥ ॥ ॥ ॥ ॥

सुरेतरांशा राज्ञां तेषाम् अक्षौहिणीशतानां वधेन भूमेर्भारमपनेतुं स्वांशेन रामेण सहावतीर्णोऽसीति २२ अत एवं भूतस्य तव आगमनेन कृतार्था
गा॰ द॰ पु॰ सिद्धस्माहत्यर्थेनाद्येति हे ईश अद्य नोऽस्माकं वसतयो गृहा जातास्तव गमनादपि न तु पुण्याः काः याः वसतीः स्वसां साक्षात्प्रविष्टः कः स त्वं यस्य तव पादसलि
१९४ लं स्वर्गंगा त्रिजगत्पुनाति यश्च सर्वदेवपितृभूतनृदेवमूर्तिः स त्वं जगद्गुरुरिति २३ स्वमनोरथः पर्यपूरीति इति तु ध्वनाह कः पंडित इति ऋतगी
150 रः सत्यवाक् तत्वः परं शरणं कः समीपाद्गच्छेत् यतो भवान् भजतः सर्वान् अभिलकामान् ददाति आत्मानमपीति २४

स त्वं प्रभोऽद्य वसुदेवगृहेऽवतीर्णः स्वांशेन भारमपनेतुमिहासि भूमेः । अक्षौहिणीशतवधेन सुरेतरांशा
राज्ञाममुष्य च कुलस्य यशो वितन्वन् २२ अद्येश नो वसतयः खलु भूरिभागा यः सर्वदेवपि
तृभूतनृदेवमूर्तिः यत्पादशौचसलिलं त्रिजगत्पुनाति स त्वं जगद्गुरुरधोक्षज याः प्रविष्टः २३
कः पंडितस्त्वदपरं शरणं समीयाद्भक्तप्रियादृतगिरः सुहृदः कृतज्ञात् सर्वान्ददाति सुहृदो भजतो
ऽभिकामानात्मानमप्युपचयापचयौ न यस्य २४ दिष्ट्या जनार्दन भवानिह नः प्रतीतो योगेश्वरै ना॰
रपि दुरापगतिः सुरेशैः छिंध्याशु नः सुतकलत्रधनाप्तगेहदेहादिमोहरशनां भवदीयमायां २५
इत्यर्चितः संस्तुतश्च भक्तेन भगवान् हरिः अक्रूरं सस्मितं प्राह गीर्भिः संमोहयन्निव २६ भगवानुवा
च त्वं नो गुरुः पितृव्यश्च श्लाघ्यो बंधुश्च नित्यदा वयं तु रक्ष्याः पोष्याश्च अनुकंप्याः प्रजा हि वः २७ भ
वद्विधा महाभागा निषेव्या अर्हसत्तमाः श्रेयस्कामैर्नृभिर्नित्यं देवाः स्वार्था न साधवः २८ न ह्यम्म राम॰
यानि तीर्थानि न देवा मृच्छिलामयाः ते पुनंत्युरुकालेन दर्शनादेव साधवः २९ १९४

नः अविवेकिनां त्वमपि अनुग्रह एव २५ वः युष्माकं प्रजाः पुत्रादिवदिति २७ ननु नैमित्तिका सेव्या इति प्रसिद्धं न च अदेवा इति
स्वार्थाः स्वकार्यसाधनपराः साधवस्तु केवलं परानुग्रहपराः परमार्थे तत्सकलप्रद्युधवत् देवा इति एव सेव्या इत्यर्थः २८ तदेव अमृच्छिला
दिमयाः किं देवादयो नेत्याह नहीति अम्मयानि तीर्थानि मृच्छिलामयाः देवाश्च तीर्थानि न भवंति ते न अपि तु भवंत्येव तत्रापि साधूनां तु
मार्जवतीर्थानां च महदंतरमित्याह ते पुनंतीति २९

एकस्यैव बहुधा प्रतीतिं सदृष्टांतमाह यथाहीति योनिषु स्वस्यैव रूपांतरेणाभिव्यक्तिस्थानेषु चराचरेषु मह्यादिषु पृथगुपादानकारणत्वेन नानाभांति
आत्मयोनिषु स्वकार्येषु भूतभौतिकेषु कार्यकारणेषु जीवापि नरमणादिव्यापारेषु बालयुवादिषु बाधवस्थान्तु चतापि प्रतीयते इति भवत्स्वरूपे
मात्मतंत्रग्रहणं १८ ननु सृष्ट्यादिकर्तृत्वेन सगुणत्वेन च मर्मादिकं जीववद्बंध उक्तः न इत्यत आह सृजसीति तद्गुणकर्मभिर्वा ते गुणैः कर्मभिः
देह्ययं यतः कुत्र कदापि बंधहेतुर्न विद्यते ज्ञानात्मन इति मायाया आश्रयानावरकत्वादिति भावः १९ किंच
आत्मतत्त्वतः बंधक्षः कापि जीवात्मनोपि न वस्तुतो बंधोस्तीत्याह देहाद्युपाधेरिति भावो जन्मादि भिदा च न साक्षात्त्व

पु

यथा हि भूतेषु चराचरेषु मह्यादियोनिषु भाति नाना: एवं भवान्केवल आत्मयोनिष्वा
त्मात्मतंत्रो बहुधा विभाति १८ सृजस्यथो लुंपसि पासि विश्वं रजस्तमः सत्त्वगु
णैः स्वशक्तिभिः न बध्यसे तद्गुणकर्मभिर्वा ज्ञानात्मनस्ते क्व च बंधहेतुः १९ ॥
देहाद्युपाधेरनिरूपितत्वाद्भवो न साक्षान्न भिदात्मनः स्यात् अतो न बंधस्तव नै
व मोक्षः स्यातां निकामस्त्वयि नोऽविवेकः २० त्वयोदितोयं जगतो हिताय यदा
यदा वेदपथः पुराणः बाध्येत पाखंडपथैरसद्भिस्तदा भवान्सत्त्वगुणं बिभ
र्ति २१

रूपतो न स्यादिति ननु मम बंधाभावं वदतां त्वया किं मोक्षोपीष्टः ओमिति चेत्तर्हि बंधाभावे मोक्षासंभवादीप्से बंधोपीत्याशंक्याह अ
त इति यतो नाविद्या अतो न बंधः अतएव न मोक्षश्च एवमुभौ न स्यातामित्यर्थः ननु त्वत्सखलेशं बद्धभावान्यमुना दृष्टेन मुक्तं दृष्टवान
सि अतः कथमुभयं नास्ति अत आह निकाम इति स्वाभिप्रायानुरूप त्वयि नोस्माकं विवेक एव परमेवं बंधमोक्ष इति पदद्वयं नोविवेक एव
न वा मोक्षाविति २० ननु तर्हि मम अवतारास्तावच्चरित्राणि च किमुक्तिरूपाणि वदविद्याकल्पितान्येव किं नाहि नहि यतो नवलीलत्याह त्वयेनत
बिभर्तीति २१

अपि किं प्राप्नुयः कुलस्त्रियः ६ पैतृष्वस्रेयान् भ्रातृपुत्रान् ७ सांत्वयिष्यतीति किं ८ हे महायोगिन्नत एव योगैश्वर्यो मयात्वं प्रपन्नास्मीति हे वि श्वात्मन् सर्वांतर्यामिन् हे विश्वभावन विश्वपालक प्रपन्नां शरणागतां अवसीदतीं क्लिश्यंतीं ९ आपवर्गिकात् मोक्षप्रदात् १० शुद्धाय धी त्मने ब्रह्मणे प्रपंचातिरिक्ताय परमात्मने जीवस्वरूपाय योगेश्वराय अणिमादियुक्ताय योगाय ज्ञानात्मने ११ प्रपितामही पांडूनां

भा॰द॰पु॰ १९५

१५

अप्यस्मरंति नः सौम्य पितरौ भ्रातरश्च मे भगिन्यौ भ्रातृपुत्राश्च जामयः सख्य एव च ६ भ्रात्रेयो भगवान्
कृष्णः शरण्यो भक्तवत्सलः पैतृष्वस्रेयान् स्मरति रामश्चांबुरुहेक्षणः ७ सपत्नमध्ये शोचंतीं वृको
नां हरिणीमिव सांत्वयिष्यति मां वाक्यैः पितृहीनांश्च बालकान् ८ कृष्ण कृष्ण महायोगिन् विश्वा
त्मन् विश्वभावन प्रपन्नां पाहि गोविंद शिशुभिश्चावसीदतीं ९ नान्यत्तव पदांभोजात् पश्यामि
शरणं नृणां बिभ्यतां मृत्युसंसारादीश्वरस्यापवर्गिकात् १० नमः कृष्णाय शुद्धाय ब्रह्मणे परमा
त्मने योगेश्वराय योगाय त्वामहं शरणं गता ११ श्रीशुक उवाच ॥ इत्यनुस्मृत्य स्वजनं कृष्णं च ज
गदीश्वरं प्रारुदद्दुःखिता राजन् भवतां प्रपितामही १२ समदुःखसुखोऽक्रूरो विदुरश्च महायशाः
सांत्वयामासतुः कुंतीं तत्पुत्रोत्पत्तिहेतुभिः १३ यास्यन् राजानमभ्येत्य विषमं पुत्रलालसं अवदत्सु
हृदां मध्ये बंधुभिः सौहृदोदितं १४ अक्रूर उवाच ॥ भो भो वैचित्रवीर्य त्वं कुरूणां कीर्तिवर्द्धन
भ्रातर्युपरते पांडावधुनासनमास्थितः १५ धर्मेण पालयन्नुर्वीं प्रजाः शीलेन रंजयन् वर्तमानः
समः स्वेषु श्रेयः कीर्तिमवाप्स्यसि १६ अन्यथा त्वाचरल्लोके गर्हितो यास्यसे तमः तस्मात्समत्वेव

रम॰ १९५

भार्यादेः १२ प्रख्यातयशाः समं दुःखं सुखं च यस्य सः तस्याः पुत्राणामुत्पत्तिहेतुभिः जनकैः धर्मानिलेंद्रादिभिः तत्कथनैरित्यर्थः
१३ बंधुभिः रामकृष्णादिभिः सौहृदेन उदितं उक्तं यत् तदवददिति १४ भ्रातर्युपरते इति पांडोः पुत्रेषु सत्सु राज्यासनं त्वमास्थित इति
शिष्टः १५ भवतु तथाप्येवं वर्तमानः श्रेयोऽवाप्स्यसीत्याह धर्मेणेति १६ तमः नरकं दैवं दुःखमिति भावः १७ ७ ७

वीचि चिकीर्षवन् प्रागादिति यदुक्तं तत्कार्यमादिशति स द्वीनः मुकुंदं मध्ये भवान् प्रेष्ठः अतः पांडवानां श्रेयः किं चिकीर्षयागजा हूंग छस्व गच्छे
त्यिवद्व्वितिपृथ्युकुंदं देस्व आत्मीये त्यर्थः ३० राज्ञा धृतराष्ट्रे एवं संते निवसंतीति सुश्रमश्रुतं वृत्तोवयं ३१ उग्रायेस्वपुत्राद्वयो धनादि
पत्तद्वसेभगच्छतीतितियायतः अप्रधृष्यः अप्रधृतेनः ३४॥ इति श्रीमद्भागवते दशमस्कंधे ॥ ४८॥ उनपं वाश्राजमेकुराजा कूरोगजाह्वयं राज्ञः स्व
श्रात्पुत्रे शुशुध्वावेश मा भागमत् १ पौरवेंद्रुगणां यथो मित्रात्कृतदिवद्वाहलणायतनादि भिरंकितं वाल्हीकपुत्रः सोमदत्तः भारद्वा

मम्बवान् सुहृदो वैन् श्रेयान् श्रेय श्चिकीर्षयापिज्ञासार्थं पांडवानां गछस्वगाजसाह यं ३० पितर्यु
परतेबालाः सदमात्रा सुहृः खिन्नाः आनीतास्वपुरं राज्ञी वसंतइति शुश्रम ३१ तेषुराज्ञोंविकापुत्रो
भ्रात्पुत्रेषु दीन धीः समोनवर्त्ततेनूनं तद्वयथवसगो दुघं कं ३२ कं छजानीदितेहृतेमधनासाधसा
धुवा विज्ञापतद्विधा स्वामी यथासं सुहृदो भवेत् ३३ इत्य कूरे समादिश्य भगवान् हरिरीश्वरः सं
कर्षणोद्धवाभ्यां वैततः स्वभवनं ययौ ३४॥ इति श्रीभागवते दशमस्कंधे अष्टचत्वारिंशोध्यायः ४८ श्रीशु
कोवाच॥ सगत्वाहास्तिनपुरं पौरवेंद्रयशोंकितं ददर्श तत्राबिकेयं सभीष्मं विदुरं पृथां सहपुत्रं चवा
ल्हीकं भारद्वाजसगोतमं कर्णं सुयोधनं द्रौणिं पांडवान् सुहृदो परान् १ यथावदुपसंगम्य बंधु
भिर्गांदिनीसुतः संपृष्टस्तैः सुहृद्वार्त्तां स्वयं चापृच्छदव्ययं २ उवासकतिचिन्मासान् राज्ञो वृत्तविवि
त्सया दुष्प्रजस्याल्पसारस्य खलच्छंदानुवर्त्तिनः ३ तेज ओजो बलं वीर्यं प्रश्रयादीश्च सद्गुणान् प्रजा
नुरागं पार्थेषु नसहद्भिश्चिकीर्षितं ४ कृतं च धार्त्तराष्ट्रैर्यद्गरदानाद्यपेसलं आचख्यौ सर्वमेवास्मै
पृथा विदुर एव च ५ पृथा तु भ्रातरं प्राप्तमक्रूरमुपसृत्य तं उवाच जन्मनिलयं स्मर
द्बालः गौतमः कृपः १ अल्पयं कुराजं २ दुष्प्रजस्य असत्प्रजस्य अल्पसारस्य अंधत्वात् खलानां कर्णादिनां छंदं वशे छामनुवर्त्तितुंशील
मस्येतित त्वात्तस्य ३ तेजः प्रभावं ओजः शास्त्रादिनैपुण्यं वीर्यं शौर्यं न सहद्भिरसहमानैश्चिकीर्षितं अत्र उपरि कर्तुमिष्टं गरस्य दातादिकृपे
सलं अन्यायं तेज ओज इत्यादि सर्वं कथयामास ५ तत्कथनात्पूर्वमेव तं पृथाचतमाह पृथा बितिग्रअक्रूरं कुलालया पयो जेईसेलो
वेस्यात्॥ ५॥

भा॰ द॰ पू॰
१६६

152

नन्वात्मजानात्मजादिषु कथं सम्भेत्वं स्यात्तत्राह नेह चेति अत्यंतं नित्यं संवासः सम्पर्कः स्थितिः १८ न च तन्मात्र उत्पत्तिमरणयोः सु सहः स्वयमेव भुंक्ते नापिसाहि
संगा इत्तीति आह एकः इति १९ किं च [illegible] जितनराणां लोभोपार्जितवित्तापहारिनश्चान्तु ज्ञानानाम सत्त्वरः एवं ज्ञेया इत्याह अधर्मेति संभोजनीया:
पोष्याः पुत्रादयः इति व्यपदेशो [illegible] मवित्तं हरंति जलौकसो मत्स्यास्तज्जीवन भूतानि जलानि दत्तात् तु न्याहरंति तद्वदिति २० किं च
यानेवं पुष्णाति ते धनमारादयस्त्वां अन्यो लोकं लाजं परित्यजंतीत्याह पुष्णातीति स्वबुद्ध्या स्वीयाऽहमभिमानेन रायः अर्थाः अकृतार्थं अभिभोगं २१
सपुनः पापिकपापयोनरकं विशतीत्याह स्वयमिति असिद्धार्थोऽकृतमनोरथः २२ स्वप्नश्च मायाश्च मनोरथश्च तत्तुल्यं आयम्य नियम्य शांतः सम्यक् भ

नेह चात्यंतसंवासः कर्हिचित्केनचित्सह राजन्स्वेनापि देहेन किमु जायात्मजादिभिः १८ एकः प्रसूयते जंतु
एक एव प्रलीयते एकोऽनुभुंक्ते सुकृतमेक एव च दुष्कृतं १९ अधर्मोपचितं वित्तं हरंत्यन्येऽल्पमेधसः संभो
जनीयापदेशैर्जलानीव जलौकसः २० पुष्णाति यानधर्मेण स्वबुद्ध्या तमपंडितं तेऽकृतार्थं प्रहिण्वंति प्रा
णा रायः सुतादयः २१ स्वयं किल्बिषमादाय तैस्त्यक्तो नार्थकोविदः असिद्धार्थो विशत्यंधं स्वधर्मवि
मुखः तमः २२ तस्माल्लोकमिमं राजन् स्वप्नमायामनोरथं वीक्ष्यायम्यात्मनात्मानं समः शांतो भव प्रभो
२३ धृतराष्ट्र उवाच। यथा वदति कल्याणीं वाचं दानपते भवान् तथानया न तृप्यामि मर्त्यः प्राप्य यथा
मृतं २४ तथापि सूनृता सौम्य हृदि न स्थीयते चले पुत्रानुरागविषमे विद्युत्सौदामिनी यथा २५ ईश्वर
स्य विधिं को नु विधुनोत्यन्यथा पुमान् भूमेर्भारावताराय योऽवतीर्णो यदोः कुले २६ यो दुर्विमर्शपथ
या निजमाययेदं सृष्ट्वा गुणान्विभजते तदनुप्रविष्टः तस्मै नमो दुरवबोधविहारतंत्रसंसारचक्रगत
ये परमेश्वराय २७ श्रीशुक उवाच। इत्यभिप्रेत्य नृपतेरभिप्रायं स यादवः सुहृद्भिः समनुज्ञातः
पुनर्यदुपुरीमगात् २८ शशंस रामकृष्णाभ्यां धृतराष्ट्रविचेष्टितं पांडवान्प्रति कौरव्य यदर्थं प्रेषितः

इति २३ हे दानपते अक्रूर न तृप्यामि अलमिति न मन्ये २४ सूनृता प्रियवाक् चले अस्थिरे हृदि न स्थीयते न तिष्ठति स्थैर्यं न प्राप्नोति तत्र भवादि दृ
ष्टांतः स्मिन् स्फटिकशिलामध्ये सत्सेवाति स्फुरिता विद्युद्यथा लीयते न तु स्थैर्यं यद्वा सुदाम्नि पर्वते सौदामिनी २५ नन्वेवं जानतो विकृप
मयं मोह इति चेत्तत्राह ईश्वरस्येति विधीं विधानं मायामिति यावत् २६ अतस्तमेव नमस्यति य इति दुर्विमर्शः पंथा यस्याः अवितर्क्यमार्गया गुणान्कर्माणि
तत्फलानि च विभजते विविच्य ददाति दुरवबोधो विहारः तंत्रं प्रधानं च यस्य सर्वसंसारचक्रस्य अतएव तं संगतिर्यस्मात्तस्मै नमः इति २७

इति श्री भागवते महापुराणे दशमस्कंधे [illegible] ४९

[illegible] ४९॥

[illegible] भावार्थदीपिकायां दशमस्कंधे [illegible] एकोनपंचाशत्तमः ४९

रा॰
१६६

153